# MudgalapurAna Khanda 5 Lambodaracharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૫ લમ્બોદરચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 5 Lambodaracharitam

File name : mudgalapurANam5.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

# મુદ્ગલપુરાણં ખણ્ડઃ ૫ લમ્બોદરચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૫ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે પઞ્ચમઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૫ અ. ૧ પાન ૧)

## ૫.૧ ત્રિવિધતપોવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
શ્રુતં મયા મહાખ્યાનં ગજાનનકથાશ્રિતમ્ ।
સર્વસૌખ્યકરં તાત બ્રહ્મભૂતપદપ્રદમ્ ॥ ૧॥

તથા તૃપ્તિં ન યામ્યેવ પીત્વા બ્રહ્મામૃતં પરમ્ ।
ગુણજ્ઞો ગણરાજસ્ય કસ્તં મુઞ્ચતિ માનદ ॥ ૨॥

ધન્યા વયં મહાભાગ ત્વદાસઙ્ગસમાશ્રયાત્ ।
યત્ર યોગપ્રદા ગાથા વર્તતે ત્વન્મુખે દ્વિજ ॥ ૩॥

લમ્બોદરસ્ય માહાત્મ્યમધુના વદ સર્વદમ્ ।
કીદૃશોઽયં ગણેશાનઃ કીદૃશં બ્રહ્મ તસ્ય ચ ॥ ૪॥

કતિ તસ્યાવતારાશ્ચ કિઙ્કર્મા સોઽપિ વિઘ્નપઃ ।
કિમર્થમાગતો ભૂમૌ તત્ સર્વં વદ વિસ્તરાત્ ॥ ૫॥

સૂત ઉવાચ ।
એવં દક્ષેણ સંશ્રુત્ય ગજાનનચરિત્રકમ્ ।
પૃષ્ટો યોગીન્દ્રમુખ્યશ્ચ ગાણપત્યોઽથ મુદ્ગલઃ ॥ ૬॥

દક્ષ ઉવાચ ।
ગજાનનસ્ય માહાત્મ્યં શ્રુત્વા સઙ્ક્ષેપતઃ પરમ્ ।

ન તૃપ્તોઽહં મહાભાગ પાયં પાયં સુધામિવ ॥ ૭॥

અતો લમ્બોદરસ્ય ત્વં ચરિત્રં વદ વિસ્તરાત્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૮॥

ગણેશસ્ય કથાં યોગિન્ શ‍ૃણ્વન્તિ ચ પઠન્તિ યે ।
શ્રાવયન્તિ પ્રપૃચ્છન્તિ ચત્વારઃ પુણ્યભાગિનઃ ॥ ૯॥

ધન્યા યે પુરુષા લોકે સાદરા મુનિસત્તમ ।
કથાયાં કૃતકૃત્યાસ્તે યોગિનો યોગભૂષણાઃ ॥ ૧૦॥

સૂત ઉવાચ ।
એવં તસ્યાદરં દૃષ્ટ્વા હર્ષિતો મુદ્ગલો મુનિઃ ।
જગાદ તં મહાભાગં પ્રાજાપત્યેન્દ્રમાદરાત્ ॥ ૧૧॥

મુદ્ગલ ઉવાચ ।
સાક્ષાદ્બ્રહ્મસુતસ્ત્વં ચ બ્રહ્મતુલ્યો ન સંશયઃ ।
તત્ર કિં ગણનાથે વૈ ચિત્રં રસયુતઃ પ્રભો ॥ ૧૨॥

યેષાં મુખારવિન્દેષુ ગણેશસ્મરણં ભવેત્ ।
ઇચ્છામિ તેષાં દાસત્વં નિત્યં દક્ષ પ્રજાપતે ॥ ૧૩॥

અધુના શ‍ૃણુ વક્ષ્યામિ સઙ્ક્ષેપણ ચરિત્રકમ્ ।
લમ્બોદરસ્ય વિસ્તારે કઃ સમર્થો ભવેત્ પ્રભો ॥ ૧૪॥

સંવાદં પૂર્ણસમ્ભૂતમસિતસ્ય મહાત્મનઃ ।
નૈધ્રુવસ્યાઽત્ર વક્ષ્યામિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૫॥

પ્રણમ્ય મુનિશાર્દૂલો નૈધ્રુવો વત્સરં વનમ્ ।
યયૌ તપઃપ્રસિદ્ધ્યર્થં મહાભાગો મહામુનિમ્ ॥ ૧૬॥

સ તતાપ તપો ઘોરં દિવ્યવર્ષસહસ્રકમ્ ।
તપસા તસ્ય દેવેન્દ્રા ભીતાશ્ચ પ્રબભૂવિરે ॥ ૧૭॥

કિમયં તપસા સાધ્યં કર્તુમિચ્છતિ વાડવઃ ।
ન તુલ્યં તપસોઽસ્યાત્ર બ્રહ્માણ્ડે કિં ભવિષ્યતિ ॥ ૧૮॥

તતસ્તસ્યાઽઽશ્રમેઽકસ્માદસિતોઽભવદાગતઃ ।
પિતૃવ્યં મુનિરુત્થાય પ્રણનામ કૃતાઞ્જલિઃ ॥ ૧૯॥

પુપૂજ ભક્તિસંયુક્તઃ કૃતાઞ્જલિપુટઃ સ્થિતઃ ।

તસ્યાઽઽજ્ઞયા વિનીતઃ સ આસને સંસ્થિતોઽભવત્ ॥ ૨૦॥

તમુવાચ મહાયોગી સોઽસિતો હિતકારકમ્ ।
વચો ભાવેન સન્તુષ્ટો ભ્રાતૃપુત્રં તપોધનમ્ ॥ ૨૧॥

અસિત ઉવાચ ।
દેહં કિં તપસા પુત્રાઽતિશોષયસિ તાપસ ।
દેહશોષણરૂપં યત્તપો મુખ્યં ન શાસ્ત્રતઃ ॥ ૨૨॥

અતો દેહશ્રમં ત્યક્ત્વા તપો મુખ્યં સમાચર ।
યેન ત્વં બ્રાહ્મણો ભૂત્વાંઽતે બ્રહ્મણિ ગમિષ્યસિ ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
અસિતસ્ય વચઃ શ્રુત્વા નૈધ્રુવો ભક્તિસંયુતઃ ।
પુનઃ પ્રપચ્છ યોગીન્દ્રં સંશયેન સમન્વિતઃ ॥ ૨૪॥

નૈધ્રુવ ઉવાચ ।
કૃચ્છ્રચાન્દ્રાદિધર્મેણ યથાવિધિ કૃતં મુને ।
તપો બ્રુવન્તિ સર્વજ્ઞાસ્તત્ર મુખ્યં કિમપ્યહો ॥ ૨૫॥

(Page ખં. ૫ અ. ૧ પાન ૨)
અસિત ઉવાચ ।
તપશ્ચ ત્રિવિધં પ્રોક્તં તાપદં નાત્ર સંશયઃ ।
તચ્છૃણુષ્વ વિધાનેન યોગિવન્દ્યો ભવિષ્યસિ ॥ ૨૬॥

કૃચ્છ્રચાન્દ્રાયણાદીનિ તપાંસિ પ્રવદન્તિ ચ ।
પઞ્ચાગ્નિસાધનાદીનિ વાયુભક્ષાત્મકાનિ ચ ॥ ૨૭॥

ઇત્યાદિભેદા બહવસ્તપસો વિવિધસ્ય ચ ।
તદેવ બાહ્યભાવસ્થં પુત્ર જાનીહિ નિશ્ચિતમ્ ॥ ૨૮॥

ઇહામુત્રપ્રદં તાત તપઃ ફલમયં સ્મૃતમ્ ।
ફલં ભુક્ત્વા પુનઃ સોઽપિ દીનરૂપો ભવેત્ કિલ ॥ ૨૯॥

અન્યચ્છૃણુ મહાભાગ તપઃ પરમદુશ્ચરમ્ ।
વાયુરોધાત્મકં દેહે પ્રાણાયામેન જાયતે ॥ ૩૦॥

તત્ર પ્રાણસ્ય સન્તાપો જાયતે નાત્ર સંશયઃ ।
દેહસ્યાપિ તથા પુત્ર તપસ્તેન તદુચ્યતે ॥ ૩૧॥

ષટ્ચક્રભેદને દક્ષમન્તર્ધ્યાનપરાયણઃ ।
સહસ્રારે ગતં વાયું રોધયેત્તત્ર લાલસઃ ॥ ૩૨॥

તપઃપ્રભાવેન તેન ક્ષુદ્રસિદ્ધિયુતો નરઃ ।
ભવતિ જ્ઞાનમાર્ગજ્ઞસ્ત્રિકાલજ્ઞાનસંયુતઃ ॥ ૩૩॥

દૂરશ્રવણસામીપ્યં કુરુતે કામગાં ગતિમ્ ।
જલે સ્થલં સ્થલે તોયમાકાશે નગરાદિકમ્ ॥ ૩૪॥

અહતાજ્ઞશ્ચ સર્વત્ર ભવતે પરમદ્યુતિઃ ।
અપરાયુઃ સમાયુક્તો બ્રહ્માદ્યાંશ્ચાલયત્યપિ ॥ ૩૫॥

એકકલ્પસ્ય સર્વેષાં વૃત્તાન્તં કથયત્યપિ ।
જાનાતિ સ તપો યોગાદન્તર્ધ્યાનપરાયણઃ ॥ ૩૬॥

સોઽપિ ગત્વા વિધેર્લોકં ભુનક્તિ વિવિધં સુખમ્ ।
પુણ્યાન્તે પુનરત્રૈવ દીનો ભવતિ નિશ્ચિતમ્ ॥ ૩૭॥

તૃતીયં ત્વં તપોરૂપં શૃણુ મત્તો સુયોગદમ્ ।
દ્વિવિધં ચ તપો યેન સાધિતં ગુરુમાર્ગતઃ ॥ ૩૮॥

તેનૈકાગ્રમયં ચિત્તં ભવત્યત્ર ન સંશયઃ ।
સર્વત્રાત્મસ્વરૂપં સ પશ્યતિ જ્ઞાનચક્ષુષા ॥ ૩૯॥

તત્રાનુભવમાત્રેણ શમદમપરાયણઃ ।
ભવતે તેન સન્તાપો દેહે મનસિ જાયતે ॥ ૪૦॥

વિષયાન્નિન્દયન્ સોઽપિ જડોન્મત્તપિશાચવત્ ।
ચરતિ સર્વભાવજ્ઞ આત્મનિષ્ઠતયા સુત ॥ ૪૧॥

તતો નિરોધયોગેન નિવૃત્તિષુ પરાયણઃ ।
ચિત્તં સંરુધ્ય સર્વત્ર નિવૃત્તિં લભતે સ્વયમ્ ॥ ૪૨॥

અહં બ્રહ્મેતિ યત્ પ્રોક્તં કુતસ્તત્ર ભયં ભવેત્ ।
ન જગજ્જગદાત્મા વૈ મનો વાણીવિહીનકઃ ॥ ૪૩॥

સ્વત ઉત્થાનભાવો નોત્થાનં પરત એવ ન ।
ન સ્વતઃ પરતસ્તત્ર ઉત્થાનં વર્જિતં ભવેત્ ॥ ૪૪॥

એવં નિરોધયોગેન શમી દમપરાયણઃ ।
સન્તોષેણ સ્વયં યોગી વર્તતે નિત્યદા સુત ॥ ૪૫॥

તત્ર સન્તોષભાવેન સ્થિતસ્ય દેહચેતસોઃ ।
સન્તાપો જાયતે નિત્યં તદેવ તપ ઉચ્યતે ॥ ૪૬॥

તતો નિરોધભૂમિં સ ત્યક્ત્વા શાન્તિપરાયણઃ ।
ત્યક્ત્વા પઞ્ચવિધં ચિત્તમેવં બ્રહ્મૈવ જાયતે ॥ ૪૭॥

તતો વિધિનિષેધાભ્યાં હીનો યોગધરઃ સ્વયમ્ ।
રસહીનશ્ચરત્યત્ર પ્રારબ્ધાનુભવેન સઃ ॥ ૪૮॥

યથા જલાનિ સર્વત્ર સુત ગચ્છન્તિ સાગરે ।
યદૃચ્છયા તથા સોઽપિ ભોક્તા ભોગેન નિત્યદા ॥ ૪૯॥

તત્રાંઽતરે શરીરેઽસ્ય તાપઃ સઞ્જાયતે સદા ।
શાન્ત્યા ભોગપરત્વેન તદેવ તપ ઉચ્યતે ॥ ૫૦॥

(Page ખં. ૫ અ. ૨ પાન ૩)
એતદ્યોગાત્મકં સુજ્ઞ તપસ્તે કથિતં મયા ।
તૃતીયં બ્રહ્મદં પૂર્ણં તદર્થં યત્નમાચર ॥ ૫૧॥

તપોધના મહાભાગા યોગિનસ્તત્પરાયણાઃ ।
બ્રાહ્મણાસ્તપસા યુક્તા બ્રહ્મભૂતા ભવન્તિ તે ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે અસિતનૈધ્રુવસંવાદે
ત્રિવિધતપોવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૫.૧

## ૫.૨ ભસ્માસુરવધો નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અસિતસ્ય વચઃ શ્રુત્વા નૈધ્રુવો વિસ્મિતોઽભવત્ ।
પ્રણમ્ય તં મહાભાગં જગાદ વિનયાન્વિતઃ ॥ ૧॥

નૈધ્રુવ ઉવાચ ।
સ્વામિન્ વદ મહાયોગં યોગદં સાધનં પરમ્ ।
તદર્થં કસ્ય ભક્તિર્મે કર્તવ્યા યોગિસત્તમ ॥ ૨॥

અસિત ઉવાચ ।
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ લમ્બોદરકથાનકમ્ ।
તેન સર્વં મહાયોગં લભસે નાત્ર સંશયઃ ॥ ૩॥

એકદાઽહં તથા પુત્ર વત્સરસ્તે પિતા પુરા ।
તપસા શુદ્ધભાવેન ભવાવઃ સ્મ ચ નિર્મલૌ ॥ ૪॥

તતો યોગસ્ય પ્રાપ્ત્યર્થં યત્નવન્તૌ સુસંસ્થિતૌ ।
અન્તર્જ્ઞાનસમાયુક્તૌ જડોન્મત્તાદિસુપ્રિયૌ ॥ ૫॥

એકાગ્રં સાધયિત્વા વૈ નિરોધે સંસ્થિતૌ તથા ।
સહજાવસ્થયા યુક્તૌ સુખયુક્તૌ ભવાવહે ॥ ૬॥

તત્રૈવ મોહહીનત્વં દૃષ્ટ્વા પરમવિસ્મિતૌ ।
શાન્તિહીનૌ તતો જાતૌ ગતૌ ચ બ્રહ્મણોંઽતિકમ્ ॥ ૭॥

તત્ર સ્પર્ધાસમાયુક્તૌ વિશ્વામિત્રવસિષ્ઠકૌ ।
સમાયાતૌ પ્રણમ્યૈનં પ્રતિષ્ઠન્તૌ મદાન્વિતૌ ॥ ૮॥

ક્રોધયુક્તૌ વિધાતારં પ્રપૃચ્છન્તૌ વિશેષતઃ ।
કોઽધિકો વદ ધાતસ્ત્વં તપસા યોગસેવયા ॥ ૯॥

તચ્છ્રુત્વા તૌ જગાદાઽથ બ્રહ્મા સર્વપિતામહઃ ।
યેન ક્રોધો જિતો નૂનં તં જાનામ્યધિકં મુનિમ્ ॥ ૧૦॥

યુવાં ક્રોધયુતૌ પૂર્ણૌ તત્ર કિં વિદ્યતે તપઃ ।
સર્વત્ર શાન્તિદં યોગં તં યો જયતિ સોઽધિકઃ ॥ ૧૧॥

તતઃ પ્રણમ્ય વિશ્વેશં વદતઃ સ્મ તપોધનૌ ।
વિનયેન સમાયુક્તૌ તપસ્પર્ધાપરાયણૌ ॥ ૧૨॥

વસિષ્ઠવિશ્વામિત્રાવૂચતુઃ ।
કીદૃશોઽયં પ્રજાનાથ ક્રોધઃ સર્વભયઙ્કરઃ ।
કુત્ર તિષ્ઠતિ દેવેશ કિંરૂપઃ કિંસ્વભાવવાન્ ॥ ૧૩॥

જયન્તિ કેન યોગેન તં દુષ્ટં યોગિનઃ પ્રભો ।
સર્વં વદ વિભો તસ્ય તં જેષ્યાવો ન સંશયઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
અત્રાઽહં કથયિષ્યામીતિહાસં સર્વસિદ્ધિદમ્ ।

તેન ક્રોધં ચ કામં ચાભિમાનં જયતિ પ્રભુઃ ॥ ૧૫॥

શકુનેરભવત્ પુત્રઃ શુક્રં ભસ્માસુરોઽતપત્ ।
ઉપસઙ્ગમ્ય સઙ્ગૃહ્ય વિદ્યાં પઞ્ચાક્ષરીં પુરા ॥ ૧૬॥

દીક્ષાં ગૃહ્ય મહાદેવમુપાસનવિધાનતઃ ।
સાધયામાસ ભાવેન ભસ્મોદ્ધૂલિતવિગ્રહઃ ॥ ૧૭॥

સહસ્રે પ્રગતેષ્વેવ પ્રભુર્વર્ષેષુ શઙ્કરઃ ।
તં યયૌ વરદાનાર્થં સર્વદેવસમાવૃતઃ ॥ ૧૮॥

આગતં શઙ્કરં દૃષ્ટ્વા ઉત્થાય પ્રણિપત્ય તમ્ ।
(Page ખં. ૫ અ. ૨ પાન ૪)
પૂજયિત્વા પ્રતુષ્ટાવ સ્તોત્રૈઃ શૈવૈર્મહાસુરઃ ॥ ૧૯॥

જગાદ શઙ્કરો દૈત્યં સન્તુષ્ટો ભક્તમુત્તમમ્ ।
વરં વરય દાસ્યેઽહં ભક્ત્યા તે તપસાઽસુર ॥ ૨૦॥

ભસ્માસુર ઉવાચ ।
યસ્ય શમ્ભો મહેશાન મસ્તકેઽહં ધરામિ સઃ ।
હસ્તં સદ્યો મૃતો ભૂત્વા તતો ભવતુ ભસ્મસાત્ ॥ ૨૧॥

અન્યેભ્યઃ સર્વભૂતેભ્યો ન ભયં મે કદાચન ।
ભવેત્ સર્વાતિગા શક્તિસ્તથા કુરુ મહેશ્વર ॥ ૨૨॥

તચ્છ્રુત્વા વિસ્મિતઃ શમ્ભુસ્તં જગાદ મહાસુરમ્ ।
સર્વં ચ તે મહાદૈત્ય ભવિષ્યતિ મદાજ્ઞયા ॥ ૨૩॥

હસ્તસ્તે યસ્ય શિરસિ દક્ષિણઃ સમ્પતિષ્યતિ ।
સ વૈ ભસ્મમયઃ સદ્યો ભવિષ્યતિ ન સંશયઃ ॥ ૨૪॥

તતઃ શિવો યયૌ સ્થાનં કૈલાસં ગણસંવૃતઃ ।
દૈત્યસ્તત્રૈવ તિષ્ઠન્ સ વિચારમકરોત્ સ્વયમ્ ॥ ૨૫॥

અહો શિવસ્ય વામાઙ્ગે સંસ્થિતા જગદમ્બિકા ।
રૂપલાવણ્યસંયુક્તા રત્નભૂતાઽતિસુન્દરી ॥ ૨૬॥

એતાદૃશી મયા કુત્ર દૃષ્ટા નૈવ સુરૂપિણી ।
નગ્નઃ શમ્ભુરયં તસ્યાઽયોગ્યો નૈવ ભવેદ્રતૌ ॥ ૨૭॥

અતોઽહં યત્નમાસ્થાય વરદાનપ્રભાવતઃ ।

શમ્ભું ભસ્મમયં કૃત્વા ગ્રહીષ્યામિ ચ પાર્વતીમ્ ॥ ૨૮॥

એવં વિચાર્ય દૈત્યેન્દ્ર આયયૌ શઙ્કરાન્તિકમ્ ।
કૈલાસે ગિરિવર્યે સ વેગમાસ્થાય દારુણઃ ॥ ૨૯॥

દક્ષિણં હસ્તમૂર્ધ્વં સ કૃત્વા શઙ્કરસન્નિધૌ ।
આયયૌ તં વિલોક્યૈવ પપાલ ગિરિજાપતિઃ ॥ ૩૦॥

નમસ્કારાદિચિહ્નૈશ્ચ હીનં દૃષ્ટ્વા સ્વસન્નિધૌ ।
અસુરં ભાવસંયુક્તં ભયભીતઃ સમન્તતઃ ॥ ૩૧॥

તતઃ સોઽપિ મહાદૈત્યઃ ક્રોધયુક્તો વિશેષતઃ ।
ધાવયિત્વા તમનુ વૈ ગ્રહીતું પ્રોદ્યતોઽભવત્ ॥ ૩૨॥

તતોઽતિવેગમાસ્થાય શિવો ભીત્યા પલાયત ।
અધાવત્ પૃષ્ઠમાસ્થાય તં ભસ્માસુર એવ ચ ॥ ૩૩॥

પલન્તં શઙ્કરં તત્ર દદર્શ કમલાપતિઃ ।
સસ્માર ગણપં ચિત્તે કિં ભવિષ્યતિ વિહ્વલઃ ॥ ૩૪॥

સોઽપિ તુષ્ટાવ ચાથર્વશિરસા વિઘ્નનાયકમ્ ।
વિષ્ણુઃ પરમશોકાર્તો મહાદેવસ્ય કારણાત્ ॥ ૩૫॥

શિવશ્ચ ભયસંયુક્તો ગણેશં સ્વયમસ્તવીત્ ।
મહાસઙ્કટનાશાર્થં શરણાગતવત્સલમ્ ॥ ૩૬॥

શિવ ઉવાચ ।
કિં પશ્યસે નાથ વિનાયકસ્ત્વં દૈત્યેન સર્વત્ર ચ માં સુત્રાસિતમ્ ।
દક્ષં ભુજં મસ્તકગં ગણેશ કૃત્વા સ માં ભસ્મમયં કરિષ્યતિ ॥ ૩૭॥

નાનાજનૈઃ સેવિતપાદપદ્મ કિં વિસ્મૃતો માં ભયભઙ્ગકારિન્ ।
ચિન્તામણે ચિત્તનિવાસક ત્વં સંરક્ષ વિઘ્નેશ દયાઘનાત્ર ॥ ૩૮॥

ત્વદન્યદેવં શરણં ગજાસ્ય પ્રભું સમર્થં ન ચ યામિ નાથ ।
ન કોઽપિ હેરમ્બ મહાનુભાવ ક્ષમો હિ માં રક્ષિતુમીશ્વરઃ કઃ ॥ ૩૯॥

લમ્બોદરામોઘ સુચિન્તનં તે સ્વાનન્દવાસિંશ્ચ મહોદરસ્ય ।
રક્ષસ્વ માં મૃત્યુમુપાગતં ત્વં ત્વત્પાદનિષ્ઠં ભયભઞ્જનાશુ ॥ ૪૦॥

કિં સિદ્ધિબુદ્ધિપ્રવિહારકેણ સક્તઃ પ્રજાતોઽસિ વિનાયક ત્વમ્ ।
ભક્તાનુકમ્પીતિ તવૈવ નામ વેદે કથં સઙ્કુચિતં મહાત્મન્ ॥ ૪૧॥

કિં લક્ષલાભપ્રભવાર્થમેવં સંસક્તભાવૈરસિ વિસ્મરંશ્ચ ।
માં રક્ષ નો ચેન્નિગમસ્ય દેવ વ્યર્થં યશઃ સમ્ભવિતા પરાત્મન્ ॥ ૪૨॥

(Page ખં. ૫ અ. ૩ પાન ૫)
યથા દિનેશઃ સમકાલયુક્તઃ પ્રકાશદાતા ભવતીતિ નિત્યમ્ ।
તથા હિ તે ભક્તજનાનપારાન્ ક્ષમોઽસિ તાન્ રક્ષિતુમન્તરં કિમ્ ॥ ૪૩॥

કિં યોગરૂપાતિવિલમ્બનેન રક્ષસ્વ ભીતં મરણે સુસંસ્થમ્ ।
હેરમ્બ વિઘ્નેશ વિનાયકાશુ રક્ષસ્વ રક્ષસ્વ મહેશપુત્ર ॥ ૪૪॥

એવં સ્તુવતિ શમ્ભૌ સ વિષ્ણોર્હૃદિ ગજાનનઃ ।
પ્રવિશ્ય બુદ્ધિસન્દાતા બભૂવે ભક્તવત્સલઃ ॥ ૪૫॥

ધૃત્વા સ્ત્રીવેષકં વિષ્ણુર્યયૌ તં ભસ્મકારકમ્ ।
મહાસુરો મુમોહાઽસૌ તાં દૃષ્ટ્વા મોહિનીં સ્ત્રિયમ્ ॥ ૪૬॥

તાં સમાગત્ય પપ્રચ્છ દૈત્યેન્દ્રો મોહસંયુતઃ ।
કુત્ર ગચ્છસિ સુશ્રોણિ કિં તે કાર્યમુપસ્થિતમ્ ॥ ૪૭॥

વદ માં તત્ કરિષ્યામિ ત્વદ્દાસોઽહં ન સંશયઃ ।
અહં સર્વેશ્વરોઽત્રૈવ ન સમો મે પ્રવિદ્યતે ॥ ૪૮॥

ભજ માં ભાવસંયુક્તા ભજન્તં તે ચ દાસકમ્ ।
ત્વદધીનો ભવિષ્યામિ સદા વરાઙ્ગને મતમ્ ॥ ૪૯॥

તસ્ય તદ્વચનં શ્રુત્વા સ્મિત્વા સા તં જગાદ હ ।
અહં મોહપ્રદા નારી મોહિન્યત્ર સમાગતા ॥ ૫૦॥

મદાજ્ઞયા દૈત્ય યદિ વર્તસે ત્વં નિરન્તરમ્ ।
તદા તે ગૃહગા ભૂત્વા તિષ્ઠામ્યત્ર ન સંશયઃ ॥ ૫૧॥

તથેતિ દૈત્યરાજસ્તાં જગાદ સાઽબ્રવીત્ પુનઃ ।
નૃત્યં કુરુ મદગ્રે ત્વં યથા નૃત્યામિ વૈ અહમ્ ॥ ૫૨॥

તથેતિ પ્રતિપાદ્યૈવ સા નનર્ત કલાન્વિતા ।
તથા દૈત્યાધિપસ્તત્ર નનર્ત કામમોહિતઃ ॥ ૫૩॥

તયા દક્ષિણહસ્તશ્ચ સ્થાપિતઃ શિરસિ સ્વકે ।
તથા સોઽપિ ચકારાશુ ભ્રાન્તો વિઘ્નેશમાયયા ॥ ૫૪॥

ભસ્મસાદભવદ્દૈત્યો ભસ્માસુરશ્ચ તત્ક્ષણાત્ ।
તતઃ સા વિસ્મિતા ભૂત્વા તુષ્ટાવ ગણનાયકમ્ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ભસ્માસુરવધો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૫.૨

## ૫.૩ ક્રોધાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
ગાણેશૈઃ સ્તોત્રમુખ્યૈઃ સન્તુષ્ટાવ વિષ્ટરશ્રવાઃ ।
ગણેશં સિદ્ધિદં પૂર્ણં ભક્તેભ્યો ભક્તવત્સલમ્ ॥ ૧॥

તતઃ સ મોહિનીરૂપમભૂત્ ત્યક્તું સમુદ્યતઃ ।
એતસ્મિન્નન્તરે તત્રાઽમરૈઃ સમ્બોધિતઃ શિવઃ ॥ ૨॥

જ્ઞાત્વા ભસ્માસુરં શમ્ભુર્મૃતં વિસ્મિતમાનસઃ ।
નનર્ત ભક્તિસંયુક્તો જય વિઘ્નેશ ઉચ્ચરન્ ॥ ૩॥

તતઃ સર્વૈઃ સમાયુક્તો મુકુન્દકપુરં યયૌ ।
તત્ર નારીસ્વરૂપસ્થમદર્શત્ કેશવં શિવઃ ॥ ૪॥

મહામોહપ્રદં રૂપં દૃષ્ટ્વા વિષ્ણોઃ સુવિસ્મિતઃ ।
તદજ્ઞાનો મહાદેવસ્તાં યયૌ કામવિહ્વલઃ ॥ ૫॥

તં દૃષ્ટ્વા મોહિતં વિષ્ણુઃ પપાલ સ્ત્રીસ્વરૂપધૃક્ ।
તામન્વધાવદ્દેવેશઃ શઙ્કરો વિહ્વલો ભૃશમ્ ॥ ૬॥

તતસ્તત્યાજ તદ્રૂપં વિષ્ણુઃ સ પુરુષોઽભવત્ ।
(Page ખં. ૫ અ. ૩ પાન ૬)
શિવઃ ખિન્નશ્ચ તત્રૈવ સ્ખલિતોઽભૂત્ સુવિહ્વલઃ ॥ ૭॥

તતઃ સર્વે યયુર્દેવાઃ સ્વસ્વસ્થાનં મુદા યુતાઃ ।
સ્તુત્વા વિષ્ણું મહાભાગં શિવઃ સ્વસ્થાનગોઽભવત્ ॥ ૮॥

શિવસ્ય વીર્યસમ્પાતાત્તદ્વીર્યપ્રભવોઽસુરઃ ।
બભૂવ શ્યામવર્ણશ્ચ તામ્રચક્ષુઃ પ્રતાપવાન્ ॥ ૯॥

સ શુક્રમુપસઙ્ગમ્યોવાચ તં વિનયાન્વિતઃ ।

પ્રણમ્ય તેજસા યુક્તઃ શિષ્યં પાલય માં મુને ॥ ૧૦॥

તતો ધ્યાનેન સ જ્ઞાત્વા તસ્ય સર્વં મહામુનિઃ ।
પુનસ્તં પ્રજગાદૈવ વચનં હર્ષયન્નરમ્ ॥ ૧૧॥

શુક્ર ઉવાચ ।
મોહિનીં શઙ્કરો દૃષ્ટ્વા કામબાણપ્રપીડિતઃ ।
પશ્ચાદ્વિષ્ણું સમાલોક્ય સ્વચિત્તે ક્રોધમાદધે ॥ ૧૨॥

મનો મે ચઞ્ચલં પૂર્ણં તદ્ ગ્રહીષ્યામિ યત્નતઃ ।
મનોગ્રહણરૂપશ્ચ ક્રોધસ્તત્ર પ્રવર્તતે ॥ ૧૩॥

તસ્મિન્ કાલે ચ વીર્યસ્ય સ્ખલનં સહસાઽભવત્ ।
તસ્માજ્જાતોઽસિ તેન ત્વં ક્રોધનામા ભવિષ્યસિ ॥ ૧૪॥

તતો દાનવમુખ્યૈઃ સ કારયામાસ વિપ્રપ ।
મૌઞ્જ્યન્તસર્વસંસ્કારાન્ યથાવિધિ સ શાસ્ત્રવિત્ ॥ ૧૫॥

ક્રોધો વેદાદિકં સર્વમભ્યસ્ય ગુરુસન્નિધૌ ।
શમ્બરસ્ય સુતાં તુલ્યામુપયેમે મહાસુરઃ ॥ ૧૬॥

પ્રીતિનામ્નીં મહારૂપાં સર્વાવયવશાલિનીમ્ ।
રૂપલાવણ્યસંયુક્તાં વિષયાનાં પ્રવર્ધિનીમ્ ॥ ૧૭॥

તતઃ શુક્રં સમાગમ્ય જગાદ પ્રણિપત્ય તમ્ ।
કૃતાઞ્જલિર્મહાતેજા દૈત્યેભ્યઃ સુખદં વચઃ ॥ ૧૮॥

ક્રોધાસુર ઉવાચ ।
બ્રહ્માણ્ડવિજયં સ્વામિન્ કરિષ્યામિ ત્વદાજ્ઞયા ।
મન્ત્રં દેહિ તદર્થં મે સર્વં યશોવિવર્ધનમ્ ॥ ૧૯॥

બ્રહ્મોવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા કાવ્યઃ સર્વજ્ઞસત્તમઃ ।
દૈત્યાનાં પ્રહિતાર્થાય દદૌ તસ્મૈ મહામનુમ્ ॥ ૨૦॥

સૂર્યસ્ય વિધિયુક્તં પ્રણમ્ય સઙ્ગૃહ્ય તં યયૌ ।
વનં વ્યાઘ્રાદિસઙ્કીર્ણં તપસે કૃતનિશ્ચયઃ ॥ ૨૧॥

એકપાદેન તિષ્ઠન્ સમજપન્ મન્ત્રમુત્તમમ્ ।
ચિત્તે ધ્યાયન્નર્યમાણમૂર્ધ્વદૃષ્ટિર્મહાસુરઃ ॥ ૨૨॥

નિરાહારેણ દેવેશં તોષયામાસ યત્નતઃ ।
શીતોષ્ણાદિભયં ત્યક્ત્વા કાષ્ઠવત્ સંસ્થિતોઽભવત્ ॥ ૨૩॥

દિવ્યવર્ષસહસ્રેણ તુષ્ટો ભાનુસ્તમાયયૌ ।
વરં દાતું મહાદૈત્યમુવાચ ઘનનિઃસ્વનઃ ॥ ૨૪॥

રવિરુવાચ ।
વરાન્ વૃણુ મહાભાગ ક્રોધાઽહં તે દદામિ તાન્ ।
સન્તુષ્ટસ્તપસોગ્રેણેપ્સિતાન્ હૃદિ મહામતે ॥ ૨૫॥

શ્રુત્વા રવેર્વચો દૈત્યો દૃષ્ટ્વા તં પુરતઃ સ્થિતમ્ ।
પ્રણનામ મહાભક્ત્યાઽપૂજયત્તેજસાં નિધિમ્ ॥ ૨૬॥

પુનઃ પ્રણમ્ય તુષ્ટાવ કૃતાઞ્જલિપુટોઽસુરઃ ।
સૌરસૂક્તેન દેવેશં પુનઃ સન્નત આદરાત્ ॥ ૨૭॥

તમુવાચાર્યમા દૈત્યં વરં વૃણુ મહામતે ।
યં યમિચ્છસિ તં તં તે દાસ્યામ્યત્ર ન સંશયઃ ॥ ૨૮॥

ક્રોધાસુર ઉવાચ ।
ઉત્પત્તિસ્થિતિસંહારયુક્તા યે દેવનાયકાઃ ।
તેભ્યો મે મરણં ભાનો ન ભવેદ્વૈ કદાચન ॥ ૨૯॥

બ્રહ્માણ્ડજયને શક્તં માં કુરુષ્વ વિશેષતઃ ।
રાજ્યં ચરાચરસ્યૈવ દેહિ મેઽદિતિનન્દન ॥ ૩૦॥

આરોગ્યં મનસા યદ્યચ્ચિન્તિતં સફલં ભવેત્ ।
ન મે સમો ભવેત્ કુત્ર તથા કુરુ દિવસ્પતે ॥ ૩૧॥

શ્રુત્વા તસ્ય વચો રમ્યં સર્વેભ્યો ભયદાયકમ્ ।
(Page ખં. ૫ અ. ૪ પાન ૭)
વિસ્મિતસ્તેજસાં નાથસ્તં જગાદ સુયન્ત્રિતઃ ॥ ૩૨॥

ભાનુરુવાચ ।
ક્રોધ ત્વયા ચ યત્ પ્રોક્તં તદેવ સફલં ભવેત્ ।
તપસા યન્ત્રિતો દૈત્ય તસ્માદ્દત્તં મયા પરમ્ ॥ ૩૩॥

એવમુક્ત્વાર્યમા લોકમગમદ્દુઃખસંયુતઃ ।
ક્રોધો હર્ષસમાવિષ્ટઃ પ્રયયૌ સ્વગૃહં તતઃ ॥ ૩૪॥

સુહૃદો નન્દયામાસાસુરાન્ સર્વાન્ મહાયશાઃ ।
કાવ્યં પ્રણમ્ય સ્વસ્થાને સંસ્થિતોઽભૂન મદાન્વિતઃ ॥ ૩૫॥

હર્ષઃ શોકશ્ચ પુત્રૌ દ્વૌ પ્રીત્યામુત્પાદ્ય દૈત્યપઃ ।
નાનાભોગાન્ પ્રભુઞ્જાનો ગર્વિતોઽભૂત્તતઃ પરમ્ ॥ ૩૬॥

શુક્રં સકલનીતિજ્ઞં સમાનાય્ય પ્રપૂજ્ય તમ્ ।
તસ્યાનુમતમાગૃહ્ય નગરં નિર્મમેઽસુરઃ ॥ ૩૭॥

આવેશનામકં રમ્યં સર્વશોભાસમન્વિતમ્ ।
તત્રાજગ્મુશ્ચ વિપ્રર્ષે દાનવા દૈત્યરાક્ષસાઃ ॥ ૩૮॥

ચાતુર્વર્ણ્યસમાયુક્તા નિવાસં ચક્રિરે પુરા ।
જના હર્ષયુતાસ્તત્ર મુમુદુઃ સસુહૃદ્ગણાઃ ॥ ૩૯॥

તતઃ કાવ્યઃ સમાગત્ય ક્રોધં ચકાર વિપ્રપૈઃ ।
અભિષિક્તં સ સર્વેષાં દાનવાનાં પદે પ્રભુમ્ ॥ ૪૦॥

તતઃ ક્રોધસ્ય તત્પુર્યાં પ્રધાનાઃ પઞ્ચ દારુણાઃ ।
બભૂવુઃ સર્વનીતિજ્ઞા મહામાયા મહાબલાઃ ॥ ૪૧॥

બલિર્જૃમ્ભસ્તથા રાહૂ રાવણો માલ્યવાન્ પરઃ ।
તૈર્યુક્તઃ શુશુભેઽત્યન્તં ક્રોધઃ પરમદારુણઃ ॥ ૪૨॥

અન્યે પ્રહસ્તમુખ્યાશ્ચ રાક્ષસા દાનવાસ્તથા ।
સિષેવિરે ભાવયુક્તા મહાક્રોધં મહાબલાઃ ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ક્રોધાસુરરાજ્યપ્રાપ્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૫.૩

## ૫.૪ ક્રોધાસુરબ્રહ્માણ્ડવિજયો નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
તતઃ કિઞ્ચિદ્ગતે કાલે ક્રોધો હર્ષસમન્વિતઃ ।
ઉવાચ બલિમુખ્યાંશ્ચ દાનવાન્ ગર્વપૂરિતઃ ॥ ૧॥

ક્રોધાસુર ઉવાચ ।
શ‍ૃણુધ્વં દાનવાઃ સર્વે બલિમુખ્યા મહાબલાઃ ।

બ્રહ્માણ્ડં પ્રજયિષ્યામિ ભવદ્ભિઃ સંયુતો હ્યહમ્ ॥ ૨॥

તસ્ય તદ્વચનં શ્રુત્વા દૈત્યાઃ સંહર્ષિતા નૃપમ્ ।
જગુસ્તં ભક્તિસંયુક્તા કૃત્વા કરપુટં વચઃ ॥ ૩॥

બલ્યાદ્યા ઊચુઃ ।
સમ્યગુક્તં ત્વયા નાથ પ્રજેષ્યામઃ સુરાધિપાન્ ।
ત્વત્પ્રસાદેન દૈત્યેશ આજ્ઞાપય મહાસુરાન્ ॥ ૪॥

પરાક્રમતુલાં તે ન તિષ્ઠન્તિ બ્રહ્મગોલકે ।
નિર્ભયોઽસિ મહારાજ જય ત્વં સર્વદેવપાન્ ॥ ૫॥

તેષાં વચનમાકર્ણ્યાઽસુરઃ ક્રોધઃ પ્રહર્ષિતઃ ।
શુક્રં નત્વા સમાનાય્ય બભૌ તેનાનુમોદિતઃ ॥ ૬॥

તતો દૈત્યગણાન્ સર્વાનાજુહાવ નરૈઃ સ્વકૈઃ ।
તે સર્વે હર્ષસંયુક્તા આયયુસ્તં નરાધિપમ્ ॥ ૭॥

તતઃ સૈન્યસમાયુક્તો નિર્જગામ મહાસુરઃ ।
ચતુરઙ્ગબલૈર્યુક્તોઽપારૈઃ સર્વત્ર સમ્બભૌ ॥ ૮॥

રથસ્થશ્ચ સ્વયં ક્રોધો દૈત્યપૈઃ સંવૃતો બભૌ ।
તત્રાદૌ પૃથિવીં જેતું યયૌ ભૂમણ્ડલે નૃપાન્ ॥ ૯॥

બલિમુખ્યૈર્મહાવીરૈઃ સ્થિતૈર્યત્ર ચ માનદૌ ।
તૈર્યુદ્ધં કઃ પુમાન્ ભૂમૌ કર્તું શક્તો ભવેત્તદા ॥ ૧૦॥

રાજાનઃ શરણં જગ્મુર્દૈત્યેન્દ્રભયપીડિતાઃ ।
કેચિન્ મૃતાશ્ચ તૈર્યુદ્ધં કૃત્વાઽહઙ્કારસંયુતાઃ ॥ ૧૧॥

કેચિદ્રાજ્યં પરિત્યજ્ય સુદારુણવનં યયુઃ ।
એવં વસુન્ધરાં જિત્વા મુમુદુઃ સપ્તસાગરામ્ ॥ ૧૨॥

રાજ્ઞસ્તે કરદાંશ્ચક્રુર્દૈત્યાઃ શરણમાગતાન્ ।
મૃતાસ્તેષાં સુતાઃ સર્વે કરદાન્ સ્થાપ્ય ચક્રિરે ॥ ૧૩॥

વનેષુ યે ગતાસ્તેષુ દૈત્યાઃ સંસ્થાપિતાશ્ચ તૈઃ ।
બભુઃ સંસ્થાપિતા દૈત્યાઃ સર્વત્ર નગરેષુ વૈ ॥ ૧૪॥

તતઃ પાતાલલોકેષુ યયુર્દૈત્યેન્દ્રમુખ્યકાઃ ।
ક્રોધાસુરસમાયુક્તા જેતું નાગાન્ મહાબલાન્ ॥ ૧૫॥

દૂતમુખેન વૃત્તાન્તં જ્ઞાત્વા શેષ ઉદારધીઃ ।
વરગર્વસમાયુક્તં ક્રોધં જ્ઞાત્વા યયૌ સ્વયમ્ ॥ ૧૬॥

સમાગતં મહાનાગૈઃ શેષં જ્ઞાત્વા સમાવૃતમ્ ।
ક્રોધાસુરઃ પ્રસન્નાત્મા માન્ય તં સાદરોઽભવત્ ॥ ૧૭॥

કરભારં વાર્ષિકં સ વૃતઃ સ્વીકૃત્ય નાગપૈઃ ।
દત્ત્વા રત્નાદિકં શેષો યયૌ સ્વસ્થાનમેવ ચ ॥ ૧૮॥

તતઃ સ દૈત્યપૈઃ સર્વૈર્યયૌ શુક્રેણ પાલિતઃ ।
દેવસ્થાનેષુ સર્વેષુ દેવોદ્યાનાન્યભઞ્જયત્ ॥ ૧૯॥

તતો દૂતં મહાદૈત્યઃ પ્રેષયામાસ હર્ષિતઃ ।
જગાદ મઘવન્તં ચ સ ગત્વા ચેષ્ટિતં મહત્ ॥ ૨૦॥

બૃહસ્પતિં ચ દેવેન્દ્રૈસ્તત ઇન્દ્રઃ સમાયયૌ ।
તેન સંજ્ઞાપિતઃ સર્વૈઃ પ્રપપાલ ગુહાન્તરમ્ ॥ ૨૧॥

તજ્જ્ઞાત્વા દૈત્યપૈઃ સર્વૈર્હર્ષિતઃ ક્રોધકોઽસુરઃ ।
આયયાવમરાવત્યામિન્દ્રાસનસ્થિતોઽભવત્ ॥ ૨૨॥

દેવસ્થાનાનિ સર્વાણિ વિભજ્ય પ્રદદૌ સ્વયમ્ ।
અસુરેભ્યો મહાદૈત્યસ્તેષુ દૈત્યાઃ સ્થિતા બભુઃ ॥ ૨૩॥

નાના ભોગાન્ પ્રભુઞ્જાના દેવસૌખ્યકરાન્ મુની ।
અન્યોન્યસ્નેહસંયુક્તા બભૂવુઃ સાહસપ્રિયાઃ ॥ ૨૪॥

ગન્ધર્વાશ્ચારણાદ્યાશ્ચાપ્સરસસ્તાન્ સિષેવિરે ।
દુઃખયુક્તા વિશેષેણ દેવૈર્હીના મહામુની ॥ ૨૫॥

તતઃ કદાચિદ્દૈત્યેન્દ્રો દૈત્યપૈઃ સંવૃતો યયૌ ।
સત્યલોકં સુવિખ્યાતં જ્ઞાત્વા બ્રહ્મા પપાલ હ ॥ ૨૬॥

તત્રૈવ સંસ્થિતો દૈત્યઃ ક્રોધઃ પરમદારુણઃ ।
બુભુજે સત્યલોકોત્થાન્ ભોગાન્ દૈત્યૈર્મહાબલૈઃ ॥ ૨૭॥

તતો વિકુણ્ઠમેવં સ જગામાસુરસંવૃતઃ ।
જ્ઞાત્વા તત્ર સ્થિતો વિષ્ણુઃ પપાલ ક્રોધભીતિતઃ ॥ ૨૮॥

તત્ર સ્થિત્વા વિકુણ્ઠસ્ય ભોગાન્ વિષ્ણુકૃતાન્ સ્વયમ્ ।

બુભુજે જ્ઞાતિભિઃ સાર્ધં ક્રોધઃ પરમદારુણઃ ॥ ૨૯॥

તતઃ કૈલાસકં દૈત્યઃ શઙ્કરં જેતુમાયયૌ ।
મહાદેવઃ પપાલૈવ ક્રોધસન્તાપતાપિતઃ ॥ ૩૦॥

તત્રસ્થઃ ક્રોધકો દૈત્યો નનન્દ હૃદિ ચાદ્ભુતમ્ ।
દૈત્યૈઃ સમાવૃતઃ ક્રૂરસ્તાન્ જગાદ બલાન્વિતઃ ॥ ૩૧॥

ક્રોધાસુર ઉવાચ ।
બલે રાવણમુખ્યાશ્ચ શ઼ૃણુધ્વં મે વચો હિતમ્ ।
અધુના ન જિતં સ્થાનં વદતાઽહં જયામિ તત્ ॥ ૩૨॥

દૈત્યેન્દ્રા ઊચુઃ ।
સર્વં જિતં ત્વયા રાજન્ ભાનુરેકઃ સુરાધિપઃ ।
ન જિતઃ સ તદર્થં ત્વં પ્રયતસ્વાઽસુરાધિપ ॥ ૩૩॥

જગાદ ક્રોધકો દૈત્યસ્તતસ્તાન્ હર્ષસંયુતઃ ।
ઇષ્ટદેવં મદીયં તં ભાનું ત્યજત દૈત્યપાઃ ॥ ૩૪॥

(Page ખં. ૫ અ. ૫ પાન ૯)
તસ્ય તદ્વચનં શ્રુત્વા ક્ષોભયુક્તા મહાસુરાઃ ।
જગુસ્તં માયયા યુક્તાઃ ક્રોધં ભેદપરાયણાઃ ॥ ૩૫॥

અસ્માકમિષ્ટદેવોઽયં સૂર્યઃ સ્વામિન્ન સંશયઃ ।
ભજિષ્યામો વિશેષેણ તં સદા ભક્તિલાલસમ્ ॥ ૩૬॥

દેવાનાં પક્ષમુત્સૃજ્યેચ્છત્યસ્માકં હિતં યદિ ।
તદા વન્દ્યોઽર્યમા નાથ નાન્યથા જય તં બલાત્ ॥ ૩૭॥

પરપક્ષાશ્રિતં દેવમસ્મત્સંહનને રતમ્ ।
જયિષ્યામો વયમતો હિતં રાજન્ સમાચર ॥ ૩૮॥

દૈત્યેશાનાં વચઃ શ્રુત્વા ક્રોધઃ સંહર્ષિતોઽભવત્ ।
દૂતં સમ્પ્રેષયામાસ રાવણં ગર્વસંયુતમ્ ॥ ૩૯॥

રાવણાત્ સર્વવૃત્તાન્તં જ્ઞાત્વા ભાનુઃ પ્રતાપવાન્ ।
તમુવાચ તદા ક્રુદ્ધો ભયભીતશ્ચ માનદૌ ॥ ૪૦॥

રવિરુવાચ ।
દેવાનાં પક્ષમુત્સૃજ્ય ક્રોધાસુરપરાયણઃ ।

ન ભવિષ્યામિ ભો દૂત દેવોઽહં નાત્ર સંશયઃ ॥ ૪૧॥

ઉન્મત્તં વરસંયુક્તં ક્રોધં વદ મહામતે ।
ત્યક્ત્વા રાજ્યં વને ભાનુર્ગતો રાજ્યં કુરુષ્વ ચ ॥ ૪૨॥

એવમુક્ત્વા રાવણં સ સૂર્યઃ સર્વસમન્વિતઃ ।
પપાલ લોકમુત્સૃજ્ય રાવણસ્તં સમાયયૌ ॥ ૪૩॥

તતોઽતિહર્ષિતો દૈત્યઃ ક્રોધો દુષ્ટૈઃ સમાવૃતઃ ।
આયયૌ સૌરલોકં તં મુમુદે પ્રાપ્ય દુર્જનઃ ॥ ૪૪॥

આત્માનં કૃતકૃત્યં સ માનયામાસ દુર્મતિઃ ।
બ્રહ્માણ્ડવિજયી ભૂત્વા ભોગાંશ્ચ બુભુજે પરાન્ ॥ ૪૫॥

તતઃ સંસ્થાપ્ય દૈત્યેન્દ્રાન્ તેષુ સ્વર્ગેષુ દૈત્યપઃ ।
પૃથિવ્યાં નગરં મુખ્યમાયયૌ પ્રીતિસંજ્ઞકમ્ ॥ ૪૬॥

ક્રોધાસુરોઽસૌ તત્રસ્થઃ પ્રશશાસ પ્રતાપવાન્ ।
ત્રૈલોક્યં ભોગસંયુક્તઃ સુહૃદાનન્દદાયકઃ ॥ ૪૭॥

સ્ત્રીમાંસમદિરાસક્તો બભૂવ વિષયપ્રિયઃ ।
ન બુબોધ ગતં કાલં યથાકાલેન વઞ્ચિતઃ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ક્રોધાસુરબ્રહ્માણ્ડવિજયો નામ ચતુર્થોઽધ્યાયઃ ॥ ૫.૪

## ૫.૫ દેવર્ષિવરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
તતોઽતિમદસંયુક્તોઽસુરઃ ક્રોધઃ પ્રતાપવાન્ ।
દૈત્યાનાજ્ઞાપયત્ ક્રૂરાન્ કર્મણઃ ખણ્ડનાય તાન્ ॥ ૧॥

તસ્યાજ્ઞયા યયુર્દૈત્યા યત્ર તત્ર મહીતલે ।
બ્રાહ્મણાંસ્તાડયામાસુર્વર્ણાશ્રમપ્રવર્તકાન્ ॥ ૨॥

અન્યાન્ વર્ણાંસ્તથા ગૃહ્ય કર્મહીનાંશ્ચ ચક્રિરે ।
દેવતીર્થાદિકં દૈત્યા બભઞ્જુર્યજ્ઞવૃક્ષકાન્ ॥ ૩॥

સર્વત્ર ત્રાસિતા લોકાઃ કર્મહીના બભૂવિરે ।

ન સ્વાહા ન સ્વધા કુત્ર ન વષટ્કાર એવ ચ ॥ ૪॥

તતો વિપ્રાનુવાચાઽથ ક્રોધાસુરઃ પ્રતાપવાન્ ।
મદીયનામસંયુક્તં કર્મ કુર્વન્તુ વિપ્રપાઃ ॥ ૫॥

જગદીશો મહાભાગા અહં દ્વિજા ન સંશયઃ ।
ભજતાં પાદયોર્મે નો દુર્લભં કિં ભવિષ્યતિ ॥ ૬॥

તતો દ્વિજાસ્તપોનિષ્ઠા ગતા વનેષુ માનદૌ ।
ત્યક્ત્વા વિષયજં સૌખ્યં સિંહવ્યાઘ્રયુતેષુ તે ॥ ૭॥

કેચિદ્ ભ્રષ્ટાસ્તદાજ્ઞાયાં સંસ્થિતા દુઃખસંયુતાઃ ।
(Page ખં. ૫ અ. ૫ પાન ૧૦)
વર્ણાશ્રમવિહીનાશ્ચ જનાઃ સર્વે બભૂવિરે ॥ ૮॥

સર્વત્ર ક્રોધકસ્યૈવ પ્રતિમા સ્થાપિતાઽભવત્ ।
ગૃહે ગૃહે તથા તસ્યાઽસુરૈઃ પૂજા પ્રવર્તિતા ॥ ૯॥

એવં હા હા કૃતં સર્વં ત્રૈલોક્યં તેન વૈરિણા ।
દેવાઃ સર્વે ભયોદ્વિગ્ના બભૂવુઃ કર્મખણ્ડનાત્ ॥ ૧૦॥

કર્મખણ્ડનભાવેનોપોષણૈઃ સંયુતાઃ સુરાઃ ।
તતસ્તસ્ય વિનાશાર્થં યત્નવન્તો બભૂવિરે ॥ ૧૧॥

ન પ્રાપુસ્તસ્ય શાન્ત્યર્થમુપાયં તે સુરેશ્વરાઃ ।
તતોઽતિખેદસંયુક્તા બભૂવુસ્ત્રાસકમ્પિતાઃ ॥ ૧૨॥

એતસ્મિન્નન્તરે તત્ર વસિષ્ઠો યોગિનાં વરઃ ।
જગાદ તાન્ સુરેશાનાન્નિઃશ્વસ્ય હિતકારકઃ ॥ ૧૩॥

વસિષ્ઠ ઉવાચ ।
ઉત્પત્તિસ્થિતિસંહારૈર્વયં યુક્તા ન સંશયઃ ।
અસ્મભ્યો મરણં તસ્ય ન ભવિષ્યતિ નિશ્ચિતમ્ ॥ ૧૪॥

સ્વાનન્દવાસકરણં ગણેશં બ્રહ્મનાયકમ્ ।
ત્રિભિર્હીનં જગુર્વેદાસ્તં સેવધ્વં સુરેશ્વરાઃ ॥ ૧૫॥

હત્વા ક્રોધાસુરં સોઽપિ સ્વપદાનિ પ્રદાસ્યતિ ।
અસ્મભ્યં નાત્ર સન્દેહં કુર્વન્તુ પ્રયતાઃ સુરાઃ ॥ ૧૬॥

વસિષ્ઠવચનં શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।

સાધુ સાધુ મુનિ સર્વે જગુર્જ્ઞાનનિધિં પરમ્ ॥ ૧૭॥

તતસ્તે મન્ત્રરાજં વૈ જેપુર્લમ્બોદરસ્ય ચ ।
ભક્તિયુક્તાસ્તપોનિષ્ઠા ધ્યાનસંસ્થા બભૂવિરે ॥ ૧૮॥

નાનાનુષ્ઠાનયોગૈશ્ચાતોષયંસ્તે ગજાનનમ્ ।
ઉપોષણપરાઃ સર્વે વિધિયુક્તા મહામુની ॥ ૧૯॥

એવં વર્ષસહસ્રે ચ પ્રગતે તોષસંયુતઃ ।
લમ્બોદરઃ પ્રસન્નાત્મા તાન્ યયૌ વરદાયકઃ ॥ ૨૦॥

સમાગતં ગણેશાનં દૃષ્ટ્વા દેવર્ષયઃ પુરઃ ।
ઉત્થાય હર્ષસંયુક્તાઃ પ્રણેમુર્દણ્ડવદ્ભુવિ ॥ ૨૧॥

પુપૂજુર્ભક્તિસંયુક્તાઃ પ્રભું નાનોપચારકૈઃ ।
પુનઃ પ્રણમ્ય સન્તુષ્ટાસ્તુષ્ટુવુઃ કરસમ્પુટૈઃ ॥ ૨૨॥

દેવર્ષય ઊચુઃ ।
નમસ્તે ગણનાથાય લમ્બોદરધરાય ચ ।
ગજવક્ત્રાય સર્વેષાં નમઃ પૂજ્યાય તે નમઃ ॥ ૨૩॥

સ્વાનન્દપતયે તુભ્યં સર્વસ્વાનન્દદાયિને ।
અનાથાય ચ સર્વેષાં નાયકાય નમો નમઃ ॥ ૨૪॥

નમો વિઘ્નેશ્વરાયૈવ ભક્તવિઘ્નવિનાશિને ।
અભક્તાનાં મહાવિઘ્નકારકાય નમો નમઃ ॥ ૨૫॥

ઉત્પત્તિસ્થિતિસંહારહીનાય સર્વરૂપિણે ।
અનાદયે પરેશાય મહોદર નમોઽસ્તુ તે ॥ ૨૬॥

માયિનાં મોહકાયૈવ માયાવિને પરાત્મને ।
સર્વસિદ્ધિપ્રદાયૈવ નાનાવિદ્યાકલાત્મને ॥ ૨૭॥

અપારાનનરૂપાયાપારહસ્તપદાય ચ ।
ગુણેશાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૨૮॥

આદિમધ્યાન્તરૂપાયાદિમધ્યાન્તસ્વરૂપિણે ।
અનાકારાય તે ચાકારયુક્તાય નમો નમઃ ॥ ૨૯॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પતયે સર્વદાયિને ।
આદિપૂજ્યાય ચાન્તે તે સંસ્થિતાય નમો નમઃ ॥ ૩૦॥

નાનાવિધં જગત્ સર્વં બ્રહ્મ નાનાવિધં પ્રભો ।
સમ્ભૂતમુદરાત્તે વૈ તેન લમ્બોદરો ભવાન્ ॥ ૩૧॥

તવોદરભવાઃ સર્વે ત્વં ન કસ્યોદરોદ્ભવઃ ।
તેન લમ્બોદરોઽસિ ત્વં લમ્બોદર નમોઽસ્તુ તે ॥ ૩૨॥

સર્વેષામુદરાણાં ત્વં પારં જાનાસિ વિઘ્નપ ।
ઉદરસ્ય ન કસ્તેઽપિ પારં જાનાતિ તે નમઃ ॥ ૩૩॥

એતાદૃશોઽયમાનન્દાનામાનન્દપ્રદાયકઃ ।
પ્રત્યક્ષં દૃષ્ટિગો જાતોઽસ્માકં ધન્યા વયં તતઃ ॥ ૩૪॥

(Page ખં. ૫ અ. ૫ પાન ૧૧)
મનોવાણીવિહીનો ન મનોવાણીમયો ન ચ ।
લમ્બોદરઃ સમાયાત આશ્ચર્યં ભાતિ તે નમઃ ॥ ૩૫॥

કિં સ્તુવીમઃ ગણેશાનં યત્ર વેદાદયઃ પ્રભો ।
શાન્તિં પ્રાપ્તા વયં તત્ર નઃ પ્રસીદ નમો નમઃ ॥ ૩૬॥

એવમુક્ત્વા સુરાઃ સર્વે નનૃતુર્મુનયસ્તથા ।
તાનુવાચ ગણેશાનો મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૩૭॥

લમ્બોદર ઉવાચ ।
વરં બ્રૂત મહાભાગા દેવેન્દ્રા મુનયોઽમલાઃ ।
તપસા મનસાઽભીષ્ટં ભક્ત્યા તુષ્ટો દદામ્યહમ્ ॥ ૩૮॥

ભવત્કૃતં મદીયં યત્ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
પઠતે શૃણ્વતે ચેહામુત્ર સૌખ્યપ્રદં પરમ્ ॥ ૩૯॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
નાનાસિદ્ધિપ્રદં ચાસ્તુ મમ ભક્તિવિવર્ધનમ્ ॥ ૪૦॥

બ્રહ્મોવાચ ।
લમ્બોદરવચઃ શ્રુત્વા હૃષ્ટા દેવર્ષયોઽભવન્ ।
જગુસ્તં પ્રણિપત્યૈવ સર્વેશં ભક્તપાલકમ્ ॥ ૪૧॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।

તદા ક્રોધાસુરં નાથ મારયસ્વાધુના પ્રભો ॥ ૪૨॥

સ્થાનભ્રષ્ટા વયં તેન કૃતાઃ કર્મવિહીનકાઃ ।
ઋષયશ્ચ જગત્ સર્વં સ્વધાસ્વાહાવિવર્જિતમ્ ॥ ૪૩॥

અતો લમ્બોદર સ્વામિંસ્તવોદરસમુદ્ભવાન્ ।
એકં હત્વા તથા સર્વાન્ રક્ષ સ્વભક્તકાન્ પ્રભો ॥ ૪૪॥

ભક્તિં દેહિ ત્વદીયાં નઃ સર્વક્રોધવિનાશિનીમ્ ।
તયા શાન્તિસમાયુક્તા ભજિષ્યામો વિશેષતઃ ॥ ૪૫॥

તવ ભક્તિર્યદા પ્રાપ્તા લમ્બોદર તદા શુભમ્ ।
ભુનક્તિ સર્વદા સ્વામિન્ બ્રહ્મભૂતઃ સ વૈ સ્મૃતઃ ॥ ૪૬॥

સર્વં મુનીનાં દેવાનાં વચઃ શ્રુત્વા મહાપ્રભુઃ ।
લમ્બોદરશ્ચ તાન્ પ્રાહ તથેતિ ભક્તિયન્ત્રિતઃ ॥ ૪૭॥

તતઃ સોઽન્તર્હિતો દેવો દેવાસ્તત્રૈવ સંસ્થિતાઃ ।
મુનયશ્ચ ભયોદ્વિગ્નાઃ કાલકાઙ્ક્ષાં પ્રચક્રિરે ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે દેવર્ષિવરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫.૫

## ૫.૬ દેવાસુરયુદ્ધવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
વિશ્વામિત્રવસિષ્ઠૌ ચ શ઼ૃણુતં પરમાદ્ભુતમ્ ।
ચરિતં ગણનાથસ્ય મહાશાન્તિપ્રદાયકમ્ ॥ ૧॥

કદાચિત્ ક્રોધકો દૈત્યઃ સભાસનગતોઽભવત્ ।
તત્રાકાશભવાં વાણીં શુશ્રાવ ભયદાયિનીમ્ ॥ ૨॥

લમ્બોદરશ્ચ મુનિભિર્દેવૈઃ સાર્ધં વધાય તે ।
પ્રાર્થિતઃ સ તુ હત્વા ત્વાં જગત્ સુખિ કરિષ્યતિ ॥ ૩॥

તચ્છ્રુત્વા મૂર્ચ્છિતં ક્રોધં સહસા ભયવિહ્વલમ્ ।
તં દૈત્યેન્દ્રાશ્ચ વિપ્રર્ષી સાવધાનં પ્રચક્રિરે ॥ ૪॥

શોકયુક્તા વિશેષેણ પપ્રચ્છુસ્તં મહાસુરાઃ ।

બલ્યાદ્યા ભયભીતાશ્ચ કિં જાતં વદ માનદ ॥ ૫॥

દૈત્યેશાનાં વચઃ શ્રુત્વા ભયયુક્તો મહાસુરઃ ।
જગાદ તાન્ સ વૃત્તાન્તમાકાશે વાક્સમુદ્ભવમ્ ॥ ૬॥

તચ્છ્રુત્વા કુપિતા દૈત્યાસ્તમૂચુર્મદસંયુતાઃ ।
(Page ખં. ૫ અ. ૬ પાન ૧૨)
દેવાન્ મુનિગણાન્નાથ હનિષ્યામોઽદ્ય નિશ્ચિતમ્ ॥ ૭॥

અસ્માકં શત્રવો દેવાસ્તૈઃ કૃતં દારુણં મહત્ ।
આજ્ઞાપય મહાભાગ સર્વાન્ દેવજિઘાંસયા ॥ ૮॥

તતોઽતિહર્ષિતઃ ક્રોધઃ સ્વયં યુદ્ધાય સજ્જિતઃ ।
દૈત્યેશૈઃ સંવૃતઃ સદ્યો યયૌ શૈલેન્દ્રમુખ્યકમ્ ॥ ૯॥

સમાગતં મહાક્રોધં દૈત્યેશૈઃ સંવૃતં તતઃ ।
દેવાઃ સર્વે ભયોદ્વિગ્નાઃ સસ્મરુર્ગણનાયકમ્ ॥ ૧૦॥

તેષાં સ્મરણમાત્રેણ લમ્બોદરઃ પ્રતાપવાન્ ।
મૂષકારૂઢ એવાસાવાગતોઽભૂન્ મહાપ્રભુઃ ॥ ૧૧॥

પાશાદિશસ્ત્રસંયુક્તં સિદ્ધિબુદ્ધિસમન્વિતમ્ ।
નાભિશેષં ત્રિનેત્રં તં દદૃશુશ્ચ સુરર્ષયઃ ॥ ૧૨॥

તતસ્તં તે પ્રણેમુર્વૈ ભયં ત્યક્ત્વા સુહર્ષિતાઃ ।
સ્તુત્વા વૃત્તાન્તમુગ્રં તં કથયામાસુરાદૃતાઃ ॥ ૧૩॥

શ્રુત્વા વૃત્તાન્તમુગ્રં સ તાન્ જગાદ સુરાધિપાન્ ।
લમ્બોદરઃ પ્રસન્નાત્મા મુનીન્ ક્રોધયુતઃ પ્રભુઃ ॥ ૧૪॥

લમ્બોદર ઉવાચ ।
મા ભયં કુરુત પ્રાજ્ઞા હનિષ્યામિ મહાસુરમ્ ।
સ્વધર્મસ્થાન્ જનાન્ સર્વાન્ કરિષ્યામિ ન સંશયઃ ॥ ૧૫॥

તતઃ ક્રોધાસુરસ્તત્ર સમીપે સમુપાગતઃ ।
દૃષ્ટ્વા લમ્બોદરં દેવં ભયભીતો બભૂવ હ ॥ ૧૬॥

ઉવાચ દૈત્યપાંસ્તત્ર સત્યા વાક્ સા ન સંશયઃ ।
અયં લમ્બોદરો નૂનં દેવૈઃ સમ્પ્રાર્થ્યતેઽસુરાઃ ॥ ૧૭॥

તસ્ય તદ્વચનં શ્રુત્વા દૈત્યાઃ ક્રોધારુણેક્ષણાઃ ।

ઊચુસ્તં દૈત્યનાથં તે ગર્વયુક્તા બલાન્વિતાઃ ॥ ૧૮॥

દૈત્યેશા ઊચુઃ ।
લમ્બોદરયુતાન્ દેવાન્ હનિષ્યામો ન સંશયઃ ।
મા કુરુષ્વ વૃથા ચિન્તાં રક્ષ પૃષ્ઠં મહામતે ॥ ૧૯॥

દેહધારી ગણાધ્યક્ષ આગતો નાત્ર સંશયઃ ।
ઉત્પત્તિનાશવાન્ દેહઃ કિં કરિષ્યતિ તેઽશુભમ્ ॥ ૨૦॥

કાવ્યં દૈત્યગણાસ્તત્ર સસ્મરુર્ભક્તિસંયુતાઃ ।
તેષાં સ્મરણમાત્રેણ સ ચાપિ હ્યાગતોઽભવત્ ॥ ૨૧॥

તં પ્રણમ્ય ગુરું દૈત્યા વૃત્તાન્તં સર્વમઞ્જસા ।
કથયન્તિ સ્મ તં શ્રુત્વા શુક્રસ્તાન્ પ્રત્યુવાચ હ ॥ ૨૨॥

શુક્ર ઉવાચ ।
સિદ્ધિપતિં પરિત્યજ્ય સિદ્ધિમિચ્છતિ દુર્મતિઃ ।
તથા ત્યક્ત્વા બુદ્ધિપતિં સ્ફૂર્તિમિચ્છતિ મૂર્ખવત્ ॥ ૨૩॥

વિઘ્નરાજં સદૈકં યં તં ત્યક્ત્વા વિઘ્નહીનકાઃ ।
કથં ભવન્તિ વદત દૈત્યેન્દ્રા માં વિનિશ્ચયાત્ ॥ ૨૪॥

અતો યુદ્ધં પરિત્યજ્ય શરણં તસ્ય શોભનમ્ ।
ભવિષ્યતિ ન સન્દેહો નોચેત્ ક્રોધો મરિષ્યતિ ॥ ૨૫॥

શુક્રસ્ય વચનં શ્રુત્વા બલિસ્તત્ર જગાદ તમ્ ।
કર્મણા સિદ્ધિદાતાઽયં સ્ફૂર્તિદાતા ભવત્યહો ॥ ૨૬॥

કર્મણા વિઘ્નહીનત્વં સવિઘ્નં પ્રકરોતિ ચ ।
અતો વયં મહાયોગિન્ કર્મણા તં જયામહે ॥ ૨૭॥

તસ્ય તદ્વચનં શ્રુત્વા સર્વે દૈત્યેન્દ્રકાદયઃ ।
સાધુ સાધ્વબ્રુવંસ્તત્ર સઙ્ગ્રામાયોદ્યતા બભુઃ ॥ ૨૮॥

તતો ભાવિ બલં વીક્ષ્ય કાવ્યસ્તત્ર મુનીશ્વરૌ ।
તૂષ્ણીમ્ભાવં સમાધૃત્ય સંસ્થિતોઽભૂત્ સ યોગવિત્ ॥ ૨૯॥

દેવાઃ સર્વે મહાસ્ત્રૈસ્તે યુક્તાઃ ક્રોધસમન્વિતાઃ ।
આયયૂ રણભૂમિં ચ દૈત્યેશાશ્ચ તથા યયુઃ ॥ ૩૦॥

તતઃ પરસ્પરં યુદ્ધં બભૂવે દારુણં મહત્ ।

દૈત્યાનાં ચૈવ દેવાનાં પરસ્પરવિનાશનમ્ ॥ ૩૧॥

દેવા દૈત્યા યુયુધિરે કૃત્વા મરણનિશ્ચયમ્ ।
(Page ખં. ૫ અ. ૬ પાન ૧૩)
શસ્ત્રાસ્ત્રૈર્બલગર્વેણ પ્રેરિતા રણદુર્મદાઃ ॥ ૩૨॥

વીરાણામભવન્નાદૈર્વાદિત્રાણાં ચ વાજિનામ્ ।
બૃંહિતાનાં ચ શઙ્ખાનાં દિશો નાદયુતાસ્તતઃ ॥ ૩૩॥

સૈન્યપાદભવો રેણુશ્છાદયામાસ ભાસ્કરમ્ ।
નાભૂત્ સ્વપરબોધોઽપિ જઘ્નુસ્તે ચ પરસ્પરમ્ ॥ ૩૪॥

તતો રક્તપ્રવાહશ્ચ સમ્ભૂતઃ શસ્ત્રઘાતતઃ ।
રજઃકણાસ્તેન સર્વે મજ્જિતા અભવન્ મૃધે ॥ ૩૫॥

તતઃ પરસ્પરં દૃષ્ટ્વા જઘ્નિરે ક્રોધસંયુતાઃ ।
દેવાશ્ચ દાનવાસ્તદ્વત્ પરસ્પરજયે રતાઃ ॥ ૩૬॥

દિનત્રયમભૂદ્યુદ્ધં ઘોરં સર્વભયાવહમ્ ।
તતો દૈત્યગણાઃ સર્વે પપલુસ્ત્રાસસંયુતાઃ ॥ ૩૭॥

દેવા હર્ષયુતાસ્તત્ર જય લમ્બોદર પ્રભો ।
ઊચુસ્તાન્ હન્તુમાયાતા દૈત્યેશાઃ ક્રોધસંયુતાઃ ॥ ૩૮॥

બલિશ્ચ રાવણો જૃમ્ભો માલ્યવાન્ કુમ્ભકર્ણકઃ ।
રાહુશ્ચાન્યે મહાવીરાઃ સઙ્ખ્યાતું ન પ્રશક્યતે ॥ ૩૯॥

તૈઃ શસ્ત્રનિચયૈર્દેવાઃ સંહતાઃ પપલુસ્તદા ।
હિત્વા સઙ્ગ્રામભૂમિં તે છિન્નભિન્નાઃ સમન્તતઃ ॥ ૪૦॥

તત ઇન્દ્રશ્ચ સઙ્ક્રુદ્ધઃ શઙ્કરો વિષ્ણુરેવ ચ ।
સૂર્યશ્ચન્દ્રશ્ચ દેવેન્દ્રા આયયુઃ ક્રોધસંયુતાઃ ॥ ૪૧॥

તૈરસ્ત્રાણાં મહાવૃષ્ટિઃ કૃતા પરમદારુણા ।
તયા દૈત્યગણાઃ સર્વે પપલુશ્ચ દિશો દશ ॥ ૪૨॥

તતોઽતિક્રોધસંયુક્તા રાવણાદ્યાઃ સમાયયુઃ ।
દ્વન્દ્વયુદ્ધમભૂદ્ઘોરં સર્વેભ્યો ભયદાયકમ્ ॥ ૪૩॥

જૃમ્ભો યયૌ મહેન્દ્રેણ રાહુઃ સૂર્યેણ સંયુગે ।
બલિશ્ચ વિષ્ણુના ક્રુદ્ધો રાવણઃ શઙ્કરેણ ચ ॥ ૪૪॥

કુમ્ભકર્ણશ્ચ ચન્દ્રેણ નાના દૈત્યેન્દ્રકાદયઃ ।
દેવેન્દ્રૈર્વાયુમુખ્યૈશ્ચ યુયુધુર્જયકાઙ્ક્ષિણઃ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે દેવાસુરયુદ્ધવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૫.૬

## ૫.૭ ક્રોધાસુરસમાગમો નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
એકરાત્રં મહાઘોરં યુદ્ધં બભૂવ દારુણમ્ ।
તતો રક્તપ્રવાહૈશ્ચ નદ્યો જાતા જલૌઘવત્ ॥ ૧॥

ન જયઃ પ્રાપ્યતે દેવૈર્નાસુરૈર્યમસન્નિભૈઃ ।
મઘવા વજ્રપાતૈસ્તાંશ્ચૂર્ણયામાસ દાનવાન્ ॥ ૨॥

તતો જૃમ્ભોઽતિસઙ્ક્રુદ્ધો ગદામાદાય દારુણામ્ ।
યુયુધે દેવરાજેન મહાબલપરાક્રમઃ ॥ ૩॥

ગદયા દેવરાજં સ મૂર્ચ્છિતં પ્રચકાર હ ।
તતો હાહાકૃતં સર્વૈર્દેવસૈન્યં પપાલ તત્ ॥ ૪॥

ઇન્દ્રઃ સંજ્ઞાસમાયુક્તઃ પુનઃ સંયુયુધે ભૃશમ્ ।
વજ્રેણ પાતયામાસ જૃમ્ભં તં ધરણીતલે ॥ ૫॥

ત્રિશૂલેન હતસ્તત્ર રાવણઃ પતિતો ભુવિ ।
શઙ્કરેણ તતઃ સર્વે પપલુર્દાનવા મૃધે ॥ ૬॥

ગદયા વિષ્ણુના તત્ર બલિઃ સમ્મૂર્ચ્છિતઃ કૃતઃ ।
કુમ્ભકર્ણશ્ચ ચન્દ્રેણ પીડિતો મૂર્ચ્છિતોઽભવત્ ॥ ૭॥

રાહુઃ સૂર્યેણ સઙ્ગ્રામે તેજસા પીડિતો ભૃશમ્ ।
પપાત મૂર્ચ્છયા ભૂમૌ હા હા કૃત્વા મહામુની ॥ ૮॥

(Page ખં. ૫ અ. ૭ પાન ૧૪)
દ્વન્દ્વયુદ્ધં પરે યે યે હ્યકુર્વન્નમરૈર્બલાત્ ।
તે તે સર્વે ચ દેવેન્દ્રૈર્જિતાઃ સર્વે પલાયિતાઃ ॥ ૯॥

ભક્તવત્સલભાવેન શઙ્કરો વિષ્ણુરઞ્જસા ।
રાવણં ચ બલિં તત્ર ચક્રતુર્ન મૃતૌ મૃધે ॥ ૧૦॥

તતોઽતિકોપસંયુક્તા દેવેન્દ્રાઃ શસ્ત્રવૃષ્ટિભિઃ ।
અસુરાન્ મારયામાસુઃ સર્વત્ર ભયસંયુતાન્ ॥ ૧૧॥

પ્રલયં મેનિરે તત્ર દૈત્યાસ્ત્રાસસમાકુલાઃ ।
દેવાંસ્તે શરણં જગ્મુઃ કેચિત્ પ્રાણપરીપ્સયા ॥ ૧૨॥

જય લમ્બોદર સ્વામિન્ જય વિઘ્નેશ દેવપ ।
હેરમ્બ વક્રતુણ્ડ ત્વં જયેત્યૂચુઃ પ્રહર્ષિતાઃ ॥ ૧૩॥

દૈત્યાનાં કદનં દૃષ્ટ્વા ક્રોધઃ પરમવિસ્મિતઃ ।
નિઃશ્વસ્ય ચિન્તયા યુક્તો બભૂવે કિં ભવિષ્યતિ ॥ ૧૪॥

પિતુઃ શોકં વિદિત્વા તૌ હર્ષઃ શોકશ્ચ સંયુગે ।
યયતુઃ શસ્ત્રવર્ષેણ વવર્ષ તૌ ઘનૌ યથા ॥ ૧૫॥

તયોરમોઘરૂપૈશ્ચ શસ્ત્રૈર્દેવા હતા મૃધે ।
છિન્નાઙ્ગાઃ પપલુસ્તત્ર દૈત્યસન્ત્રાસતાપિતાઃ ॥ ૧૬॥

ઇન્દ્રં ચ સહસાઽઽગત્ય શોકઃ પરમદારુણઃ ।
ચકાર મૂર્ચ્છિતં સદ્યો ગદયા મૂર્ધ્નિ ઘાતતઃ ॥ ૧૭॥

સઙ્ગૃહ્ય સ્વબલે સોઽપિ સ્થાપયામાસ દેવપમ્ ।
તતઃ શુક્રેણ દૈત્યેન્દ્રા વિદ્યયા નીરુજાઃ કૃતાઃ ॥ ૧૮॥

બલિમુખ્યા યયુઃ સઙ્ગ્રામં પુનશ્ચ મહામુની ।
ચક્રેણ સહસા હર્ષશ્ચન્દ્રં ચક્રે સ મૂર્ચ્છિતમ્ ॥ ૧૯॥

તતઃ કોપસમાયુક્તઃ શઙ્કરો યુયુધે ભૃશમ્ ।
ત્રિશૂલેન મહાદૈત્યાન્ જઘાન સકલાન્ પ્રભુઃ ॥ ૨૦॥

શઙ્કરસ્ય બલં વીક્ષ્ય હર્ષસ્તત્ર સમાયયૌ ।
યુયુધે તેન દૈત્યેન્દ્રપુત્રસ્તેજસ્વિનાં વરઃ ॥ ૨૧॥

નાનાવિધં મહાઘોરં યુદ્ધં બભૂવ દારુણમ્ ।
હર્ષસ્ય શઙ્કરસ્યૈવ પરસ્પરજયૈષિણોઃ ॥ ૨૨॥

તતસ્ત્રિશૂલઘાતેન શઙ્કરસ્તં જઘાન હ ।
પતિતં મૂર્ચ્છિતં હર્ષં દૃષ્ટ્વા દૈત્યા ભયાતુરાઃ ॥ ૨૩॥

પતિતાન્ દૈત્યપાન્ દૃષ્ટ્વા કાવ્યસ્તત્ર સમાગતઃ ।
હર્ષં મૂર્ચ્છાવિહીનં વૈ ચકાર સ્વેન તેજસા ॥ ૨૪॥

તતો હર્ષસમાયુક્તા દૈત્યેન્દ્રા યુયુધુર્ભૃશમ્ ।
વિષ્ણુસ્તેષાં બલં વીક્ષ્ય ચક્રં મુમોચ દારુણમ્ ॥ ૨૫॥

ચક્રેણ ક્ષુરધારેણ હતા દૈત્યા અનેકશઃ ।
પ્રપેલુર્ભયસંયુક્તાશ્છિન્નભિન્નાઙ્ગકા મૃધે ॥ ૨૬॥

તતઃ શોકઃ સમાયાતઃ શૂલં મુમોચ તૈજસમ્ ।
આગત્ય સહસા વિષ્ણોઃ પપાત હૃદિ વિપ્રપૌ ॥ ૨૭॥

તતઃ સમ્મૂર્ચ્છિતસ્તત્ર પપાત ચ જનાર્દનઃ ।
દૈત્યા હર્ષયુતાઃ સર્વે નાદં ચક્રુર્મહારણે ॥ ૨૮॥

તતો હર્ષો મહાક્રોધાદ્ગદયા મૃત્યુકલ્પયા ।
ચકાર શઙ્કરં તત્ર પતિતં મૂર્ચ્છયા ભૃશમ્ ॥ ૨૯॥

તતો હા હા રવં કૃત્વા દેવાઃ સર્વે પરાજિતાઃ ।
પ્રપેલુઃ સર્વદેવેન્દ્રા દૈત્યાભ્યાં ત્રાસિતા બલાત્ ॥ ૩૦॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં લમ્બોદરઃ પ્રતાપવાન્ ।
અઙ્કુશં ક્રોધસંયુક્તો મુમોચ દૈત્યમણ્ડલે ॥ ૩૧॥

તેજોરૂપં મહાસ્ત્રં તદ્ દૃષ્ટ્વા દૈત્યા વિસિસ્મિરે ।
યાવત્તાવચ્ચ દૈત્યેન્દ્રૌ હતૌ હર્ષશ્ચ શોકકઃ ॥ ૩૨॥

માયયા ગણનાથશ્ચ શુક્રં ગૃહ્ય ગુહાન્તરે ।
ચિક્ષેપ ચ તતઃ સર્વે પ્રપેલૂ રાહુમુખ્યકાઃ ॥ ૩૩॥

તતોઽતિકોપસંયુક્તઃ ક્રોધઃ સ્વયમુપાગતઃ ।
પુત્રશોકં હઠાત્ ગૃહ્ય બાણવૃષ્ટિં ચકાર હ ॥ ૩૪॥

(Page ખં. ૫ અ. ૮ પાન ૧૫)
તદ્બાણૈરપિ તત્રસ્થા દેવાઃ સર્વે મહામુની ।
છિન્નાઙ્ગા અપલન્ સદ્યો હાહાકારરવા દિશઃ ॥ ૩૫॥

લમ્બોદરઃ સમાશ્વાસ્ય દેવેશસ્તાન્ પ્રતાપવાન્ ।
આયયૌ રણભૂમિં સ પાશહસ્તોઽસિધારકઃ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ક્રોધાસુરસમાગમો નામ સપ્તમોઽધ્યાયઃ ॥ ૫.૭

## ૫.૮ ક્રોધાસુરશાન્તિવર્ણનં નામાઽષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
લમ્બોદરં મહાદૈત્યઃ સમાલોક્ય રણં ગતઃ ।
જગાદ ક્રોધસંયુક્તઃ ક્રોધઃ સર્વવિચારવિત્ ॥ ૧॥

ક્રોધાસુર ઉવાચ ।
લમ્બોદર મહામૂર્ખ કિમર્થં રણમાગતઃ ।
દેવાનાં હિતમિચ્છન્ સન્ મરિષ્યસિ ચ મેઽગ્રતઃ ॥ ૨॥

યેન બ્રહ્માણ્ડગં પૂર્ણં જિતં દેવાદયઃ કૃતાઃ ।
પશુતુલ્યા વને સંસ્થા જેતુમિચ્છસિ તં મુધા ॥ ૩॥

મમ ક્રોધો દહેત્ સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
તત્ પુરઃ કથમાયાતઃ સઙ્ગ્રામાય સુયન્ત્રિતઃ ॥ ૪॥

ત્વયા મદીયકં સૈન્યં હતં પુત્રૌ હતૌ તથા ।
અધુના શોકસંયુક્તો હનિષ્યામિ મદાન્વિતમ્ ॥ ૫॥

શરણં યાહિ માં નો ચેન્ મરિષ્યસિ ગજાનન ।
ઉદરં સ્ફોટયિષ્યામિ બાણેનૈકેન તે મહત્ ॥ ૬॥

ઇત્યાદિ વિવિધૈર્વાક્યૈર્લમ્બોદરં મહાસુરઃ ।
ભર્ત્સયામાસ તં દેવો જગાદ મદસંયુતમ્ ॥ ૭॥

લમ્બોદર ઉવાચ ।
કિં માં વદસિ દૈત્યેન્દ્ર હનિષ્યામિ મહાખલમ્ ।
ત્વાં ધર્મસ્ય નિહન્તારં સ્વધર્મસ્થાપકો હ્યહમ્ ॥ ૮॥

સૂર્યદત્તાદ્ વરાદ્ દુષ્ટ દુષ્ટકર્મરતો ભવાન્ ।
અતિપાપૈશ્ચ તત્ સર્વં નિષ્ફલં તે બભૂવ હ ॥ ૯॥

ઉત્પત્તિનાશયુક્તેભ્યો મરણં નૈવ તે ભવેત્ ।
નાઽહં જાતો ન દૈત્યેન્દ મરિષ્યામિ કદાચન ॥ ૧૦॥

બ્રહ્મભૂતં ચ માં વિદ્ધિ સદા સ્વાનન્દવાસિનમ્ ।
કથં જેષ્યસિ તં દુષ્ટ મનોવાણીવિવર્જિતમ્ ॥ ૧૧॥

લમ્બોદરસ્ય વચનં શ્રુત્વા તત્તસ્ય ધીમતઃ ।
ઉવાચ વિસ્મિતો ભૂત્વા તં પુનર્દૈત્યનાયકઃ ॥ ૧૨॥

ક્રોધાસુર ઉવાચ ।
ન જાતોઽસિ યદા બ્રહ્મન્ કથં દેહધરોઽસિ વૈ ।
મનોવાણીવિહીનશ્ચેત્ કથં પશ્યામિ માં વદ ॥ ૧૩॥

લમ્બોદર ઉવાચ ।
ઇયં મદીયવામાંઽગે સિદ્ધિર્ભ્રાન્તિસ્વરૂપિકા ।
સિદ્ધ્યર્થં સર્વલોકાશ્ચ ભ્રમન્તિ ભ્રાન્તિસંયુતાઃ ॥ ૧૪॥

દક્ષિણાંઽગે સ્વયં બુદ્ધિઃ સંસ્થિતા ભ્રાન્તિ ધારિણી ।
બુધ્યા બુધ્યા પુનસ્તત્ર ભ્રાન્તો ભવતિ માનવઃ ॥ ૧૫॥

ચિત્તરૂપા સ્વયં બુદ્ધિઃ પઞ્ચધા પરિકીર્તિતા ।
પઞ્ચભ્રાન્તિમયી સિદ્ધિસ્તયોઃ પતિરહં કિલ ॥ ૧૬॥

નાના વિશ્વં મહાદૈત્ય નાના બ્રહ્મ તથા સદા ।
મદીયોદરગં વિદ્ધિ તેન લમ્બોદરઃ સ્મૃતઃ ॥ ૧૭॥

મમોદરાત્ સમુત્પન્નં મયા સમ્પાલિતં તથા ।
અન્તે ઉદરગં કૃત્વા ક્રીડયામિ નિરન્તરમ્ ॥ ૧૮॥

અતો માં શરણં ગચ્છ જીવિતું યદિ વાઞ્છસિ ।
(Page ખં. ૫ અ. ૮ પાન ૧૬)
શુક્રો માં વેત્તિ તેન ત્વં બોધિતોઽપિ ન બુદ્ધ્યસે ॥ ૧૯॥

નાઽહં દૈત્યવધાકાઙ્ક્ષી તથા દેવવધપ્રિયઃ ।
સ્વસ્વધર્મયુતાન્ સર્વાન્ પાલયામિ ન સંશયઃ ॥ ૨૦॥

પાતાલે દૈત્યપાઃ સર્વે નરા ભૂમૌ સુરા દિવિ ।
સંસ્થિતાશ્ચેદહં દૈત્ય સ્વાનન્દસ્થો ભવામિ ચ ॥ ૨૧॥

દેવાઃ ક્રોધસમાવિષ્ટા જઘ્નુર્દૈત્યાન્ વિશેષતઃ ।
પાતાલસ્થાંસ્તતોઽહં વૈ દૈત્યેભ્યઃ સિદ્ધિદોઽભવમ્ ॥ ૨૨॥

પુનસ્તપોયુતા દૈત્યા જિત્વા દેવાન્ મહાબલાન્ ।

કર્મખણ્ડનભાવેન હન્તુમિચ્છાં પ્રચક્રિરે ॥ ૨૩॥

તદાઽહં દેવસઙ્ઘેભ્યઃ સિદ્ધિદાતાઽભવં પુરા ।
તેન ચ્છિદ્રજ્ઞકા દેવા જઘ્નુઃ સર્વાસુરાન્ પુનઃ ॥ ૨૪॥

ત્વયા સર્વં જિતં દૈત્ય દેવમૂલનિકૃન્તનઃ ।
સર્વેન્દ્રસ્તેન ભવસિ ત્વાં હનિષ્યામિ નિશ્ચિતમ્ ॥ ૨૫॥

તસ્ય તદ્વચનં રમ્યં શ્રુત્વા ક્રોધાસુરઃ પુનઃ ।
વિસ્મિતસ્તં જગાદૈવ હર્ષનિર્ભરમાનસઃ ॥ ૨૬॥

ક્રોધાસુર ઉવાચ ।
નમામિ ત્વાં ગણાધ્યક્ષ સુરાસુરમયં પરમ્ ।
અધુના ભક્તિસંયુક્તં પાલયસ્વ શરણ્યદ ॥ ૨૭॥

દર્શય સ્વાત્મરૂપં મે સર્વસંશયનાશનમ્ ।
લમ્બોદરાર્થસંયુક્તં બ્રહ્માકારં ગજાનનમ્ ॥ ૨૮॥

લમ્બોદરસ્તસ્ય વાક્યં સમાકર્ણ્ય સુહર્ષિતઃ ।
ભક્તિયુક્તં મનસ્તસ્ય જ્ઞાત્વા રૂપમદર્શયત્ ॥ ૨૯॥

જ્ઞાનચક્ષુશ્ચ સન્દત્તં તેન દૈત્યાય તં પુનઃ ।
લમ્બોદરં મહાક્રોધોઽપશ્યત્ પરમવિસ્મિતઃ ॥ ૩૦॥

બ્રહ્મેશં પ્રણનામાઽથ સરોમાઞ્ચો મહાસુરઃ ।
લમ્બોદરઃ પુનસ્તત્ર પૂર્વરૂપો બભૂવ હ ॥ ૩૧॥

તત્ર ક્રોધાસુરસ્તં વૈ પૂજયન્ ભક્તિસંયુતઃ ।
નત્વા તુષ્ટાવ સંહૃષ્ટઃ સાશ્રુનેત્રઃ પ્રતાપવાન્ ॥ ૩૨॥

ક્રોધાસુર ઉવાચ ।
લમ્બોદર નમસ્તુભ્યં શાન્તિયોગસ્વરૂપિણે ।
સર્વશાન્તિપ્રદાત્રે તે વિઘ્નેશાય નમો નમઃ ॥ ૩૩॥

અસમ્પ્રજ્ઞાતરૂપેયં શુણ્ડા તે નાત્ર સંશયઃ ।
સમ્પ્રજ્ઞાતમયો દેહો દેહધારિન્નમો નમઃ ॥ ૩૪॥

સ્વાનન્દે યોગિભિર્નિત્યં દૃષ્ટસ્ત્વં બ્રહ્મનાયકઃ ।
તેન સ્વાનન્દવાસી ત્વં નમઃ સંયોગધારિણે ॥ ૩૫॥

સમુત્પન્નં ત્વદુદરાજ્જગન્નાનાવિધં પ્રભો ।

બ્રહ્મ તદ્ભિન્ન સન્દેહો લમ્બોદર નમોઽસ્તુ તે ॥ ૩૬॥

ત્વદીયકૃપયા દેવ મયા જ્ઞાતં મહોદર ।
ત્વત્તઃ પરતરં નાસ્તિ પરેશાય નમો નમઃ ॥ ૩૭॥

હેરમ્બાય નમસ્તુભ્યં વિઘ્નહર્ત્રે કૃપાલવે ।
આદિમધ્યાન્તહીનાય તન્મયાય નમો નમઃ ॥ ૩૮॥

સિદ્ધિબુદ્ધિવિહારજ્ઞ સિદ્ધિબુદ્ધિપતે નમઃ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે તે વક્રતુણ્ડાય વૈ નમઃ ॥ ૩૯॥

સર્વાત્મકાય સર્વાદિપૂજ્યાય તે નમો નમઃ ।
સર્વપૂજ્યાય વૈ તુભ્યં ભક્તસંરક્ષકાય ચ ॥ ૪૦॥

અતઃ પ્રસીદ વિઘ્નેશ દાસોઽહં તે ગજાનન ।
લમ્બોદરાય નિત્યં નમો નમસ્તે મહાત્મને ॥ ૪૧॥

સ્વત ઉત્થાનપરત ઉત્થાને બ્રહ્મ ધારયન્ ।
તવોદરાત્ સમુત્પન્નં તં કિં સ્તૌમિ પરાત્પરમ્ ॥ ૪૨॥

ઇતિ સ્તુત્વા મહાદૈત્યઃ પ્રણનામ ગજાનનમ્ ।
તમુવાચ ગણાધ્યક્ષો ભક્તં ભક્તજનપ્રિયઃ ॥ ૪૩॥

લમ્બોદર ઉવાચ ।
વરં વૃણુ મહાભાગ ક્રોધાસુર હૃદીપ્સિતમ્ ।
દાસ્યામિ ભક્તિભાવેન સ્તોત્રેણાઽહં હિ તોષિતઃ ॥ ૪૪॥

(Page ખં. ૫ અ. ૯ પાન ૧૭)
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
યઃ પઠિષ્યતિ તસ્યૈવ ક્રોધજં ન ભયં ભવેત્ ॥ ૪૫॥

શ‍ૃણુયાત્તસ્ય તદ્વચ્ચ ભવિષ્યતિ ન સંશયઃ ।
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૪૬॥

ક્રોધાસુર ઉવાચ ।
યદિ લમ્બોદર ત્વં મે પ્રસન્નો વરદોઽસિ ભોઃ ।
તદા ત્વત્પાદપદ્મે ચ ભક્તિં દેહિ દૃઢાં પ્રભો ॥ ૪૭॥

આજ્ઞાં કુરુ મહાભાગ સેવાર્થં તાં કરોમ્યહમ્ ।
સ્થાનં વૃત્તિં ચ મે દેહિ દેહપોષણકારિણીમ્ ॥ ૪૮॥

બ્રહ્મોવાચ ।
ક્રોધાસુરસ્ય વાક્યં તચ્છ્રુત્વા હર્ષસમન્વિતઃ ।
લમ્બોદરસ્તં જગાદ સ પુનર્દૈત્યનાયકમ્ ॥ ૪૯॥

લમ્બોદર ઉવાચ ।
મદીયા સુદૃઢા ભક્તિઃ પ્રભવિષ્યતિ તેઽનઘ ।
વસ ત્વં ભયહીનશ્ચ સ્થાને તે નાત્ર સંશયઃ ॥ ૫૦॥

યત્રારમ્ભે મહાદૈત્ય મદીયં સ્મરણં ન હિ ।
તત્ર ત્વં દૈત્યભાવેન કુરુ રાજ્યં મહામતે ॥ ૫૧॥

તદીયપુણ્યજં સર્વં ભુઙ્ક્ષ્વ નિત્યં સુકર્મજમ્ ।
જ્ઞાનાદિસકલં તદ્વત્ ત્વદીયં નાત્ર સંશયઃ ॥ ૫૨॥

મદ્ભક્તા યે મહાદૈત્ય તાન્ રક્ષસ્વ યથાસુખમ્ ।
ગાણપત્યપ્રિયસ્ત્વં વૈ ભવિષ્યસિ ન સંશયઃ ॥ ૫૩॥

એવમુક્તો મહાદૈત્યઃ ક્રોધઃ પરમહર્ષિતઃ ।
લમ્બોદરં પ્રણમ્યૈવ યયૌ સ્વસ્થાનમુત્તમમ્ ॥ ૫૪॥

દૈત્યા રાહુમુખાઃ સર્વે તં ત્યક્ત્વા ભયસંયુતાઃ ।
પાતાલં વિવિશુર્વિપ્રૌ શુક્રઃ સંહર્ષિતોઽભવત્ ॥ ૫૫॥

એવં ક્રોધાસુરં શાન્તં ચકાર ગણનાયકઃ ।
ક્રોધો ગણેશભક્તિં વૈ કુર્વન્ સન્ સંસ્થિતોઽભવત્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ક્રોધાસુરશાન્તિવર્ણનં નામાઽષ્ટમોઽધ્યાયઃ ॥ ૫.૮

## ૫.૯ લમ્બોદરદેવર્ષિકૃતસ્તુતિવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
એવં ક્રોધાસુરં શાન્તં દૃષ્ટ્વા દેવર્ષયોઽમલાઃ ।
હર્ષયુક્તા વિશેષેણ પુપૂજુર્ગણનાયકમ્ ॥ ૧॥

પૂજયિત્વા વિધાનેન નેમુર્લમ્બોદરં પુનઃ ।
તતસ્તં તુષ્ટુવુઃ સર્વે ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨॥

દેવર્ષય ઊચુઃ ।
શ્રેષ્ઠં પ્રધાનં સકલાદિભૂતં સર્વાન્તગં પૂર્ણમનન્તભાવમ્ ।
નિત્યં નિજાત્માનમચિન્ત્યસંસ્થં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૩॥

બોધેન હીનં સ્વસુખે નિમગ્નં બીજાત્મકં સાઙ્ખ્યમનન્તવેદ્યમ્ ।
વૈદેહયોગેન ચ લભ્યમેવં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૪॥

જીવં પરાનન્દમયં પરેશં બોધસ્વરૂપં પ્રકૃતેર્લયસ્થમ્ ।
દેહૈર્વિહીનં ચ તદાત્મહીનં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૫॥

સોઽહં સદાભેદવિવર્જિતં વૈ દેહાત્મયોગં સકલાવભાસમ્ ।
નિત્યં પુરાણં પુરુષં ગણેશં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૬॥

બિન્દુસ્વરૂપં મનસાઽથ ગમ્યં પાદૈર્વિહીનં ચ ચતુષ્પદં યમ્ ।
નાનાત્મભેદાશ્રિતમેકદન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૭॥

નાદસ્વરૂપં ચ ગુણેશમેકં સર્વત્ર ચક્ષુઃ શ્રુતિતુણ્ડભૂતમ્ ।
(Page ખં. ૫ અ. ૯ પાન ૧૮)
સર્વત્ર હસ્તોદરપાદપદ્મં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૮॥

સંસ્થં સુષુપ્તૌ સમભાવદં વૈ દ્વન્દ્વજ્ઞમાદ્યં દ્વિવિધાવભાસમ્ ।
આનન્દકન્દં તમસા વિભાન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૯॥

સૂક્ષ્મસ્વરૂપં ચ તથાન્તરસ્થં સર્વજ્ઞમાદ્યં ગણનાયકં યમ્ ।
વિજ્ઞાનકોશસ્થવિહારકારં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૦॥

સ્થૂલસ્વરૂપં સકલાભિમાનં શ્રેષ્ઠં રજોયુક્તમનન્તમાદ્યમ્ ।
અન્નાત્મભોગેષુ વિહારસિદ્ધં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૧॥

અધ્યાત્મરૂપં તમસા ચરન્તં દ્રવ્યપ્રકાશં પરમાર્થભૂતમ્ ।
દેહેન્દ્રિયજ્ઞાનમયં ચ ઢુણ્ઢિં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૨॥

નિત્યં રજોદેહવિકારગં વૈ કર્મસ્વરૂપં વિવિધેન્દ્રિયસ્થમ્ ।
તજ્જાધિભૂતાત્મકમપ્રમેયં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૩॥

જ્ઞાનસ્વરૂપં સકલામરસ્થં સર્વેન્દ્રિયજ્ઞાનકરં પ્રભું વૈ ।
તજ્જાધિદૈવપ્રચુરં મહાન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૪॥

આકાશરૂપં સકલાવભાસં નાદપ્રચુરં સકલાદિભૂતમ્ ।
ભૂતૈઃ સદા ખેલકમાદિનાથં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૫॥

વાયુસ્વરૂપં જગદેકચાલં પ્રાણાદિસંસ્થં સ્વવિભાગદં યમ્ ।
દેહપ્રચારં દશ નામભિશ્ચ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૬॥

તેજઃસ્વરૂપં સકલાવભાસં દ્વન્દ્વપ્રચારં જઠરે સુસંસ્થમ્ ।
સન્ધૌ સદા વ્યાપ્ય વિભાગકારં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૭॥

જલસ્વરૂપં રસયુક્તમેવ પુષ્ટિપ્રદં ષડ્રસગં પરેશમ્ ।
નિત્યાર્દ્રભાવસ્ય પ્રકાશદં યં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૮॥

પૃથ્વીસ્વરૂપં ચ ધરાધરેશં સર્વાન્નમૂલં વિવિધૌષધિસ્થમ્ ।
આકારરૂપં ચ ગજાનનં વૈ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૯॥

વિરાટ્સ્વરૂપસ્થમનન્તપારં સર્વત્રનેત્રં ચ સહસ્રશીર્ષમ્ ।
સર્વત્ર હસ્તાનનપાદકાદિં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૦॥

રજોયુતં સૃષ્ટિકરં દ્વિજેશમાદિસ્વરૂપં પ્રપિતામહં યમ્ ।
સમાનભાવેન સુરાસુરસ્થં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૧॥

સત્ત્વપ્રચારં હરિરૂપધારં યં તામસં શઙ્કરવેષસંસ્થમ્ ।
સૂર્યપ્રચારં જગદમ્બિકાગં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૨॥

ઇત્યાદિભેદૈઃ સુવિરાજમાનં સર્વૈર્વિહીનં તુ કથં સ્તુવીમઃ ।
દેવાઃ શિવાદ્યાશ્ચ વિકુણ્ઠિતા વૈ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૩॥

બ્રહ્મોવાચ ।
સ્તુત્વા દેવર્ષયસ્ત્વેવં પ્રણેમુસ્તે ગજાનનમ્ ।
લમ્બોદરસ્તાનુવાચ મહાભાગાન્ સુસિદ્ધિદઃ ॥ ૨૪॥

ભવત્કૃતમિદં સ્તોત્રં ભવેન્ મત્પ્રીતિવર્ધનમ્ ।
પઠતાં શ ृણ્વતાં સદ્યઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૫॥

ધર્માર્થકામમોક્ષાણાં સાધનં બ્રહ્મદં પરમ્ ।
ભવિષ્યતિ સદા માન્યં સર્વકાર્યેષુ સર્વદા ॥ ૨૬॥

મારણોચ્ચાટનાદીનિ સ્તોત્રેણૈવ સુરર્ષયઃ ।
ભવિષ્યતિ ન સન્દેહઃ પરકૃત્યવિનાશનમ્ ॥ ૨૭॥

પુત્રપૌત્રાદિકં સર્વં લભતે સ્તોત્રપાઠતઃ ।
ધનધાન્યકલત્રાદિ સુખં વિન્દતિ માનવઃ ॥ ૨૮॥

કારાગૃહગતં સદ્યો મોચયેત્ સ્તોત્રપાઠતઃ ।

હૃદીપ્સિતં લભેત્ સર્વમેકવિંશતિવારતઃ ॥ ૨૯॥

(Page ખં. ૫ અ. ૯ પાન ૧૯)
એકવિંશતિપાઠાંશ્ચ સ્તોત્રસ્યાસ્ય કરિષ્યતિ ।
સ સદ્યો હિ ફલં ભુઙ્ક્ત એકવિંશદ્દિનાવધિ ॥ ૩૦॥

પ્રસન્નોઽહં પ્રદાસ્યામિ સ્તોત્રેણ મુનયોઽમરાઃ ।
વરં બ્રૂત મહાભાગા યદ્યપિ સ્યાત્ સુદુર્લભમ્ ॥ ૩૧॥

લમ્બોદરવચો દેવર્ષયઃ શ્રુત્વા પ્રણમ્ય તમ્ ।
જગુઃ પ્રહૃષ્ટચિત્તાસ્તે સાશ્રુનેત્રાઃ સુયન્ત્રિતાઃ ॥ ૩૨॥

દેવર્ષય ઊચુઃ ।
લમ્બોદર પ્રસન્નોઽસિ વરદોઽસિ મહાપ્રભો ।
તવ ભક્તિં સુસમ્પૂર્ણાં દેહિ ક્રોધવિવર્જિતામ્ ॥ ૩૩॥

ક્રોધાસુરસ્ત્વયા નાથ કૃતઃ સુશાન્તિધારકઃ ।
તેન વિશ્વં ગણાધીશ વરયુક્તં કૃતં પ્રભો ॥ ૩૪॥

સ્વસ્વકર્મરતાઃ સર્વે ભવિષ્યન્તિ સુધર્મિણઃ ।
વયં ચ સ્વાધિકારેષુ સ્થાસ્યામસ્ત્વત્પ્રસાદતઃ ॥ ૩૫॥

મુનયો ભયહીનાસ્તે યથાઽઽચારકરાઃ પ્રભો ।
ભવિષ્યન્તિ ગણાધીશ કં વરં તુ વૃણીમહે ॥ ૩૬॥

એવમુક્ત્વા પ્રણેમુસ્તે લમ્બોદરં સુખપ્રદમ્ ।
નનૃતુસ્તત્પુરઃ સર્વે હર્ષનિર્ભરમાનસાઃ ॥ ૩૭॥

લમ્બોદરસ્તાનુવાચ તથેત્યેવ પ્રતાપવાન્ ।
અન્તર્ધાનં ચકારાઽસૌ પશ્યતામમરર્ષિણામ્ ॥ ૩૮॥

તતો દેવા દ્વિજાસ્તત્ર મૂર્તિં કૃત્વા સુશોભનામ્ ।
ચતુર્ભુજાં ગણેશસ્ય સ્થાપયામાસુરાદરાત્ ॥ ૩૯॥

પશ્ચિમે સાગરે તીરે પુપૂજુસ્તાં વિશેષતઃ ।
તદાદિ તત્ સમુદ્ભૂતં ક્ષેત્રં લમ્બોદરસ્ય ચ ॥ ૪૦॥

અંશેન સ્વાધિકારેષુ સ્થિતા દેવર્ષયોઽમલાઃ ।
પૂર્ણભાવેન તત્રૈવ ભક્તિં કુર્વન્તિ નિત્યદા ॥ ૪૧॥

એતલ્લમ્બોદરસ્યૈવ કથિતં સુચરિત્રકમ્ ।

વિશ્વામિત્રવસિષ્ઠૌ ચ સંશ્રુતં ક્રોધનાશનમ્ ॥ ૪૨॥

અસદ્બ્રહ્મમયો લમ્બોદરશ્ચાયં ગણેશ્વરઃ ।
સ્વતઃ પરત ઉત્થાનં કરોતિ લીલયા પ્રભુઃ ॥ ૪૩॥

તસ્ય રૂપં પરં કેન વક્તું નૈવ પ્રશક્યતે ।
સર્વસંયોગયોગેન લભ્યતે યોગસેવયા ॥ ૪૪॥

અયં લમ્બોદરશ્ચૈવ પૂર્ણયોગપ્રવાચકઃ ।
સંયોગાયોગયોર્યોગે લભ્યતે યોગસેવયા ॥ ૪૫॥

ઉદરાત્તસ્ય સમ્ભૂતૌ સંયોગાયોગરૂપકૌ ।
તેન લમ્બોદરશ્ચાયં કથ્યતે વેદવાદિભિઃ ॥ ૪૬॥

અસિત ઉવાચ ।
એવમુક્ત્વા સ્વયં બ્રહ્મા વિરરામ મહામતે ।
વસિષ્ઠસ્તં પ્રણમ્યૈવ ગતઃ સ્વાશ્રમમણ્ડલે ॥ ૪૭॥

વિશ્વામિત્રશ્ચ મેધાવી નિઃશ્વસ્ય સ્વસ્થલં ગતઃ ।
એવં ગતે મયા તત્ર પૃષ્ટઃ સોઽપિ પિતામહઃ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે ગજાનનચરિતે લમ્બોદરદેવર્ષિકૃતસ્તુતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૫.૯
(Page ખં. ૫ અ. ૧૦ પાન ૨૦)

## ૫.૧૦ વત્સરાઽસિતશાન્તિવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નૈધ્રુવ ઉવાચ ।
શ્રુત્વા કથાં મહાભાગ ક્રોધશાન્તિકરીં પ્રભો ।
ન તૃપ્યામિ પુનઃ સ્વામિન્ વદ વિઘ્નેશચેષ્ટિતમ્ ॥ ૧॥

ત્વયા પૃષ્ટઃ કથં બ્રહ્મા સ જગાદ કિમપ્યહો ।
તદ્વદસ્વ દયાસિન્ધો તાત યોગપ્રદં હિ ચેત્ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાતેજા નૈધ્રુવેણ પિતૃવ્યકઃ ।
કથાન્તરમુવાચેદં મહાયોગપ્રદં મહત્ ॥ ૩॥

અસિત ઉવાચ ।
શ્ૃણુ પુત્ર પ્રવક્ષ્યામિ યોગશાન્તિપદપ્રદમ્ ।
ગણેશાનસ્ય માહાત્મ્યં બ્રહ્મેશસ્ય વિચક્ષણ ॥ ૪॥

બ્રહ્માણં ચ પ્રણમ્યાદાવપૃચ્છં વિનયાન્વિતઃ ।
વદ તાત મહાયોગં શાન્તિદં સર્વતારક ॥ ૫॥

સહજે ચ મહાયોગિન્ સ્વાધીનત્વં પ્રદૃશ્યતે ।
સ્વેચ્છામયં કથં નાથ ભવતિ બ્રહ્મ તે નમઃ ॥ ૬॥

અતઃ શાન્તિવિહીનૌ ત્વાં સમાગતૌ ન સંશયઃ ।
શાન્ત્યર્થં વદ કિં સેવ્યં કરિષ્યાવસ્ત્વદાજ્ઞયા ॥ ૭॥

અસિત ઉવાચ ।
વત્સરેણ મયા તાત પૃષ્ટઃ સર્વવિદાં વરઃ ।
ઉવાચ પ્રેમસંયુક્તો ગાણપત્યઃ પિતામહઃ ॥ ૮॥

બ્રહ્મોવાચ ।
કર્મજ્ઞાનં સમં બ્રહ્મ સહજં તુ ચતુર્થકમ્ ।
તેષાં સંયોગભાવે વૈ સ્વાનન્દો મૌનધારકઃ ॥ ૯॥

તત્ર સ્વાધીનગં બ્રહ્મ પરાધીનં કુતસ્ત્રિધા ।
સ્વસંવેદ્યમયેનૈવ સુતો યોગેન લભ્યતે ॥ ૧૦॥

સંયોગો માયયા યુક્તઃ સર્વસંયોગભાવતઃ ।
અયોગે સર્વસંયોગો નશ્યતિ વ્યતિરેકતઃ ॥ ૧૧॥

નિવૃત્ત્યા સ્વધિયા બ્રહ્મ પ્રાપ્યતે નાન્યથા ક્વચિત્ ।
સ્વકીયાઽભેદતસ્તત્ર નિવૃત્તિર્યોગિભિર્ધૃતા ॥ ૧૨॥

સંયોગાયોગયોર્યોગે યોગઃ શાન્તિપ્રદાયકઃ ।
શાન્ત્યા સ એવ લભ્યશ્ચ સુતૌ ભવતિ નાન્યથા ॥ ૧૩॥

શાન્તિરૂપધરં પૂર્ણં ગણેશં સંવદન્તિ ચ ।
વેદાસ્તં ભાવસંયુક્તો મુની યદિ ભજિષ્યથઃ ॥ ૧૪॥

તદા શાન્તિયુતૌ યોગી ભવન્તૌ યોગિસમ્મતૌ ।
ભવિષ્યથો મહાભાગૌ નાન્યથા મે વચોઽનૃતમ્ ॥ ૧૫॥

સમ્પ્રજ્ઞાતમયો દેહોઽસમ્પ્રજ્ઞાતમયં શિરઃ ।

ગજાકારં તયોર્યોગે ગણેશો દેહધારકઃ ॥ ૧૬॥

ગણાઃ સમૂહરૂપાશ્ચ સમૂહા બ્રહ્મવાચકાઃ ।
તેષાં સ્વામી ન સન્દેહો ગણેશો નામધારકઃ ॥ ૧૭॥

ચિત્તરૂપા મહાબુદ્ધિશ્ચિત્તમોહકરી મતા ।
સિદ્ધિસ્તયોઃ પતિઃ સાક્ષાદ્ગણેશો વેદવાદતઃ ॥ ૧૮॥

ચિત્તં મોહયુતં ત્યક્ત્વા ચિન્તામણિં ભજિષ્યથઃ ।
યોગશાન્ત્યા મહાભાગૌ નિત્યં તં યોગરૂપકમ્ ॥ ૧૯॥

અસિત ઉવાચ ।
એવમુક્ત્વા વિધાતા વાં વિરરામ મહામતે ।
વત્સરેણ સમાયુક્તસ્તં પ્રણમ્ય વનેઽગમમ્ ॥ ૨૦॥

આવાભ્યાં સાધિતં પુત્ર યથોદ્દિષ્ટં ચ વેધસા ।
શમદમયુતાભ્યાં વૈ શાન્તિઃ પ્રાપ્તા સુનિશ્ચલા ॥ ૨૧॥

તથાપિ ગણરાજસ્ય ભજને નિરતૌ પુરા ।
ગતે વર્ષે ગણાધ્યક્ષ આયયૌ વરદાયકઃ ॥ ૨૨॥

તં દૃષ્ટ્વા પ્રણતૌ દેવં પુનઃ પૂજ્ય યથાવિધિ ।
ગણેશાનં તુષ્ટુવિવ ભક્ત્યા નમ્રાત્મકન્ધરૌ ॥ ૨૩॥

અસિતવત્સરાવૂચતુઃ ।
લમ્બોદર નમસ્તુભ્યં સતતં યોગરૂપિણે ।
યોગાકારશરીરાય યોગશાન્તિપ્રદાયિને ॥ ૨૪॥

વિઘ્નેશાય મહાભક્તાનાં વિઘ્નહરણાય ચ ।
અભક્તાનાં મહાવિઘ્નકારિણે તે નમો નમઃ ॥ ૨૫॥

(Page ખં. ૫ અ. ૧૦ પાન ૨૧)
સ્વાનન્દવાસિને તુભ્યં સદા સ્વાનન્દદાયિને ।
મૂષકવાહનાયૈવ મૂષકધ્વજ વૈ નમઃ ॥ ૨૬॥

અનાથાય ગણેશાય સર્વેષાં નાથરૂપિણે ।
નાથાનાં નાથરૂપાય વિનાયક નમોઽસ્તુ તે ॥ ૨૭॥

હેરમ્બાય ચ સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠ તે નમઃ ॥ ૨૮॥

અમેયાયાઽપ્રેમયાયાઽનન્તખેલકરાય તે ।
અનન્તાનન્તરૂપાયાનન્તદાય નમો નમઃ ॥ ૨૯॥

સિદ્ધિબુદ્ધિપતે નાથ ભક્તસંરક્ષકાય ચ ।
નાનાશક્તિપ્રપાલાયાનન્તમાયાવિહારિણે ॥ ૩૦॥

ગજવક્ત્રાય સર્વેષામાદિપૂજ્યાય તે નમઃ ।
સર્વપૂજ્યાય સર્વેષાં સિદ્ધિદાય નમો નમઃ ॥ ૩૧॥

વક્રતુણ્ડાય વીરાય ચૈકદન્તાય તે નમઃ ।
મહોદરાય દેવાય દેવદેવેશ તે નમઃ ॥ ૩૨॥

અસુરાણાં સહાયાય નાનાવરપ્રદાય ચ ।
અસુરાણાં નિહન્ત્રે ત આસુરાય નમો નમઃ ॥ ૩૩॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મણાં બ્રહ્મવાદિને ।
બ્રહ્માકારાય વૈ ઢુણ્ઢે વેદવેદ્યાય તે નમઃ ॥ ૩૪॥

મનોવાણી વિહીનાય મનોવાણીમયાય ચ ।
યોગેશાય પરેશાય સર્વામયવિવર્જિત ॥ ૩૫॥

કિં સ્તુવસ્ત્વાં ગણાધીશ યત્ર શાન્તિં સમાગતાઃ ।
વેદા યોગીન્દ્રમુખ્યાશ્ચાસ્તુવન્તં પ્રણમાવહે ॥ ૩૬॥

એવં સ્તુતો ગણાધીશસ્તૌ જગાદ મહામુની ।
વરં સંવૃણુતં વિપ્રૌ દાસ્યામિ ભક્તિયન્ત્રિતઃ ॥ ૩૭॥

ભવદ્ભ્યાં યત્ કૃતં સ્તોત્રં તદેવ મે પ્રિયં ભવેત્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં તથા મદ્ભક્તિદાયકમ્ ॥ ૩૮॥

એવમુક્તૌ મહાયોગિનાવૂચતુર્ગજાનનમ્ ।
ભક્તિં દેહિ ગણાધ્યક્ષ ત્વત્પદે સુદૃઢાં પરામ્ ॥ ૩૯॥

ગાણપત્યપ્રિયત્વં નૌ દેહિ નાથ નમોઽસ્તુ તે ।
નાન્યં વરં ગણાધીશ વૃણુવઃ સુખદં કદા ॥ ૪૦॥

તથેતિ તાવુવાચાથ ગણેશોઽન્તર્દધે સ્વયમ્ ।
આવાં ભક્તિસમાયુક્તૌ ભજાવો ગણનાયકમ્ ॥ ૪૧॥

ઇતિ તે કથિતં વત્સ જ્ઞાનં ગણપતેર્મયા ।
શમદમપરો ભૂત્વા ભજ તં ગણનાયકમ્ ॥ ૪૨॥

એવમુક્ત્વાઽસિતસ્તં વૈ નૈધ્રુવં ગણપસ્ય સઃ ।
મન્ત્રં દદૌ પ્રજાનાથ તસ્માત્ એકાક્ષરં પુનઃ ॥ ૪૩॥

તતશ્ચાન્તર્હિતો યોગી સોઽસિતઃ પરમાર્થવિત્ ।
ગણેશં નૈધ્રુવસ્તેપે તપઃ સમ્પૂજ્ય યત્નતઃ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે વત્સરાઽસિતશાન્તિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૫.૧૦
(Page ખં. ૫ અ. ૧૧ પાન ૨૨)

## ૫.૧૧ લમ્બોદરબ્રહ્મવર્ણનં નામ એકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
નૈધ્રુવો યોગમાર્ગેણ શમદમપરાયણઃ ।
શાન્તિં પ્રાપ્તઃ ક્રમેણૈવ યોગિવન્દ્યો બભૂવ હ ॥ ૧॥

તતઃ સોઽપિ ગણાધીશં ન મુમોચ તતાપ સઃ ।
તપઃ સેવાપરો ભૂત્વા ગાણપત્યપ્રિયાર્થતઃ ॥ ૨॥

એવં તસ્ય તપો જ્ઞાત્વા તં યયૌ સ ગજાનનઃ ।
તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ કૃતાઞ્જલિઃ ॥ ૩॥

પુપૂજ ભક્તિસંયુક્તઃ સાશ્રુનેત્રો મહાયશાઃ ।
સરોમાઞ્ચઃ પ્રતુષ્ટાવ સૂક્તૈર્ગાણેશકૈઃ પ્રભુમ્ ॥ ૪॥

તતસ્તુષ્ટો ગણાધીશસ્તસ્મૈ ભક્તિં દદૌ દૃઢામ્ ।
ગાણપત્યપ્રિયં કૃત્વાંઽતર્ધાનં સ ચકાર વૈ ॥ ૫॥

તદાદિ નૈધ્રુવો યોગી ગાણપત્યો બભૂવ હ ।
ભજતે ગણનાથં સોઽધુના સર્વત્ર સમ્મતઃ ॥ ૬॥

ઇતિ તે કથિતં દક્ષ ચરિત્રં સર્વદં પરમ્ ।
લમ્બોદરસ્ય માહાત્મ્યં સર્વશાન્તિપ્રદં પ્રભો ॥ ૭॥

ક્રોધાસુરચરિત્રં તત્તથા તે કથિતં મયા ।
ન સંશયો ભવેત્તસ્મૈ શ્રવણાત્ ક્રોધશાન્તિદમ્ ॥ ૮॥

સ્વસ્વખણ્ડેષુ સર્વત્ર પશ્ચિમાન્તદિગન્તરે ।
મુનિભિઃ સ્થાપિતો લમ્બોદરશ્ચૈવ ગજાનનઃ ॥ ૯॥

તસ્ય દર્શનમાત્રેણ યથેપ્સિતફલં લભેત્ ।
સમુદ્રતીરસંસ્થસ્ય મૂષકારૂઢકસ્ય વૈ ॥ ૧૦॥

એવં લમ્બોદરસ્યાંશા અનન્તા વિવિધાઃ સ્મૃતાઃ ।
સ્વસ્વધર્મપ્રરક્ષાર્થં જનેભ્યઃ સર્વદાઃ પ્રભો ॥ ૧૧॥

તેષાં ચરિત્રકોટ્યંશો વક્તું નૈવ પ્રશક્યતે ।
બ્રહ્માદિભિર્મહાભાગ તત્ર કોઽહં નરાકૃતિઃ ॥ ૧૨॥

જગદ્બ્રહ્મક્રિયાર્થં સ યાચિતસ્તૈઃ પુરા પ્રભો ।
શક્તિરૂપાવતારં ચ ધૃત્વા સર્વાર્થદોઽભવત્ ॥ ૧૩॥

મહિષાસુરનાશાર્થં યાચિતો માયયા પુરા ।
વિઘ્નરાજઃ સ્વયં સોઽપિ બભૂવે ધર્મપાલકઃ ॥ ૧૪॥

માયાકરવિનાશાય શેષપુત્રો બભૂવ હ ।
લમ્બોદરઃ સ્વયં સાક્ષાત્ સ વૈ મૂષકગઃ સ્મૃતઃ ॥ ૧૫॥

સાવર્ણિમનુના ચૈવાઽઽરાધિતો ગણનાયકઃ ।
બભૂવ વૈ તત્ર લમ્બોદરઃ શક્તિવિનાયકઃ ॥ ૧૬॥

બ્રહ્મ નાનાવિધં વેદે કથિતં તુ પ્રજાપતે ।
જગત્તેષાં તથા ભિન્નં વિહારાર્થં બભૂવ હ ॥ ૧૭॥

તેષુ સ્વાનન્દભાવેન સ્થિતોઽયં બ્રહ્મધારકઃ ।
સંયોગાભેદયોગેન સ વૈ લમ્બોદરઃ સ્મૃતઃ ॥ ૧૮॥

સંયોગાભેદયોગેન સમાધિના પ્રજાપતે ।
નાનાવિધં જગદ્બ્રહ્મ ભવન્નશ્યતિ તદ્ગતમ્ ॥ ૧૯॥

તેષાં ભેદા ગણેશેન તથા સૃષ્ટાશ્ચ પાલિતાઃ ।
હૃતાસ્તેન સમાખ્યાતો વેદે સ બ્રહ્મવાચકઃ ॥ ૨૦॥

ભેદા અસત્યરૂપાશ્ચ તેષાં બ્રહ્મ પ્રકથ્યતે ।
શક્તિર્જાનીહિ તાં લમ્બોદરમેવ ગજાનનમ્ ॥ ૨૧॥

સમુત્પન્નાસ્તદુદરાદન્તે તત્ર ગતા બભુઃ ।
ભેદા લમ્બોદરસ્તેન સમાખ્યાતો હ્યસન્મયઃ ॥ ૨૨॥

ઇદં લમ્બોદરાऽऽખ્યાનં કથિતં તે પ્રજાપતે ।
શ્રવણાત્ પઠનાત્ સર્વદાયકં સર્વસમ્મતમ્ ॥ ૨૩॥

શ્રોતુમિચ્છસિ કિં ભૂયસ્તદ્વદસ્વ પ્રજાપતે ।
કથયિષ્યામિ તે ભાવં પ્રભો જ્ઞાત્વા ગણેશ્વરે ॥ ૨૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે લમ્બોદરબ્રહ્મવર્ણનં નામ એકાદશોऽધ્યાયઃ ॥ ૫.૧૧
(Page ખં. ૫ અ. ૧૨ પાન ૨૩)

## ૫.૧૨ શક્તિસ્વરૂપાવતારવર્ણનં નામ દ્વાદશોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
લમ્બોદરસ્ય માહાત્મ્યં ત્વં જાનાસિ સુખપ્રદમ્ ।
મુખામ્બુજાત્ સ્રવતિ ચ યસ્યૈવં શાન્તિદામૃતમ્ ॥ ૧॥

લમ્બોદરસ્ય માહાત્મ્યં શ્રુતં ક્રોધહરં પરમ્ ।
શ્રોતુમિચ્છા તથા મેऽપિ વર્ધતે ભાવસંયુતા ॥ ૨॥

અતો વદ મહાભાગ પુનર્વિઘ્નેશસત્કથામ્ ।
દક્ષેણ સંશ્રુતાં પુણ્યાં મુદ્ગલાદ્યોગસાગરાત્ ॥ ૩॥

સૂત ઉવાચ ।
મુને શૌનક ધન્યસ્ત્વં મહચ્છૃણુ કથામૃતમ્ ।
દક્ષેણ સંશ્રુતં પૂર્ણં મુદ્ગલેન પ્રભાષિતમ્ ॥ ૪॥

લમ્બોદરકથાં શ્રુત્વા હૃષ્ટરોમા પ્રજાપતિઃ ।
પ્રણમ્ય મુદ્ગલં વિપ્રમુવાચ વચનં હિતમ્ ॥ ૫॥

દક્ષ ઉવાચ ।
ધન્યોऽસિ યોગિવન્દ્યોऽસિ મુદ્ગલ ત્વં ન સંશયઃ ।
કથાં વદસિ કલ્યાણદાયિનીં હર્ષવર્ધિનીમ્ ॥ ૬॥

શ્રુત્વા શ્રુત્વા ન મે તૃપ્તિર્જાયતેऽમૃતસન્નિભામ્ ।
અધુના વદ યોગીન્દ્ર પુનર્ગણપતેઃ કથામ્ ॥ ૭॥

લમ્બોદરઃ કથં ચાયં શક્તિરૂપો બભૂવ હ ।
તસ્ય મુખ્યં ચરિત્રં મે વદ સર્વાર્થદાયકમ્ ॥ ૮॥

શક્ત્યા સંરાધિતો દેવો મહિષસ્ય વધાય ચ ।
કથં પ્રકટરૂપોઽસૌ બભૂવે તદ્વદસ્વ મે ॥ ૯॥

શેષપુત્રઃ કથં સાક્ષાદ્બભૂવ ગણનાયકઃ ।
માયાકરવિનાશાય કથં મૂષકગઃ સ્મૃતઃ ॥ ૧૦॥

સાવર્ણિમનુના ચૈવ કથમારાધિતોઽભવત્ ।
કથં શક્તિગણેશાનોઽવતારઃ પ્રબભૂવ હ ॥ ૧૧॥

એતત્સર્વં સુવિસ્તીર્ય વદ મે કરુણાનિધે ।
લમ્બોદરાવતારાશ્ચ સુખદાઃ શ્રવણાત્ પ્રભો ॥ ૧૨॥

અન્યત્ત્વં વદ યોગીન્દ્ર ગાણપત્યસ્વરૂપકમ્ ।
દીક્ષાયુક્તં વિશેષેણ કીદૃશો ગણપઃ સ્મૃતઃ ॥ ૧૩॥

પૂજા ગણપતેશ્ચૈવ કીદૃશી ક્રિયતે જનૈઃ ।
મન્ત્રઃ કેન પ્રકારેણ ગૃહ્યતે ગુરુવક્ત્રતઃ ॥ ૧૪॥

વિધિયુક્તં ગાણપત્યમાર્ગં મે વદ વિસ્તરાત્ ।
યેનાહં ગાણપત્યશ્ચ ભવિષ્યામિ સુદીક્ષયા ॥ ૧૫॥

ગાણપત્યાંશ્ચ યોગીન્દ્ર પ્રભો જ્ઞાસ્યામિ દૃષ્ટિગાન્ ।
તદર્થં વદ વિપ્રર્ષે સર્વજ્ઞોઽસિ ન સંશયઃ ॥ ૧૬॥

મહાભાગ્યેન તે વિપ્ર દર્શનં મેઽભવત્ કિલ ।
તવ પાદસ્ય વૈચિત્ર્યં સર્વસન્તોષકારકમ્ ॥ ૧૭॥

સૂત ઉવાચ ।
એવં પૃષ્ટો મહાયોગી દક્ષેણ ગણપપ્રિયઃ ।
જગાદ તં પ્રજાનાથં પુનર્ભાવેન તોષિતઃ ॥ ૧૮॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ દક્ષ ત્વં નાત્ર સંશયઃ ।
યેન પ્રીતિર્ગણપતાવદ્ભુતા તે પ્રજાપતે ॥ ૧૯॥

પ્રષ્ટુઃ શ્રોતુશ્ચ વક્તુર્વૈ પાવનીં સર્વદાં પરામ્ ।
ગણેશં કથયિષ્યામિ ભક્તિં દૃષ્ટ્વા સુતોષિતઃ ॥ ૨૦॥

આદૌ બ્રહ્મ ચ યત્ પ્રોક્તં તદેવ બ્રહ્મણિ સ્થિતમ્ ।
સ્વેચ્છા તત્ર સમુત્પન્ના માયા તસ્ય પ્રજાયતે ॥ ૨૧॥

સ્વેચ્છયા દ્વિવિધં જાતં તદેવાત્ર ન સંશયઃ ।
સ્વતઃ પરત ઉત્થાનાત્તચ્છૃણુષ્વ સુયોગદમ્ ॥ ૨૨॥

સદા સ્વસુખનિષ્ઠં વૈ નાનામાયાવિવર્જિતમ્ ।
તદ્વૈ પરત ઉત્થાનવાચકં કથિતં મયા ॥ ૨૩॥

માયાખેલકરં યચ્ચ બ્રહ્મ સ્વેચ્છામયં પ્રભો ।
સ્વત ઉત્થાનકં પ્રોક્તં પશ્ય વેદેષુ માનદ ॥ ૨૪॥

સ્વત ઉત્થાનકં બ્રહ્મ વિકલ્પં પ્રચકાર હ ।
વિકલ્પાત્તત્ દ્વિધા ભૂતમેકાનેકમયત્વતઃ ॥ ૨૫॥

એકં દેહિસ્વરૂપં તદ્બહુરૂપં શરીરકમ્ ।
તાભ્યાં ચતુર્વિધં સૃષ્ટં જગદેતચ્ચરાચરમ્ ॥ ૨૬॥

(Page ખં. ૫ અ. ૧૨ પાન ૨૪)
એતે બ્રહ્મગણાઃ સર્વે ક્રિયાસામર્થ્યહીનતઃ ।
ન શક્તાઃ સ્વસ્વકાર્યેષુ તપોયુક્તાસ્તતોઽભવન્ ॥ ૨૭॥

સ્વસ્વરૂપં ચ સર્વેષાં ભવેત્તુ કિલ યાદૃશમ્ ।
તાદૃશાય નમસ્તુભ્યં મન્ત્રં જેપુઃ પરેશ્વરાઃ ॥ ૨૮॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નો ગણનાયકઃ ।
નરકુઞ્જરરૂપઃ સ પ્રકટોઽભૂત્ હૃદિ પ્રભુઃ ॥ ૨૯॥

તં દૃષ્ટ્વા જ્ઞાનસમ્પન્ના જાતા બ્રહ્મગણાઃ પરમ્ ।
તતસ્તે ધ્યાનશીલાશ્ચ પુપૂજુર્હૃદિ સંસ્થિતમ્ ॥ ૩૦॥

તેષાં પુરઃ સ્વયં સાક્ષાત્ પ્રકટોઽભૂત્ પ્રજાપતે ।
શક્તિરૂપધરો ભૂત્વા પ્રસન્નો વરદાયકઃ ॥ ૩૧॥

ચતુર્બાહુધરા દેવી સર્વાવયવસંયુતા ।
સ્તનભારભરાક્રાન્તા શુશુભે પરમાત્મિકા ॥ ૩૨॥

તાં દૃષ્ટ્વા વિસ્મિતાઃ સર્વે પપ્રચ્છુઃ સ્વહિતે રતામ્ ।
કા ત્વં કસ્માદિહાયાતા વદ નઃ સકલં પરે ॥ ૩૩॥

શ્રીદેવ્યુવાચ ।

ગણેશોઽહં મહાભાગા યં ધ્યાયથ તપોન્વિતાઃ ।
તપસા તુષ્ટભાવેન વરદાતા સમાગતઃ ॥ ૩૪॥

એવમુક્ત્વા સ્વયં તત્ર શક્તિઃ સા પરમાદ્ભુતા ।
ગજવક્ત્રયુતં રૂપં દધે તેષાં પ્રપશ્યતામ્ ॥ ૩૫॥

લમ્બોદરં સમાલોક્ય પુનર્વિસ્મિતચેતસા ।
સ્તોત્રં તૈર્વૈ સમારબ્ધં તાવત્ સ્ત્રીરૂપમાદધે ॥ ૩૬॥

દૃષ્ટ્વા બ્રહ્મગણાસ્તાં તે વિસ્મિતા ગણપે રતાઃ ।
ગણેશકૃપયા સર્વે જ્ઞાનયુક્તા બભૂવિરે ॥ ૩૭॥

તતસ્તૈશ્ચેષ્ટિતં તસ્ય જ્ઞાતં ભક્ત્યા પ્રજાપતે ।
લમ્બોદરઃ સ્વયં શક્તિરૂપોઽયં નાત્ર સંશયઃ ॥ ૩૮॥

યા શક્તિઃ સ ગણેશાનો ગણેશઃ શક્તિરુચ્યતે ।
લમ્બોદરાત્મિકા સાક્ષાત્ સર્વેષાં જનની પરા ॥ ૩૯॥

તતસ્તાં તે પ્રણમ્યાદૌ તુષ્ટુવુઃકરસમ્પુટૈઃ ।
પ્રજાનાથ બ્રહ્મગણાઃ સરોમાઞ્ચા વિશેષતઃ ॥ ૪૦॥

બ્રહ્મગણા ઊચુઃ ।
નમસ્તે શક્તિરૂપાયૈ સર્વેષાં ચ ક્રિયાત્મને ।
સર્વસત્તાપ્રદાત્ર્યૈ તે જગદમ્બ નમોઽસ્તુ તે ॥ ૪૧॥

અપારાયૈ ચ સર્વેભ્યઃ સર્વદાયૈ નમો નમઃ ।
ભક્ત્યા સ્વાધીનરૂપાયૈ મહામાયે નમોઽસ્તુ તે ॥ ૪૨॥

સદા સ્વાનન્દસંસ્થાયૈ જગદ્બ્રહ્મપ્રચાલિકે ।
નાનાભેદધરાયૈ તે વિઘ્નેશાયૈ નમો નમઃ ॥ ૪૩॥

અમેયાયૈ નમસ્તુભ્યં ભક્તસંરક્ષરૂપિણિ ।
કર્ત્ર્યૈ પાત્ર્યૈ ચ સંહર્ત્ર્યૈ ગણેશાયૈ નમો નમઃ ॥ ૪૪॥

સમુત્પન્નં ત્વદુદરાત્ જગદ્બ્રહ્મ ન સંશયઃ ।
તદેવ સૃષ્ટિરૂપં ત ઉદરં તે નમો નમઃ ॥ ૪૫॥

સ્તનપાનેન દેવેશિ પોષણં કુરુષે સદા ।
સ્થિતિરૂપં તદેવાઙ્ગે સ્તનૌ તે વૈ નમો નમઃ ॥ ૪૬॥

અન્તે પ્રલયકાલઘ્ને ત્વયા ગ્રસ્તં મુખેન ચ ।

સંહારકં તદેવાઙ્ગે મુખં તે વૈ નમો નમઃ ॥ ૪૭॥

મનોવાણીવિહીના ત્વં ભક્તવત્સલભાવતઃ ।
સ્વયં દેહધરા જાતા ભક્તેશાયૈ નમો નમઃ ॥ ૪૮॥

કિં સ્તુમસ્ત્વાં મહામાયે શક્તિનામધરે પરે ।
સર્વત્ર શક્તભાવેષુ સંસ્થિતાયૈ નમો નમઃ ॥ ૪૯॥

વેદાનાં યોગિનાં ચૈવ શક્તત્વં તત્ત્વદીયકમ્ ।
ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદતસ્તે પ્રણમામહે ॥ ૫૦॥

ઇતિ સ્તુતા જગન્માતા બ્રહ્મણાં જનની પ્રભો ।
પ્રસન્ના તાનુવાચાઽથ ભક્તિભાવેન તોષિતા ॥ ૫૧॥

શક્તિરુવાચ ।
વરાન્ બ્રહ્માણિ વૃણુત યેષાં યે મનસીપ્સિતાઃ ।
(Page  ખં. ૫ અ. ૧૨ પાન ૨૫)
દાસ્યામિ તપસા તુષ્ટા ભક્ત્યા સ્તોત્રેણ સર્વપાઃ ॥ ૫૨॥

ભવત્કૃતં મદીયં યત્ સ્તોત્રં સર્વાર્થદં ભવેત્ ।
ભક્તિપ્રદં મહાભાગાઃ સર્વસામર્થ્યદાયકમ્ ॥ ૫૩॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૫૪॥

એવં શક્તેર્વચઃ શ્રુત્વા તાં બ્રહ્માણિ પ્રણમ્ય ચ ।
જગુઃ પ્રહૃષ્ટભાવેન તાં પરાં સર્વમાતરમ્ ॥ ૫૫॥

બ્રહ્માણ્યૂચુઃ ।
વરાન્ દાસ્યસિ સર્વેશિ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ શક્તે યયા મોહો નશ્યત્યત્ર ન સંશયઃ ॥ ૫૬॥

કિં કર્તવ્યં મહાદેવિ તત્ર સામર્થ્યમુત્તમમ્ ।
દેહ્યસ્મભ્યસ્તતો માતઃ કરિષ્યામશ્ચ તે પ્રિયમ્ ॥ ૫૭॥

તેષાં વચનમાકર્ણ્ય સન્તુષ્ટા સર્વદાયિની ।
તથેતિ તાન્યુવાચાથાંઽતર્ધાનં સા ચકાર હ ॥ ૫૮॥

તતો વરબલેનૈવ સૃષ્ટ્વા વિશ્વં ચરાચરમ્ ।
સ્વસ્વભોગપ્રદં ભિન્નં તેષુ ક્રીડન્તિ નિત્યદા ॥ ૫૯॥

પાલયન્તિ ચ વિશ્વાનિ સંહરન્તિ પ્રજાપતે ।
સ્વમહિમ્નિ સ્થિતાન્યેવ બ્રહ્માણ્યત્ર ન સંશયઃ ॥ ૬૦॥

ઇતિ તે કથિતશ્ચાયમવતારઃ પુરાતનઃ ।
લમ્બોદરસ્ય ભો દક્ષ શક્તિરૂપઃ સુખપ્રદઃ ॥ ૬૧॥

યઃ શ‍ૃણોતિ નરો ભક્ત્યા તસ્મૈ સર્વાર્થદો ભવેત્ ।
બ્રહ્મભૂતકરશ્ચાપિ ભુક્તિમુક્તિપ્રદઃ પરઃ ॥ ૬૨॥

સૂત ઉવાચ ।
શ્રુત્વા મુદ્ગલવાક્યં વૈ દક્ષો હૃષ્ટમનાઃ સ્વયમ્ ।
જગાદ તં પુનર્વિપ્ર શ‍ૃણુ સંશયસંયુતઃ ॥ ૬૩॥

દક્ષ ઉવાચ ।
ત્વયા મુદ્ગલ માહાત્મ્યં કથિતં શક્તિસમ્ભવમ્ ।
શ્રુતં મયા મહાભાગ તથાપિ નુદ સંશયમ્ ॥ ૬૪॥

બ્રહ્માણિ દેહહીનાનિ દેહિહીનાનિ યોગિપ ।
તપાદિકં તેષુ નાથ કથં ભવતિ તદ્વદ ॥ ૬૫॥

સાશ્રુનેત્રાદિકં સર્વં સ્તુતિપૂજાદિકં પ્રભો ।
કથં તેષુ ભવેદેતદ્ભ્રાન્તોઽહમધુના હ્યતઃ ॥ ૬૬॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષયુક્તો મહામુનિઃ ।
જગાદ તં પ્રજાનાથં સર્વજ્ઞાનાં શિરોમણિઃ ॥ ૬૭॥

મુદ્ગલ ઉવાચ ।
બ્રહ્માણિ બ્રહ્મભૂતાનિ તેષુ નાસ્તિ મહામતે ।
દેહદેહિમયો ભાવ ઇતિ સત્યં શ્રુતેર્મુખાત્ ॥ ૬૮॥

તથાપિ સર્વરૂપાણિ વદન્તે તાનિ નિશ્ચિતમ્ ।
દેહવિકારહીનાનિ દેહરૂપાણિ સર્વતઃ ॥ ૬૯॥

દેહિવિકારહીનાનિ દેહિરૂપાણિ સર્વતઃ ।
તાભ્યાં હીનાનિ ભો દક્ષ દ્વાભ્યાં વૈ સંયુતાનિ ચ ॥ ૭૦॥

બ્રહ્માણિ સર્વશાસ્ત્રેષુ વિચારય મહામતે ॥

અતઃ સર્વં સદા તેષુ સમ્ભવતિ ન સંશયઃ ॥ ૭૧॥

અન્યચ્ચ શ‍ૃણુ વાક્યં મે સર્વસંશયનાશનમ્ ।

બ્રહ્મણિ બ્રહ્મભાવશ્ચ વક્તું કેન ન શક્યતે ॥ ૭૨॥

સર્વં ભોગાદિકં તેષાં તપ આદિ મહામતે ।
કથનીયં કથં શાસ્ત્રૈર્દેહવદ્વર્ણ્યતે હ્યતઃ ॥ ૭૩॥

શિષ્યસ્ય બોધદાનાર્થં જાનીહિ ત્વં પ્રજાપતે ।
મા કુરુષ્વ વૃથા તત્ર સંશયં વા વિકારકમ્ ॥ ૭૪॥

સૂત ઉવાચ ।
મુદ્ગલસ્ય વચઃશ્રુત્વા હૃષ્ટો દક્ષસ્તમબ્રવીત્ ।
સંશયો મે ગતઃસ્વામિંસ્ત્વદુક્તવચસાઽધુના ॥ ૭૫॥

લમ્બોદરસ્ય માહાત્મ્યમધુના વદ માનદ ।
સર્વજ્ઞસ્ત્વમતો નિઃસંશયં સર્વં કરોષિ વૈ ॥ ૭૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શક્તિસ્વરૂપાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૫.૧૨

## ૫.૧૩ શક્તિવરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પુરા દૈત્યાધિપઃ ક્રૂરો બ્રહ્મણો વરદાનતઃ ।
મહિષાસુરનામાઽથ બભૂવ ભુવનાધિપઃ ॥ ૧॥

જિત્વા દેવગણાન્ સર્વાંસ્તથા સ્વર્ગેષુ દૈત્યપાન્ ।
સ્થાપયામાસ દુર્બુદ્ધિરવધ્યઃ સર્વભાવતઃ ॥ ૨॥

તતઃ કર્મવિહીનં વૈ ચકાર સ ધરાતલમ્ ।
અભવન્નમરાઃ સર્વે ઉપોષણપરાસ્તતઃ ॥ ૩॥

તતો દેવર્ષિભિસ્તત્ર તપસાઽઽરાધિતાઽભવત્ ।
શક્તિઃ સર્વમયી સાક્ષાદસત્સ્વાનન્દવાસિની ॥ ૪॥

પ્રગતેષુ સહસ્રે વૈ વર્ષેષુ પ્રકટાઽભવત્ ।
વરદાનૈર્વૃતા દેવી વધાય મહિષસ્ય સા ॥ ૫॥

પુરુષાત્તસ્ય ભવતિ ન ભયં મહિષસ્ય ચ ।
જિતા વયં મહાદેવિ રક્ષ નો મહતો ભયાત્ ॥ ૬॥

તસ્ય નાશં કુરુષ્વ ત્વં સર્વેષાં સુખકારણાત્ ।
પુત્રાસ્તે ચ વયં દેવિ રક્ષ રક્ષ મહાભયાત્ ॥ ૭॥

તથેતિ તાનુવાચૈવ સિંહગા ક્રોધસંયુતા ।
યયૌ દૈત્યવધાર્થં સા મહામાયા પ્રજાપતે ॥ ૮॥

સ્થિતા વનાન્તરે ધૃત્વા મોહિનીરૂપકં જગૌ ।
ગાનં રસયુતં શક્તિઃ શુશ્રુવે તત્ર કોઽસુરઃ ॥ ૯॥

સ આગત્ય મહાશક્તિં દૃષ્ટ્વા મોહયુતોઽભવત્ ।
ગત્વા દૈત્યાધિપં સદ્યઃ કથયામાસ વિસ્તરાત્ ॥ ૧૦॥

ન બ્રહ્માણ્ડે સમં કિઞ્ચિત્તયા રૂપેણ તેજસા ।
સ્ત્રીરત્નં તદ્વિજાનીહિ રાજ્યભોગિ ગૃહાણ ચ ॥ ૧૧॥

દૈત્યસ્ય વચનં શ્રુત્વા મોહયુક્તો મહાસુરઃ ।
પ્રધાનં પ્રેષયામાસ તાં સમાનેતુમાદરાત્ ॥ ૧૨॥

પ્રધાનેન મહામાયા દૃષ્ટા મોહવિવર્ધિની ।
મોહિતઃ સ ઉવાચાથ તાં સર્વાતિગરૂપિણીમ્ ॥ ૧૩॥

મહિષો દેવિ સર્વસ્ય બ્રહ્માણ્ડસ્ય પતિઃ પરઃ ।
મૃત્યુહીનઃ સદા યૌવનશાલી શોભયા યુતઃ ॥ ૧૪॥

તેનાઽહં પ્રેષિતો નૂનં ત્વદર્થં રૂપશાલિનિ ।
ભવ પત્ની મહાભાગે દૈત્યેશસ્ય મહાત્મનઃ ॥ ૧૫॥

તસ્ય તદ્વચનં શ્રુત્વા ક્રોધયુક્તા બભૂવ હ ।
જગાદ તં મદોત્સિક્તં દૈત્યામાત્યં પ્રજાપતે ॥ ૧૬॥

શક્તિરુવાચ ।
પરસ્યાઽહં મહાદૈત્ય સ્ત્રી કિં વદસિ માં વચઃ ।
મૂઢવત્ત્વાં હનિષ્યામિ પુનર્ભાષણસંયુતમ્ ॥ ૧૭॥

તસ્યાસ્તદ્વચનં શ્રુત્વા ક્રોધયુક્તો મહાસુરઃ ।
દૈત્યાનાજ્ઞાપયામાસ તાં સમાનેતુમાદરાત્ ॥ ૧૮॥

તદાજ્ઞયા મહાદૈત્યાઃ સમાજગ્મુઃ સમન્તતઃ ।
તાન્ દૃષ્ટ્વા ક્રોધસંયુક્તા સા બભૂવ યશસ્વિની ॥ ૧૯॥

ક્રોધાનલેન સર્વાન્ સા દદાહ ચ પ્રજાપતે ।

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં પપાલ સચિવો ભયાત્ ॥ ૨૦॥

જ્ઞાત્વા વૃત્તાન્તમુગ્રં સ મહિષો મોહસંયુતઃ ।
સ્વયં સૈન્યસમાયુક્ત આયયૌ તાં યશસ્વિનીમ્ ॥ ૨૧॥

તાં દૃષ્ટ્વા કામબાણૈઃ સ વિદ્ધો દૈત્યાધિપઃ સ્વયમ્ ।
સચિવાન્ પ્રેષયામાસ ધર્તું સમીપસંસ્થિતામ્ ॥ ૨૨॥

દેવ્યા શસ્ત્રપ્રહારેણ હતાઃ સર્વે પ્રજાપતે ।
તતોઽતિકોપસંયુક્તઃ સ્વયં રણસમાગતઃ ॥ ૨૩॥

સમાગતં મહાદૈત્યં દેવી ક્રોધસમન્વિતા ।
ધનુઃ સજ્જમથો કૃત્વા બાણાન્ ચિક્ષેપ દારુણાન્ ॥ ૨૪॥

તદ્બાણૈરપિ દૈત્યેશા મૃતાઃ કેચિદ્રણાજિરે ।
કેચિચ્છિન્નાસ્તથા કેચિન્ મૂર્ચ્છિતાઃ સમ્બભૂવિરે ॥ ૨૫॥

તતઃ કોપયુતો દૈત્યો મહિષાસુરસંજ્ઞિતઃ ।
(Page ખં. ૫ અ. ૧૩ પાન ૨૭)
યુયુધે તાં મહાભાગાં નાનાશસ્ત્રાસ્ત્રકૈઃ પરૈઃ ॥ ૨૬॥

યુદ્ધં તત્ર મહાઘોરં જાતં તદ્ભયદાયકમ્ ।
સર્વેષાં ચ પ્રજાનાથ પરસ્પરજયૈષિણોઃ ॥ ૨૭॥

એકવર્ષં મહાદૈત્યો યુયુધે ચ તયા પુરા ।
તતઃ કોપસમાયુક્તઃ પર્વતં ચિક્ષિપેઽસુરઃ ॥ ૨૮॥

પર્વતાઘાતમાત્રેણ મૂર્ચ્છિતાં જગદમ્બિકામ્ ।
તાદૃશીં તાં ગૃહીત્વા સ ગન્તું યાવન્મનો દધે ॥ ૨૯॥

તાવત્ સા સાવધાનાઽભૂત્ દૃષ્ટ્વા દૈત્યં મહાબલમ્ ।
અન્તર્ધાય સ્વમાત્માનં યયૌ દેવી હિમાલયમ્ ॥ ૩૦॥

તત્ર ખેદસમાયુક્તા સા ચેતસિ દધાર હ ।
અહોઽહં મનસા સર્વં ભસ્મ કુર્યાં ક્ષણાર્ધતઃ ॥ ૩૧॥

સ્ત્રીહસ્તેન મહાદૈત્યો મરિષ્યતિ ન સંશયઃ ।
તથાઽપિ માં જિગાયૈવ યશોયુક્તોઽભવત્ કથમ્ ॥ ૩૨॥

અતો વિઘ્નેશ્વરેણૈવ કૃતો વિઘ્નો ન સંશયઃ ।
ભ્રાન્તાઽહં તમપૂજ્યાઽઽદૌ ગતા સઙ્ગ્રામમણ્ડલે ॥ ૩૩॥

અહો શક્તિસ્વરૂપાઽહં મચ્છક્ત્યા વર્તતેઽખિલમ્ ।
જિતા શક્તિવિહીના ચ જાતા કૌતુકમુત્તમમ્ ॥ ૩૪॥

અતઃ શક્તિરશક્તત્વં મમાધીનં ન વર્તતે ।
વિઘ્નરાજસ્ય સત્તા યા સત્યા સાઽન્યત્ર ભ્રાન્તિજા ॥ ૩૫॥

યદા ગણેશ્વરસ્તુષ્ટસ્તદા જીવા મહેશ્વરાઃ ।
બ્રહ્માણિ શક્તિરૂપાણિ શક્તં નાન્યત્ કદાચન ॥ ૩૬॥

એવં મનસિ સન્ધાર્ય સતી સન્તાપસંયુતા ।
ત્યક્ત્વા સર્વં તપસ્તેપે નિરાહારપરાયણા ॥ ૩૭॥

વિન્ધ્યાચલં સમાસાદ્ય સંસ્થિતા જગદમ્બિકા ।
વિઘ્નરાજં હૃદિ ધ્યાત્વા જજાપ મન્ત્રમુત્તમમ્ ॥ ૩૮॥

એવં વર્ષસહસ્રેણૈકાક્ષરં વિધિના તથા ।
તપસોગ્રેણ વિઘ્નેશઃ સન્તુષ્ટસ્તાં યયૌ પરમ્ ॥ ૩૯॥

અસ્થિચર્માવશેષાં તાં વીક્ષ્ય વિસ્મિતમાનસઃ ।
બોધયામાસ શક્તિં સ વિઘ્નેશઃ કરુણાનિધિઃ ॥ ૪૦॥

વિઘ્નેશ ઉવાચ ।
પશ્ય શક્તે ચ માં પ્રાપ્તં યં ધ્યાયસિ નિરન્તરમ્ ।
વરં દાતું વૃણુષ્વ ત્વં દાસ્યામિ ભક્તિયન્ત્રિતઃ ॥ ૪૧॥

ભક્ત્યા ચ તપસા દેવિ સન્તુષ્ટં તે વિશેષતઃ ।
તવાધીનં ન સન્દેહઃ પશ્ય માં વરદાયિનમ્ ॥ ૪૨॥

તસ્ય તદ્વચનં શ્રુત્વા જગદમ્બા બુબોધ ચ ।
અપશ્યદ્ગણરાજં તમુત્થાય પ્રણનામ સા ॥ ૪૩॥

પુપૂજ ભક્તિસંયુક્તા તુષ્ટાવ કરસમ્પુટૈઃ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૪॥

શક્તિરુવાચ ।
વિઘ્નેશાય નમસ્તુભ્યં ભક્તવિઘ્નવિનાશિને ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૪૫॥

ગણેશાય ગણાનાં વૈ પાલકાય પરાત્મને ।

ગુણરૂપાય સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૪૬॥

અમેયશક્તયે ચૈવામેયમાયાપ્રચાલક ।
માયાહીનસ્વરૂપાય માયિભ્યો મોહદાયિને ॥ ૪૭॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે તે બ્રહ્મણસ્પતયે નમઃ ।
બ્રહ્મણે બ્રહ્મરૂપાય હેરમ્બાય નમો નમઃ ॥ ૪૮॥

કર્મણાં ફલદાત્રે તે કર્મણાં કર્મધારક ।
કર્મયોગસ્વરૂપાય પરેશાય નમો નમઃ ॥ ૪૯॥

જ્ઞાનાનાં જ્ઞાનરૂપાય જ્ઞાનિનાં જ્ઞાનધારિણે ।
સદા જ્ઞાનવિહીનાય જ્ઞાનયોગાય તે નમઃ ॥ ૫૦॥

સમાય ચ સ્વરૂપાય સમેભ્યઃ સામ્યદાય તે ।
(Page ખં. ૫ અ. ૧૩ પાન ૨૮)
આનન્દાનન્દકન્દાય સમહીનાય તે નમઃ ॥ ૫૧॥

સહજાય વિહીનાય સહજૈઃ સહજાત્મને ।
સહજાનાં તુ યોગાય નિર્મોહાય નમો નમઃ ॥ ૫૨॥

સ્વાનન્દાય સદા સ્વાનન્દાનાં સ્વાનન્દમૂર્તયે ।
માયાયુક્તાય દેવેશ સર્વાધીશાય તે નમઃ ॥ ૫૩॥

અયોગાય સદા બ્રહ્મનિવૃત્તિં ધારિણે નમઃ ।
અસમ્પ્રજ્ઞાતભાવાય લમ્બોદર નમો નમઃ ॥ ૫૪॥

શાન્તિરૂપાય યોગાય યોગેભ્યો યોગદાય તે ।
ચિત્તભૂમિવિહીનાય નમશ્ચિન્તામણે નમઃ ॥ ૫૫॥

ક્ષમાપરાધકં નાથ વિસ્મૃત્યા ભ્રમસંયુતા ।
અપ્રપૂજ્ય ગણાધીશ ગતા યોદ્ધું પરાત્પરમ્ ॥ ૫૬॥

અધુના મે વરં દેહિ ત્વત્પાદરસદાયકમ્ ।
મહાભક્તિપ્રદં નાથ યેનાઽહં તોષિતા ત્વયા ॥ ૫૭॥

જયં દેહિ ગણાધીશ મહિષસ્ય વધાય વૈ ।
રતાયૈ દેવદેવેશ નમસ્તે પરમેશ્વર ॥ ૫૮॥

એવં તસ્યાઃ સંસ્તુવત્યા ભક્ત્યા રસસમુદ્ભવઃ ।
તેન યુક્તા નનર્તૈવ સાશ્રુનેત્રા પ્રજાપતે ॥ ૫૯॥

લમ્બોદરસ્તાદૃશીં સ નિરીક્ષ્યૈવ જગાદ તામ્ ।
ત્વયા યદ્યાચિતં દેવિ તત્ સર્વં સફલં ભવેત્ ॥ ૬૦॥

ત્વયા કૃતમિદં સ્તોત્રં ભવેદ્ ભક્તિરસપ્રદમ્ ।
અપરાધસ્ય દેવેશિ સહને કારણં મયિ ॥ ૬૧॥

ભુક્તિં મુક્તિં પ્રદાસ્યામિ સ્તોત્રેણાઽહં હિ સંસ્તુતઃ ।
યં યં ચિન્તયસે કામં તં તં દાસ્યામિ નિશ્ચિતમ્ ॥ ૬૨॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
શક્તિઃ ખિન્નેવ તત્રૈવ સંસ્થિતા ધ્યાનસંયુતા ॥ ૬૩॥

સ્થાપયામાસ મૂર્તિં સા બ્રાહ્મણૈર્વેદપારગૈઃ ।
પૂજયામાસ તાં તત્ર તતો યોદ્ધું સમાગતા ॥ ૬૪॥

તદાદિ ગણરાજસ્ય સ્થાનં તત્ પપ્રથે ભુવિ ।
સર્વસિદ્ધિકરં પૂર્ણં યાત્રાકારિ જનસ્ય ચ ॥ ૬૫॥

બ્રહ્મભૂયપ્રદં પૂર્ણં તત્રૈવ મરણે સતિ ।
વિઘ્નેશ્વરસ્ય દક્ષૈતદ્ બભૂવે સર્વદા પ્રિયમ્ ॥ ૬૬॥

મહિષાસુરકં દેવી જઘાન વરદાનતઃ ।
યુદ્ધં કૃત્વા મહાઘોરં જગદ્રક્ષણલાલસા ॥ ૬૭॥

પુનઃ સમાગતા દેવી વિઘ્નેશક્ષેત્રકે પ્રભો ।
તત્ર નિત્યં મહાભક્ત્યા ભજતે ગણનાયકમ્ ॥ ૬૮॥

ઇદં લમ્બોદરસ્યૈવ ચરિત્રં સર્વદં પરમ્ ।
યઃ શૃણોતિ નરો ભક્ત્યા પઠેદ્વા તસ્ય સમ્ભવેત્ ॥ ૬૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શક્તિવરપ્રદાનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૫.૧૩
(Page ખં. ૫ અ. ૧૪ પાન ૨૯)

## ૫.૧૪ શિવવિષ્ણુગર્વહરણં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

અન્યચ્છૃણુ મહાભાગ લમ્બોદરચરિત્રકમ્ ।
શક્ત્યધીનસ્વભાવાખ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

એકદા મિલિતા દેવાઃ સર્વે તત્ર પ્રજાપતે ।
વિન્ધ્યે દેશે મહાક્ષેત્રે યાત્રાર્થં ગણપસ્ય ચ ॥ ૨॥

તત્ર વાદઃ સમુત્પન્નો મુનીનાં સર્વસન્નિધૌ ।
પઞ્ચ દેવાઃ સમાનાશ્ચ સગુણા નિર્ગુણા મતાઃ ॥ ૩॥

કથં વિઘ્નેશ્વરો દેવઃ સર્વપૂજ્યો બભૂવ હ ।
સર્વાદૌ પૂજનીયઃ સ ચતુર્ભિરપિ નિશ્ચિતમ્ ॥ ૪॥

અન્યદેવસ્ય ભક્તૈશ્ચેષ્ટદેવાદૌ ગજાનનઃ ।
પૂજનીયઃ પ્રયત્નેન કિમિદં વિપરીતકમ્ ॥ ૫॥

ગણેશોચ્છિષ્ટભોક્તારો દેવા વિષ્ણુશિવાદયઃ ।
ઇદં કિં વેદવાદેષુ કથિતમાદિપૂજ્યતઃ ॥ ૬॥

યથા દેવાશ્ચ ચત્વારસ્તથાઽયં ગણનાયકઃ ।
સ્વસ્વભક્તવિધાનેન પૂજનીયો યદા ભવેત્ ॥ ૭॥

તદા સર્વં સમીચીનં સ્વસ્વમાર્ગપરં ભવેત્ ।
શુભાશુભે ગણાધીશઃ સર્વાદૌ સમ્મતઃ કથમ્ ॥ ૮॥

ઇતિ પ્રાપ્તે વિવાદે તુ શક્તિઃ ક્રોધસમન્વિતા ।
જગાદ તાન્ મુનીન્ સર્વાન્ દેવાંસ્તદ્ધિતકામ્યયા ॥ ૯॥

શક્તિરુવાચ ।
લમ્બોદરોઽયમેકશ્ચ વેદે સઙ્કથિતોઽભવત્ ।
ન વયં તાદૃશા વિપ્રા લમ્બોદરપ્રવાચકાઃ ॥ ૧૦॥

તસ્યોદરાત્ સમુત્પન્નં નાના વિશ્વં ન સંશયઃ ।
નાના બ્રહ્મ તથેશાશ્ચ તત્રાન્તે સંસ્થિતા બભુઃ ॥ ૧૧॥

મધ્યે કલાંશરૂપેણ ક્રીડતે ગણનાયકઃ ।
અતઃ સર્વાદિપૂજ્યઃ સ સર્વપૂજ્યો બભૂવ હ ॥ ૧૨॥

સર્વેષાં જનકો માતા તથા સર્વપ્રદાયકઃ ।
તત્ર કિં સંશયં વિપ્રાઃ કુરુથ બ્રહ્મણસ્પતૌ ॥ ૧૩॥

તસ્યાસ્તદ્વચનં શ્રુત્વા જગદમ્બામુવાચ હ ।

શઙ્કરઃ ક્રોધસંયુક્તસ્તથા વિષ્ણુશ્ચ માનદ ॥ ૧૪॥

શિવવિષ્ણૂ ઊચતુઃ ।
કિં શક્તે વદસિ પ્રેમ્ણા ગણેશે ભક્તિભાવિતા ।
વયં પઞ્ચ સમાનાશ્ચ તત્રાધિક્યં ન વિદ્યતે ॥ ૧૫॥

પરસ્પરં ચ દેવેશિ ભાવયામો ન સંશયઃ ।
આધિક્યં તેન કિં દેવે કત્થસે ત્વં ગણેશ્વરે ॥ ૧૬॥

યદિ લમ્બોદરશ્ચાયમેકો દેવો ન સંશયઃ ।
તસ્યોદરાત્ સમુત્પન્ના વયં સર્વે સુનિશ્ચિતમ્ ॥ ૧૭॥

તદાધારાસ્તથાઽન્તે વૈ તત્ર લીના ભવામહે ।
તદા વયં સૃજામશ્ચ જગદ્બ્રહ્મ કથં વદ ॥ ૧૮॥

પાલયામો હરામશ્ચાધિકં ભવતિ કિં મહઃ ।
તથાપિ વેદવાદેષુ વયં લમ્બોદરા નહિ ॥ ૧૯॥

અતો લમ્બોદરસ્યાદૌ સામર્થ્યં કીદૃશં મહત્ ।
પશ્યામસ્ત્વત્સન્નિધાને પશ્ચાત્તં પ્રભજામહે ॥ ૨૦॥

યદાધિક્યં પ્રપશ્યામસ્તદા સર્વાદિપૂજ્યકમ્ ।
સર્વપૂજ્યં કરિષ્યામો નાન્યથા દેવિ નિશ્ચિતમ્ ॥ ૨૧॥

તતઃ શિવશ્ચ વિષ્ણુશ્ચ કલ્પયિત્વા હ્યપારકમ્ ।
નૈવેદ્યં સત્યસઙ્કલ્પૌ પૂજાયાં સંસ્થિતૌ પરૌ ॥ ૨૨॥

એકકાલસમાવિષ્ટાવાવાહ્ય ગણનાયકમ્ ।
પુપૂજતુર્મહાભક્ત્યા છલધર્મસ્વરૂપયા ॥ ૨૩॥

ગણેશ્વરસ્તત્ર સાક્ષાત્ સમાયાતઃ પ્રજાપતે ।
દૃષ્ટ્વાઽપારં સ નૈવેદ્યં વિસ્મિતોઽભૂત્ સ્વેચેતસિ ॥ ૨૪॥

ધ્યાનેનાલોક્ય વિઘ્નેશો જ્ઞાત્વા તયોર્હૃદિ સ્થિતમ્ ।
સત્યસઙ્કલ્પરૂપાં તાં સિદ્ધિમાકૃષ્ય સંસ્થિતઃ ॥ ૨૫॥

સિદ્ધિહીનૌ વિષ્ણુશિવૌ પૂજાયાં નિરતૌ મુદા ।
(Page ખં. ૫ અ. ૧૪ પાન ૩૦)
નૈવેદ્યં ગણરાજાય દદતુઃ પરમં તતઃ ॥ ૨૬॥

એકગ્રાસેન નૈવેદ્યમપારં ગણનાયકઃ ।

બભક્ષ પુનરૂચે તૌ ક્ષુધિતોઽહં વિશેષતઃ ॥ ૨૭॥

તસ્ય તદ્વચનં શ્રુત્વા શિવો વિષ્ણુઃ પુનઃ પ્રભૂ ।
નૈવેદ્યં સત્યસઙ્કલ્પાત્ કલ્પયામાસતુઃ પુરઃ ॥ ૨૮॥

તથાપિ ન ચ નૈવેદ્યં બભૂવાણુસ્વરૂપકમ્ ।
તેન ખેદસમાયુક્તૌ પરસ્પરમથોચતુઃ ॥ ૨૯॥

સત્યસઙ્કલ્પરૂપં યદૈશ્વર્યં ક્વ ગતં પરમ્ ।
આવાં નરસમૌ જાતૌ કિં ભવિષ્યતિ દૈવતઃ ॥ ૩૦॥

બ્રહ્માણામીશ્વરાણાં ચ મહત્ બ્રહ્મત્વમૈશ્વરમ્ ।
સત્યસઙ્કલ્પભાવાખ્યં તેન હીના નરાઃ સ્મૃતાઃ ॥ ૩૧॥

અધુના કિં કરિષ્યાવો જીવતુલ્યૌ ન સંશયઃ ।
અયં લમ્બોદરઃ ક્રોધાન્નરકે પાતયિષ્યતિ ॥ ૩૨॥

અથવા મૃત્યુલોકે વૈ નિશ્ચિતં ભયમાગતમ્ ।
કં યાવઃ શરણં નાથં છલનાયાં પરાયણૌ ॥ ૩૩॥

શક્ત્યા સમ્બોધિતં પૂર્વં તત્રાજ્ઞાનસમન્વિતૌ ।
વાદં કૃત્વા મહાવિઘ્નમાવાભ્યાં પ્રકટીકૃતમ્ ॥ ૩૪॥

અધુના શરણં શ્રેષ્ઠં શુભદં પ્રભવિષ્યતિ ।
ગણેશશ્ચ વિશેષેણ બ્રહ્મનાયક એવ સઃ ॥ ૩૫॥

તતસ્તૌ ભક્ષિતું તત્ર ક્રોધયુક્તો ગજાનનઃ ।
બભૂવાદ્ભુતરૂપશ્ચ દૃષ્ટ્વા તં સમ્પ્રપેલતુઃ ॥ ૩૬॥

શક્તેશ્ચરણમાસાદ્ય પેતતુર્ભયવિહ્વલૌ ।
તતઃ સા તૌ સમાશ્વાસ્યાગૃહ્ય દૂર્વાં તમાયયૌ ॥ ૩૭॥

પ્રણમ્ય ગણનાથં સોવાચ કૃત્વા કરાઞ્જલિમ્ ।
હૃષ્ટરોમા ચ સર્વેશી ભક્તિનમ્રાત્મકન્ધરા ॥ ૩૮॥

શક્તિરુવાચ ।
ક્ષમાપરાધમત્યુગ્રં દેવદેવેશ તે નમઃ ।
ત્વન્માયાગર્વસંયુક્તયોર્વિષ્ણુશિવયોઃ પ્રભો ॥ ૩૯॥

સમુત્પન્નૌ ત્વદુદરાદ્ બાલભાવધરૌ તથા ।
શિવવિષ્ણુગણેશાનતયોર્દણ્ડં ચ મા કુરુ ॥ ૪૦॥

સર્વેષાં પોષણે સ્વામિંસ્ત્વં શક્તો નાત્ર સંશયઃ ।
ત્વદીયપોષણં પૂર્ણં ત્વમેવ કુરુષે સદા ॥ ૪૧॥

એવમુક્ત્વા મહામાયા તસ્મૈ દૂર્વાઙ્કુરં દદૌ ।
મનસા કલ્પયામાસાન્નં ચતુર્વિધમુત્તમમ્ ॥ ૪૨॥

તતો દૂર્વાઙ્કુરેણૈવ તૃપ્તોઽભૂદ્ગણનાયકઃ ।
મહાભક્તિં દદૌ તસ્યૈ શક્તયે ભક્તવત્સલઃ ॥ ૪૩॥

પ્રસન્નં તં ગણાધીશં દૃષ્ટ્વા તત્ર સમાયયૌ ।
હરિશ્ચ શઙ્કરો દેવઃ પ્રણમ્ય પ્રોચતુર્વચઃ ॥ ૪૪॥

ક્ષમાપરાધમુગ્રં નૌ ગણાધીશ વિશેષતઃ ।
ત્વન્માયયા મોહિતયોઃ સદા સ્વાનન્દદાયક ॥ ૪૫॥

અધુના તે સ્વરૂપં યજ્જ્ઞાતં પૂર્ણં મહાપ્રભો ।
સર્વાદિપૂજ્ય એકસ્ત્વં સર્વપૂજ્યો યથાતથમ્ ॥ ૪૬॥

એવમુક્ત્વા તુષ્ટુવતુર્ગણેશાનં મહેશ્વરૌ ।
અથર્વશિરસા ભક્ત્યા સન્તુષ્ટઃ સ તતોઽભવત્ ॥ ૪૭॥

શક્ત્યા સમ્પ્રાર્થિતસ્તત્ર ભાવયુક્તેન ચેતસા ।
યથાપૂર્વં શિવો વિષ્ણુસ્તાદૃશૌ સ ચકાર હ ॥ ૪૮॥

સઙ્કલ્પસિદ્ધિસંયુક્તૌ સમ્બભૂવતુરીશ્વરૌ ।
સદા ભક્તિસમાયુક્તૌ ભજતો ગણનાયકમ્ ॥ ૪૯॥

સંશયેન વિહીનાશ્ચ જાતા દેવર્ષયો જનાઃ ।
પૂર્ણભાવયુતં ઢુણ્ઢિમભજંસ્તે વિમત્સરાઃ ॥ ૫૦॥

ન ગણેશાત્ પરં કિઞ્ચિત્તસ્માદાદૌ ગણેશ્વરઃ ।
અન્તે સોઽપિ ન સન્દેહો મધ્યે નાનાવિધઃ સ્મૃતઃ ॥ ૫૧॥

સર્વેષાં બીજરૂપોઽયમતઃ સર્વાદિપૂજ્યકઃ ।
(Page ખં. ૫ અ. ૧૫ પાન ૩૧)
સર્વપૂજ્યો ગણેશાનો વેદેષુ કથિતોઽભવત્ ॥ ૫૨॥

ગાણપત્યસ્વભાવસ્થા બભૂવુર્મુનયોઽમલાઃ ।
યત્ર તત્ર ગણેશાનં ભજન્તે તેઽધુના પ્રભુમ્ ॥ ૫૩॥

એતલ્લમ્બોદરસ્યૈવ ચરિત્રં યઃ શ‍ૃણોતિ વા ।
પઠતે તસ્ય વિઘ્નેશઃ સર્વદઃ પ્રભવિષ્યતિ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શિવવિષ્ણુગર્વહરણં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૫.૧૪

## ૫.૧૫ શક્તિવિનાયકમાહાત્મ્યે પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
સુરથો નામ રાજર્ષિઃ પ્રધાનૈર્નયવર્જિતૈઃ ।
બલિષ્ઠૈઃ પીડિતોઽત્યન્તં રાજ્યં ત્યક્ત્વા વનં યયૌ ॥ ૧॥

તત્ર મુનિવરેણૈવોપદિષ્ટઃ શક્તિમાભજત્ ।
તસ્યાશ્ચ કૃપયા રાજા સમર્થઃ પ્રબભૂવ હ ॥ ૨॥

સ્વરાજ્યં પ્રાપ્ય રાજર્ષિશ્ચક્રે તદ્ધર્મસંયુતઃ ।
અભજચ્છક્તિમત્યન્તં ભાવયુક્તેન ચેતસા ॥ ૩॥

તતો મૃતઃ પુનઃ સોઽપિ સાવર્ણિશ્ચ બભૂવ હ ।
મનુર્ભાનુસુતો દક્ષ સર્વમાન્ય ઉદારધીઃ ॥ ૪॥

પૂર્વસંસ્કારયોગેન શક્તિભક્તો બભૂવ હ ।
વને ગત્વા મહાશક્તિં પૂજયામાસ નિત્યદા ॥ ૫॥

ઉપોષણસમાયુક્તસ્તતાપ તપ ઉત્તમમ્ ।
ધ્યાત્વા હૃદિ મહામાયાં નવાર્ણજપકારકઃ ॥ ૬॥

માહાત્મ્યમપઠન્નિત્યં શક્ત્યા ભક્તિસમન્વિતઃ ।
એવં વર્ષશતે પૂર્ણે પ્રસન્નાઽભૂન્ મહાસતી ॥ ૭॥

અન્તે તત્તપસા યુક્તં જ્ઞાનમાર્ગપરાયણમ્ ।
જ્ઞાત્વા લમ્બોદરસ્તત્ર વરદાતા સમાયયૌ ॥ ૮॥

હૃદિ તસ્ય સ્થિતં ધ્યાનં શક્તેસ્તત્ર ગણેશ્વરઃ ।
શુશુભે રક્તવર્ણાભો દૃષ્ટ્વા તં સોઽપિ વિસ્મિતઃ ॥ ૯॥

તતઃ શક્તિસ્વરૂપં સ દદર્શ પુનરઞ્જસા ।
પુનર્લમ્બોદરં દેવં પુનઃ શક્તિયુતં પ્રભુમ્ ॥ ૧૦॥

વામાઙ્ગે સંસ્થિતાં શક્તિં હાવભાવસમન્વિતામ્ ।
ભક્તિયુક્તાં ગણેશસ્ય તતોઽતિવિસ્મિતોઽભવત્ ॥ ૧૧॥

લમ્બોદરાર્થજં દક્ષ શક્તેશ્ચ કૃપયા મહત્ ।
જ્ઞાનં પ્રકટરૂપં તદ્બભૂવ હૃદયે મનોઃ ॥ ૧૨॥

તતો મનુર્વિશેષેણ ભક્તિયુક્તો હૃદિ સ્વયમ્ ।
વિચારમકરોત્ પૂર્ણં તચ્છૃણુ ત્વં પ્રજાપતે ॥ ૧૩॥

લમ્બોદરઃ સ્વયં શક્તિઃ શક્તિર્લમ્બોદરાત્મિકા ।
શક્તેર્લમ્બોદરસ્યૈવ નાન્તરં વિદ્યતે કદા ॥ ૧૪॥

શક્તિર્વામાઙ્ગસમ્ભૂતા દક્ષિણાઙ્ગાદ્ગણેશ્વરઃ ।
તયોરભેદભાવે યદ્બ્રહ્મ સ્વાનન્દસંજ્ઞકમ્ ॥ ૧૫॥

ક્રીડાર્થં ભક્તરક્ષાર્થં દેહાકૃતિધરાવિમૌ ।
બભૂવતુર્ન સન્દેહસ્તતઃ સર્વમિદં બભૌ ॥ ૧૬॥

એવં વિચારયુક્તઃ સ મનુર્યાવત્ પ્રતાપવાન્ ।
તાવત્તૌ બહિરાયાતૌ વરદૌ ચ પ્રજાપતે ॥ ૧૭॥

હૃદિ સંસ્થૌ વિસ્મિતઃ સ ક્વ ગતૌ શક્તિવિઘ્નપૌ ।
પુનર્ધ્યાનબલેનૈવ ચિન્તયામાસ ભૂમિપઃ ॥ ૧૮॥

(Page ખં. ૫ અ. ૧૫ પાન ૩૨)
તતસ્તં તાવૂચતુશ્ચ વરં વરય સુવ્રત ।
તપસા ભક્તિભાવેન તુષ્ટૌ દાસ્યાવહે મુને ॥ ૧૯॥

તયોર્વચનમાકર્ણ્યોન્મીલ્યાઽપશ્યદ્બહિર્મનુઃ ।
દૃષ્ટ્વા શક્તિયુતં દેવં પ્રણનામ મુદાયુતઃ ॥ ૨૦॥

પૂજયિત્વા વિધાનેન તુષ્ટાવ ભક્તિસંયુતઃ ।
પ્રણમ્ય તૌ પુનર્દેવૌ કૃત્વા કરપુટં વિધે ॥ ૨૧॥

સાવર્ણિરુવાચ ।
નમસ્તે ગણનાથાયૈ નમસ્તે ગણપાલક ।
ચતુર્બાહુધરાયૈવ ચતુર્બાહુધરાય તે ॥ ૨૨॥

અનાદ્યાયૈ હ્યનાદ્યાય પરેશાયૈ પરાત્મને ।
ભક્તવિઘ્નહરાયૈ તે ભક્તવિઘ્નહરાય ચ ॥ ૨૩॥

હેરમ્બાયૈ નમસ્તુભ્યં હેરમ્બાય નમો નમઃ ।
લમ્બોદરસ્વરૂપાયૈ નમો લમ્બોદરાય તે ॥ ૨૪॥

નાનારૂપધરાયૈવ નાનારૂપધરાય ચ ।
નમો નમો મહાદેવ્યૈ દેવાધિપતયે નમઃ ॥ ૨૫॥

ગજવક્ત્રધરાયૈ તે ગજવક્ત્રધરાય ચ ।
શૂર્પકર્ણસ્વરૂપાયૈ શૂર્પકર્ણાય તે નમઃ ॥ ૨૬॥

એકદન્તધરાયૈ ચૈકદન્તરૂપિણે નમઃ ।
માયામોહહરાયૈવ મોહહર્ત્રે નમો નમઃ ॥ ૨૭॥

સ્વાનન્દપુરસંસ્થાયૈ નમઃ સ્વાનન્દવાસિને ।
પરશ્વાદિધરાયૈ ચ પરશ્વાદિધરાય તે ॥ ૨૮॥

નમઃ સર્વપ્રબોધાયૈ નમઃ સર્વપ્રબોધક ।
માયિભ્યો મોહદાત્ર્યૈ તે માયિભ્યો મોહદાય ચ ॥ ૨૯॥

ઢુણ્ઢિરાજ્ઞ્યૈ નમસ્તુભ્યં ઢુણ્ઢિરાજાય તે નમઃ ।
વક્રતુણ્ડધરાયૈ તે વક્રતુણ્ડાય તે નમઃ ॥ ૩૦॥

સર્વાદિપૂજ્યકાયૈ ચ સર્વાદિપૂજ્યકાય તે ।
નમસ્તે સર્વપૂજ્યાયૈ સર્વપૂજ્યાય તે નમઃ ॥ ૩૧॥

અનન્તખેલકારિણ્યૈ હ્યનન્તખેલકારિણે ।
નમો નમો મહાશક્ત્યે નમઃ શક્તિધરાય તે ॥ ૩૨॥

નાનાભેદકરાયૈ તે નાનાભેદમયાય ચ ।
નમો નમઃ પરેશાયૈ પરેશાય નમો નમઃ ॥ ૩૩॥

યા શક્તિઃ સૈવ વિઘ્નેશો નાન્તરં વિદ્યતે ક્વચિત્ ।
અજ્ઞાનેન મહાભાગૌ સ્ત્રીપુમ્ભાવઃ પ્રદૃશ્યતે ॥ ૩૪॥

યત્ર વેદાદયો યોગિનો દેવેશા વિસિસ્મિરે ।
તત્ર સ્તોતું ચ કોઽહં તાવલ્પજ્ઞાનપ્રધારકઃ ॥ ૩૫॥

ભવતોર્દર્શનેનૈવ બોધયુક્તોઽહમઞ્જસા ।
તેન સ્તુતૌ ગણાધ્યક્ષૌ યોગશાન્તિપ્રદાયકૌ ॥ ૩૬॥

પ્રયચ્છતં મહાયોગમધુના મે નમામ્યહમ્ ।
ભક્તિં ચ ભવતોર્મે તુ સુદૃઢાં દાતુમર્હથઃ ॥ ૩૭॥

ઇત્યુક્ત્વા દણ્ડવદ્ભૂમૌ પપાત પદયોસ્તયોઃ ।
મનુસ્તૌ હર્ષસંયુક્તાવૂચતુસ્તં મહીપતિમ્ ॥ ૩૮॥

શક્તિવિનાયકાવૂચતુઃ ।
શાન્તિયોગં મહાભાગ લભસે યોગસેવયા ।
ભક્તિં દૃઢાં ચ નૌ પાદે સદાऽऽદિત્યકુમારક ॥ ૩૯॥

ભુક્ત્વા મન્વન્તરં પૂર્ણં યશઃ સ્થાપ્ય જગત્રયે ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૪૦॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
પઠતે શ‍ૃણ્વતે ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૪૧॥

એવમુક્ત્વા ગણાધ્યક્ષાવન્તર્ધાનં પ્રચક્રતુઃ ।
મનુઃ સ્વગૃહમાગત્યાऽભજત્તૌ ભાવસંયુતઃ ॥ ૪૨॥

મન્વન્તરસમા ભુક્ત્વા બ્રહ્મભૂતો બભૂવ હ ।
ગાણપત્યો મહાભાગઃ સાવર્ણિઃ પ્રથિતોऽભવત્ ॥ ૪૩॥

મયાऽવતારઃ કથિતો નામ્ના શક્તિવિનાયકઃ ।
સર્વસિદ્ધિપ્રદઃ પૂર્ણો લમ્બોદરસ્ય ભક્તિતઃ ॥ ૪૪॥

માયયા મોહિતાનાં વૈ ભિન્ના શક્તિઃ પ્રદૃશ્યતે ।
યા શક્તિઃ સ સ્વયં દક્ષ લમ્બોદરો ન સંશયઃ ॥ ૪૫॥

(Page ખં. ૫ અ. ૧૬ પાન 33)
સ્ત્રીપુમ્ભાવમયી માયા ત્યક્તવ્યા યોગસેવયા ।
તદા લમ્બોદરઃ પ્રાપ્તો યોગિભિર્બ્રહ્મનાયકઃ ॥ ૪૬॥

કેચિચ્છક્તિં વદન્ત્યેનં કેચિલ્લમ્બોદરં પરમ્ ।
ભક્ત્યા ભિન્નં સ્વરુચ્યર્થં જાનીહ્યત્ર ન સંશયઃ ॥ ૪૭॥

અસત્સ્વાનન્દરૂપા વૈ શક્તિર્વેદે પ્રકીર્તિતા ।
સ લમ્બોદર આખ્યાતો ગણેશસ્યાવતારભૃત્ ॥ ૪૮॥

શક્તિવિનાયકસ્યૈતચ્ચરિત્રં યઃ શ‍ૃણોતિ વા ।
પઠતે ભવિતા તસ્ય ભુક્તિર્મુક્તિર્ન સંશયઃ ॥ ૪૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શક્તિવિનાયકમાહાત્મ્યે પઞ્ચદશોઽધ્યાયઃ ॥ ૫.૧૫

## ૫.૧૬ શેષાતિદુઃખવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શેષપુત્રસ્ય માહાત્મ્યં કથયામિ સમાસતઃ ।
તચ્છૃણુષ્વ પ્રજાનાથ યોગશાન્તિપ્રદાયકમ્ ॥ ૧॥

એકદા સત્યલોકસ્થો બ્રહ્મા ધ્યાનપરાયણઃ ।
બભૂવ સર્વજન્તૂનાં હિતાર્થં મોહિતઃ સ્વયમ્ ॥ ૨॥

સદા સૃષ્ટિર્મદીયેયમખણ્ડા જાયતે કથમ્ ।
તત્ર તસ્ય સ્વનિઃશ્વાસાત્ પુરુષઃ સમ્બભૂવ હ ॥ ૩॥

સ પ્રણમ્ય વિધાતારં તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ।
તમુવાચ તદા બ્રહ્મા કિં વાઞ્છસિ વદાઽશુ મે ॥ ૪॥

બ્રહ્મણો વચનં શ્રુત્વા હર્ષયુક્તઃ પુમાનભૂત્ ।
તં જગાદ પ્રજાનાથં ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૫॥

પુમાનુવાચ ।
તવ નિઃશ્વાસસમ્ભૂતં પુત્રં માં પાલય પ્રભો ।
દેહિ નામ તથા સ્થાનં ભક્ષ્યં નાનાવિધં વિધે ॥ ૬॥

અન્યત્ સુખકરં સર્વં દેહિ નાથ નમોઽસ્તુ તે ।
ત્વં ગતિઃ સર્વભૂતાનામધુના મે વિશેષતઃ ॥ ૭॥

તસ્ય તદ્વચનં શ્રુત્વા બ્રહ્મા સ્નેહયુતોઽભવત્ ।
સ જગાદ તમાલિઙ્ગ્ય ચુચુમ્બે પુત્રવત્સલઃ ॥ ૮॥

બ્રહ્મોવાચ ।
માયાદર્શનમાત્રેણ વર્ધસે ત્વં મહામતે ।
માયાકરસ્તે વિખ્યાતમતો નામ ભવિષ્યતિ ॥ ૯॥

યદ્યદિચ્છસિ તત્તત્તે સફલં ચ ભવિષ્યતિ ।
ત્રૈલોક્યે વસતિઃ પુત્ર ગતિરવ્યાહતા ભવેત્ ॥ ૧૦॥

ચતુઃપદાર્થસમ્ભૂતં સદા વશ્યં ભવિષ્યતિ ।

ચતુર્વિધમયેભ્યસ્તે મરણં ન કદા ભવેત્ ॥ ૧૧॥

યુદ્ધે ચતુર્વિધં સર્વં પ્રજેષ્યસિ ન સંશયઃ ।
સદાઽઽરોગ્યાદિસંયુક્તો ભવિષ્યસિ મદાત્મજ ॥ ૧૨॥

બ્રહ્મણો વચનં શ્રુત્વા હર્ષિતોઽભૂત્ પુમાન્ સ્વયમ્ ।
માયાકરઃ પ્રણમ્યૈવ તં યયૌ સ્વેચ્છયા ચરન્ ॥ ૧૩॥

તતો દાનવમુખ્યશ્ચ વિપ્રચિત્તિઃ પ્રતાપવાન્ ।
તં દૃષ્ટ્વા બલસંયુક્તં સમાગત્ય નનામ સઃ ॥ ૧૪॥

જ્ઞાત્વા વૃત્તાન્તમેતસ્ય માયાકરસ્ય દુર્મતિઃ ।
જગાદ તં પુનઃ સોઽપિ વિપ્રચિત્તિઃ પ્રતાપવાન્ ॥ ૧૫॥

વિપ્રચિત્તિરુવાચ ।
માયાકર મહાભાગ શૃણુ મે પરમં વચઃ ।
વરાઃ પ્રાપ્તાસ્ત્વયા સર્વે દુર્લભા નાત્ર સંશયઃ ॥ ૧૬॥

તેષાં ભોગઃ પ્રકર્તવ્યસ્ત્વયા નિત્યં મહામતે ।
તદા શોભાયુતા જાતા વરાસ્તે નાન્યથા પ્રભો ॥ ૧૭॥

યથા રૂપવયોયુક્તા નારી સ્વપતિના યુતા ।
નિત્યં ભુક્તા વિશેષેણ શોભતેઽતીવ માનદ ॥ ૧૮॥

મિલિતા વિવિધા ભોગા ભુક્તાશ્ચેત્ સાર્થકં ભવેત્ ।
નિક્ષિપ્તા ભોગહીનાસ્તે શપન્તિ પુરુષં સદા ॥ ૧૯॥

અતો વરાન્ મહાભાગ સાધયસ્વ વિશેષતઃ ।
નોચેત્તે ત્વાં શપિષ્યન્તિ વરા ભોગવિહીનતઃ ॥ ૨૦॥

વયં દાનવમુખ્યાશ્ચ ત્વદધીના ભવામહે ।
અસ્માભિર્બલસંયુક્તૈર્ભુઙ્ક્ષ્વ ભોગં મહાબલ ॥ ૨૧॥

દાનવા બલસંયુક્તા અજેયાઃ સર્વભાવતઃ ।
ત્વદાજ્ઞાવશગા નાથ ચરિષ્યન્તિ ન સંશયઃ ॥ ૨૨॥

એવં માયાકરસ્તેન બોધિતો દુષ્ટધીઃ સ્વયમ્ ।
તદધીનો બભૂવાઽપિ યયૌ તેન રસાતલમ્ ॥ ૨૩॥

તત્ર દાનવમુખ્યૈશ્ચ મિલિતૈર્યમસન્નિભૈઃ ।
તૈર્માનિતો વિધેઃ પુત્રો માયાકરસ્તુતોષ હ ॥ ૨૪॥

તતઃ શુક્રં સમાનીય પ્રણતા દાનવા વિધે ।
બ્રાહ્મણૈરભિષિક્તં તં કારયામાસુરાદરાત્ ॥ ૨૫॥

અસુરાણાં મહારાજો બભૂવ બ્રહ્મણઃ સુતઃ ।
માયાકરોઽતિશુશુભે સર્વેભ્યો ભયદાયકઃ ॥ ૨૬॥

નાનાભોગાન્ પ્રભુઞ્જાનો બલેન ગર્વિતોઽભવત્ ।
અમન્યતાસુરાધીશ આત્મનઃ કૃતકૃત્યતામ્ ॥ ૨૭॥

તતો દાનવમુખ્યૈઃ સ જિત્વા પૃથ્વીં સસાગરામ્ ।
તતો દેવગણાન્ જિત્વેન્દ્રાસને સંસ્થિતોઽભવત્ ॥ ૨૮॥

તતઃ સિષેવિરે સર્વે દાનવાસ્તં વિશેષતઃ ।
સ્વર્ગભોગકરા ભૂત્વા હર્ષિતાઃ સ્વજનૈઃ પ્રભો ॥ ૨૯॥

તતઃ શિવં સમાગમ્ય સ યુદ્ધાયોદ્યતોઽભવત્ ।
ત્યક્ત્વા કૈલાસમાદૌ સ પપાલ શઙ્કરઃ સ્વયમ્ ॥ ૩૦॥

તતો વિકુણ્ઠગો ભૂત્વા રરાજે દાનવાધિપઃ ।
ત્યક્ત્વા વિકુણ્ઠમેવં સ વિષ્ણુઃ પપાલ ભીતિતઃ ॥ ૩૧॥

તતઃ શાન્તિધરં વીક્ષ્ય તમૂચુર્દાનવાઃ પુનઃ ।
જય ત્વં સત્યલોકસ્થં બ્રહ્માણં દેવનાયકમ્ ॥ ૩૨॥

સુરેભ્યઃ સર્વદાતા સ પક્ષગશ્ચ પિતામહઃ ।
અસુરાણામહો હન્તા ન સમો વર્તતે કદા ॥ ૩૩॥

તમાશ્રિત્ય મહાદેવાદયોઽભૂવંશ્ચ સંસ્થિતાઃ ।
કાલં પ્રાપ્ય મહાવેગા મારયિષ્યન્તિ નઃ ખલુ ॥ ૩૪॥

ત્વયા સર્વં જિતં રાજન્ તદપિ પશ્ય ચેષ્ટિતમ્ ।
બ્રહ્મણા દૂતવર્યેણ સત્કૃતો ન કદા ભવાન્ ॥ ૩૫॥

માયાકરસ્તતસ્તેષાં વચઃ શ્રુત્વાઽસુરઃ સ્વયમ્ ।
સત્યં વિચાર્ય ધાતારમભૂત્ જેતું સમુદ્યતઃ ॥ ૩૬॥

દાનવૈર્બ્રહ્મલોકે તમાગતં વીક્ષ્ય વૈ વિધિઃ ।
શોકયુક્તઃ પપાલાઽસૌ દેવૌઘૈઃ સંવૃતઃ પ્રભુઃ ॥ ૩૭॥

તતઃ સ સત્યલોકસ્થઃ શુશુભેઽતીવ તત્ક્ષણાત્ ।

દાનવાન્ માનયન્ દૈત્યઃ સહ તૈર્બુભુજે સુખમ્ ॥ ૩૮॥

તતઃ સ સત્યલોકે ચ કૈલાસે વૈષ્ણવે પદે ।
સૌરે શાક્તેઽન્યદેવાનાં પદેષ્વાસ્થાપયત્ સ્વકાન્ ॥ ૩૯॥

પુનર્ભૂમૌ સમાગમ્ય સંસ્થિતો નગરે સ્વકે ।
પ્રપઞ્ચાખ્યે મહાદૈત્યો દૈત્યપૈઃ સંવૃતો બભૌ ॥ ૪૦॥

તતો દાનવમુખ્યાંશ્ચ પાતાલજયને સુરઃ ।
પ્રાસ્થાપયચ્ચ તે સર્વે ગતાઃ સર્વે સમન્વિતાઃ ॥ ૪૧॥

(Page ખં. ૫ અ. ૧૭ પાન ૩૫)
તૈર્જિતાઃ સર્પરાજાસ્તે શેષસ્તાઞ્છરણં યયૌ ।
સ્વીકૃત્ય કરભારં સ સંસ્થિતો નાગપૈર્વૃતઃ ॥ ૪૨॥

તથાપિ દાનવાસ્તત્ર સંસ્થિતા ભયદાયકાઃ ।
નાગાનધર્ષયન્ સર્વે યમકાલનિભા બલાત્ ॥ ૪૩॥

તતોઽતિદુઃખિતઃ શેષઃ સસ્માર ગણનાયકમ્ ।
નિર્વિઘ્નાર્થં પ્રજાનાથ પુત્રભાવાર્થમાદરાત્ ॥ ૪૪॥

અન્તર્ધ્યાનેન વિઘ્નેશં તોષયામાસ નાગપઃ ।
તતો વર્ષે ગતે પૂર્ણે પ્રકટોઽભૂદ્ ગજાનનઃ ॥ ૪૫॥

હૃદયાદ્ બહિરેવાઽસૌ નિર્ગત્ય તમુવાચ હ ।
પશ્ય શેષ મહાભાગ ધ્યાનજં તે સુતં ચ મામ્ ॥ ૪૬॥

દક્ષ ઉવાચ ।
સ્વલ્પાયાસેન હેરમ્બઃ કથં પુત્રો બભૂવ હ ।
કથયસ્વ મહાયોગિન્ શેષસ્ય ચરિતં મહત્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શેષાતિદુઃખવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૫.૧૬

## ૫.૧૭ શેષયોગોપદેશવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પુરા કશ્યપવિપ્રેણારાધિતૌ તપસા પ્રભૂ ।

શિવવિષ્ણૂ ચ પુત્રાર્થં મન્ત્રધ્યાનસમાધિના ॥ ૧॥

દશ વર્ષે ગતે તૌ ચ વરદૌ તં સમાગતૌ ।
સુતૌ મુનિવરેણૈવ વરં દત્ત્વા પ્રજગ્મતુઃ ॥ ૨॥

તયોરંશેન શેષશ્ચ પુત્રસ્તસ્ય બભૂવ હ ।
ધરાધરણભાવેન પાલકો વિષ્ણુરેવ સઃ ॥ ૩॥

બ્રહ્મણો દિવસાન્તે સ જ્વાલયા વિષ્ટપં મહત્ ।
દદાહ શઙ્કરાંશશ્ચ મહાનાગઃ પ્રતાપવાન્ ॥ ૪॥

સહસ્રશીર્ષા પુરુષઃ શેષ એવ સ ઉચ્યતે ।
મૃત્યુહીનો હ્યનન્તોઽયં સર્વેષામન્તકોઽભવત્ ॥ ૫॥

લય એકોઽવશેષશ્ચ તેન શેષઃ પ્રકીર્તિતઃ ।
બ્રહ્માણ્ડં ધારયામાસ સર્વાધારો બભૂવ હ ॥ ૬॥

ઉત્પન્નોઽભૂત્ સ્વયં શેષઃ સાક્ષાદ્ધરિહરાત્મકઃ ।
બ્રહ્મણાગત્ય તત્રૈવાઽભિષિક્તો રાજ્યકર્મણિ ॥ ૭॥

નાગાનામીશ્વરો ભૂત્વા સ્થિતઃ સર્વત્ર સમ્મતઃ ।
તતઃ સ કશ્યપં નત્વા જગાદ વચનં હિતમ્ ॥ ૮॥

શેષ ઉવાચ ।
બ્રહ્માણ્ડં ધારયામીશ કથં સર્વસમાકુલમ્ ।
તદર્થં માં મહાયોગિન્ શાધિ શિષ્યં પિતઃ પ્રભો ॥ ૯॥

તતસ્તસ્મૈ મુનિશ્રેષ્ઠો દદૌ મન્ત્રં ષડક્ષરમ્ ।
ગણેશસ્ય યથાન્યાયં શોધયિત્વા પ્રજાપતે ॥ ૧૦॥

તતસ્તં પ્રણિપત્યૈવ તતાપ તપ ઉત્તમમ્ ।
વને ગત્વા ગણેશં સ ધ્યાત્વા જપપરાયણઃ ॥ ૧૧॥

નિરાહારેણ વિઘ્નેશં તોષયામાસ નિત્યદા ।
પુપૂજ ભક્તિસંયુક્તસ્તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ॥ ૧૨॥

એવં વર્ષસહસ્રેણ પ્રસન્નો ગણનાયકઃ ।
અસ્થિમાત્રાવશેષં તં ત્વચાયુક્તં સમાયયૌ ॥ ૧૩॥

તં દૃષ્ટ્વા નાગપઃ શેષઃ પ્રણમ્યોત્થાય ચાદરાત્ ।
પુપૂજ હર્ષસંયુક્તસ્તુષ્ટાવ કરસમ્પુટૈઃ ॥ ૧૪॥

(Page ખં. ૫ અ. ૧૭ પાન ૩૬)
તતસ્તં ગણરાજઃ સ જગાદ વૃણુ વાઞ્છિતમ્ ।
દાસ્યામિ તપસા તુષ્ટો યત્તે ચિત્તે ભવિષ્યતિ ॥ ૧૫॥

શેષઃ પ્રણમ્ય વિઘ્નેશં જગાદ હર્ષસંયુતઃ ।
બ્રહ્માણ્ડધારણે શક્તિં દેહિ નાથ નમોઽસ્તુ તે ॥ ૧૬॥

ભક્તિં દેહિ ગણાધીશ ભુક્તિમુક્તિપ્રદાયિનીમ્ ।
મૃત્યુહીનં દિશાં નાથં માં કુરુષ્વ યશોતિગમ્ ॥ ૧૭॥

તથેતિ ગણરાજસ્તુ તમુક્ત્વાંઽતરધાત્તતઃ ।
શેષો હૃષ્ટઃ સ્વયં દક્ષ સ્વસ્થાનં પ્રજગામ હ ॥ ૧૮॥

તદારભ્ય સ્વયં નાગો ધરાધારો બભૂવ હ ।
દિક્પાલત્વં સદા લેભે માન્યઃ સર્વાર્થદોઽભવત્ ॥ ૧૯॥

તતો યોગબલેનૈવ નાના માયાવિશારદઃ ।
નાના રૂપધરઃ શેષઃ શુશુભે સર્વમણ્ડલે ॥ ૨૦॥

એવં બહૌ ગતે કાલે હિરણ્યકશિપોર્ભયાત્ ।
ઐશ્વર્યં નશ્વરં મત્વાઽભવત્ જ્ઞાનાર્થમુદ્યતઃ ॥ ૨૧॥

વિપુલં સ તપસ્તપ્ત્વા શમદમપરાયણઃ ।
યોગભૂમિસ્થભાવેનાન્તર્નિષ્ઠશ્ચ બભૂવ હ ॥ ૨૨॥

તતઃ ક્રમેણ નાગેશઃ સમસ્વાનન્દગોઽભવત્ ।
યોગેન તત્ર શાન્તિં ચ સ દૃષ્ટ્વા સંસ્થિતોઽભવત્ ॥ ૨૩॥

વિષ્ણું જ્ઞાત્વા પરં ભાવં તદર્થં સંયતઃ સ્વયમ્ ।
વૈષ્ણવેનૈવ માર્ગેણ તોષયામાસ કેશવમ્ ॥ ૨૪॥

તતસ્તં વરદો વિષ્ણુર્યયો શેષેણ સંસ્તુતઃ ।
યાચિતો નિત્યમેવં મે દર્શનં દેહિ કેશવ ॥ ૨૫॥

મદીયદેહસંસ્થસ્ત્વં ભવ નિત્યં જનાર્દન ।
તથેતિ તમુવાચાઽસૌ નારાયણો બભૂવ હ ॥ ૨૬॥

શેષશાયી સદા તસ્ય સ દેહે સંસ્થિતોઽભવત્ ।
તેન સંહર્ષિતોઽત્યન્તં બભૂવે નાગપાલકઃ ॥ ૨૭॥

તતો યોગબલેનાઽસૌ માયામોહં દદર્શ હ ।
સમાનન્દં દ્વન્દ્વમયમશાન્તોઽપિ બભૂવ હ ॥ ૨૮॥

એવં બહૌ ગતે કાલે યોગમાર્ગરતોઽભવત્ ।
સમાધિના પ્રજાનાથ સહજં બ્રહ્મ સંશ્રિતઃ ॥ ૨૯॥

સાહજં શઙ્કરં જ્ઞાત્વા શૈવમાર્ગપરોઽભવત્ ।
બ્રહ્મ સ્વેચ્છામયં દૃષ્ટ્વા શાન્તિં પ્રાપ્ય સમાસ્થિતઃ ॥ ૩૦॥

તતસ્તં વરદઃ શમ્ભુરાયયૌ તં પ્રણમ્ય સઃ ।
શેષસ્તુષ્ટાવ સંહૃષ્ટઃ શૈવૈઃ સ્તોત્રૈઃ સદાશિવમ્ ॥ ૩૧॥

પ્રસન્નં શઙ્કરં દૃષ્ટ્વા યયાચે ભક્તિમુત્તમામ્ ।
સદા દર્શનભાવાર્થં સઙ્ગતિં શઙ્કરસ્ય સઃ ॥ ૩૨॥

તથેતિ શઙ્કરો દેવઃ સ ચકાર પ્રજાપતે ।
મસ્તકે તં બબન્ધાઽથ નિત્યદર્શનકાઙ્ક્ષિણમ્ ॥ ૩૩॥

તતોઽતિહર્ષિતોઽનન્તઃ શમ્ભુમાર્ગપરાયણઃ ।
સિષેવે ભાવસંયુક્તઃ શઙ્કરં વૃષભધ્વજમ્ ॥ ૩૪॥

તતો યોગબલેનૈવ શેષસ્તત્ સહજં પરમ્ ।
મોહહીનં વિદિત્વા સ શાન્તિહીનો બભૂવ હ ॥ ૩૫॥

મનસા શાઙ્કરં બ્રહ્મ નામન્યત પરં પ્રભુમ્ ।
શિવં નત્વા મહાનાગઃ પપ્રચ્છ યોગશાન્તિદમ્ ॥ ૩૬॥

પાત્રં ગણેશયોગે તં જ્ઞાત્વા શેષં સદાશિવઃ ।
જગાદ ગણનાથસ્ય જ્ઞાનં સર્વહિતાવહમ્ ॥ ૩૭॥

શિવ ઉવાચ ।
યોગશાન્તિપ્રદં પૂર્ણં ગણેશં વિદ્ધિ માનદ ।
સત્યાસત્યસમાનાનિ સહજેન યુતાનિ વૈ ॥ ૩૮॥

બ્રહ્માણિ યત્ર લીયન્તે સંયોગેન મહામતે ।
સ્વસંવેદ્યં તદ્વદન્તિ બ્રહ્મ શાન્તિપ્રદં પરમ્ ॥ ૩૯॥

સંયોગે ગણનાથસ્ય સ્વસંવેદ્યાત્મકં પરમ્ ।
(Page ખં. ૫ અ. ૧૮ પાન ૩૭)
દર્શનં જાયતે યેનાઽભવત્ સ્વાનન્દવાસિકઃ ॥ ૪૦॥

સર્વસંયોગરૂપશ્ચ દોષસ્તત્ર મહાન્ સ્મૃતઃ ।
તેન શાન્તિપ્રદં પૂર્ણં ન મતં યોગિભિઃ કદા ॥ ૪૧॥

સ્વસંવેદ્યવિહીનં યદ્બ્રહ્મ યોગમયં ભવેત્ ।
તત્ર સન્દર્શનં તસ્ય ન ભવેદ્વ્યતિરેકતઃ ॥ ૪૨॥

સ્વકીયાઽભેદતસ્તત્ર નિવૃત્તિર્જાયતે નૃણામ્ ।
તત્ર શાન્તિઃ સમાખ્યાતા સા ન મુખ્યા મતા બુધૈઃ ॥ ૪૩॥

અયોગાત્મકરૂપશ્ચ દોષઃ સંવર્તતે સદા ।
માયાહીનપ્રભાવેણ તિષ્ઠતે ગણનાયકઃ ॥ ૪૪॥

સંયોગાયોગયોર્યોગે યોગઃ શાન્તિપ્રદાયકઃ ।
સા શાન્તિઃ સર્વમાન્યા વૈ ભવતે વેદવાદતઃ ॥ ૪૫॥

સંયોગશ્ચ ગકારસ્થો ણકારો યોગગઃ પ્રભો ।
તયોરીશો ગણેશાનો વેદે પશ્ય વિચક્ષણ ॥ ૪૬॥

પઞ્ચભૂમિમયં ચિત્તં તદેવ બુદ્ધિભાવગમ્ ।
મોહો ભ્રાન્તિપ્રદસ્તેષુ સા સિદ્ધિઃ સમ્મતા બુધૈઃ ॥ ૪૭॥

તયોઃ સ્વામી ગણેશાનઃ ચિન્તામણિઃ પ્રકથ્યતે ।
ચિત્તપ્રકાશકઃ સાક્ષાચ્છાન્તિદો યોગસેવયા ॥ ૪૮॥

તં ભજસ્વ મહાનાગ તતઃ શાન્તિમવાપ્સ્યસિ ।
નાન્યથા કોટિવર્ષૈઃ કઃ શાન્તિં પ્રલભતે નરઃ ॥ ૪૯॥

એવમુક્ત્વા મહાદેવો વિરરામ સ તં પ્રભુઃ ।
પ્રણમ્ય શેષનાગશ્ચ યયૌ તપોવનં પરમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શેષયોગોપદેશવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૫.૧૭

## ૫.૧૮ શેષાખ્યાનવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતઃ શેષઃ સ્વયં તત્ર તતાપ તપ ઉત્તમમ્ ।
શમદમપરો ભૂત્વા યોગભૂમિમશોધયત્ ॥ ૧॥

ક્રમેણ પઞ્ચભૂમીનાં ચિત્તસ્ય પારમાગતઃ ।
શાન્તિં પ્રાપ્તો મહાનાગોઽભજત્તં ગણનાયકમ્ ॥ ૨॥

ગાણપત્યસ્વભાવેનાઽપૂજયદ્ ભક્તિસંયુતઃ ।
એવં તપઃપ્રભાવેણ સન્તુષ્ટોઽભૂદ્ ગજાનનઃ ॥ ૩॥

તમાયયૌ મહાભક્તં ધ્યાનસ્તિમિતલોચનમ્ ।
જગાદ સ વૃણુષ્વ ત્વં વરાન્ મત્તો સુદુર્લભાન્ ॥ ૪॥

તસ્ય તદ્વચનં શ્રુત્વા પ્રબુદ્ધો ગણનાયકમ્ ।
દૃષ્ટ્વા લમ્બોદરં દેવં પ્રણનામ કૃતાઞ્જલિઃ ॥ ૬॥

પ્રણમ્ય વિઘ્નપં ભક્તિસંયુક્તોઽપૂજયત્ પુનઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા નિબદ્ધકરસમ્પુટઃ ॥ ૬॥

શેષ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં સિદ્ધિબુદ્ધિપતે નમઃ ।
ચિન્તામણે મહાવિઘ્નનાશનાય નમો નમઃ ॥ ૭॥

સર્વાદિપૂજ્યરૂપાય સર્વપૂજ્યાય તે નમઃ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં માત્રે પિત્રે નમો નમઃ ॥ ૮॥

(Page ખં. ૫ અ. ૧૮ પાન ૩૮)
વિનાયકાય સર્વેષાં નાયકાય નમો નમઃ ।
નાયકાનાં પ્રચાલાય નાયકૈઃ સેવિતાય તે ॥ ૯॥

વિઘ્નેશાય ચ સર્વેષાં પદભ્રંશકરાય તે ।
અભક્તાનાં સુભક્તાનાં વિઘ્નહન્ત્રે નમો નમઃ ॥ ૧૦॥

ઢુણ્ઢિરાજાય સર્વૈશ્ચ ઢુણ્ઢિતાય સુસિદ્ધિદ ।
ઢુણ્ઢિતાનાં મહારાજ પરેશાય નમો નમઃ ॥ ૧૧॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મેભ્યો બ્રહ્મદાયિને ।
બ્રહ્મભ્યઃ સુખદાયાઽથ શાન્તિરૂપાય તે નમઃ ॥ ૧૨॥

સ્વાનન્દવાસિને તુભ્યં સદા સ્વાનન્દમૂર્તયે ।
નાના વિહારકર્ત્રે તે સમાધયે નમો નમઃ ॥ ૧૩॥

મૂષકવાહનાયૈવ મૂષકપ્રિયમૂર્તયે ।
મૂષકધ્વજિને તુભ્યં સ્તેયરૂપાય તે નમઃ ॥ ૧૪॥

અયોગાય સદા બ્રહ્મન્ બ્રહ્મણે બ્રહ્મમૂર્તયે ।
અસમાધિસ્થ હેરમ્બ માયાહીનાય તે નમઃ ॥ ૧૫॥

યોગાય યોગનાથાય યોગેભ્યો યોગદાયિને ।
ચિત્તવૃત્તિવિહીનાય ગણેશાય નમો નમઃ ॥ ૧૬॥

કિં સ્તૌમિ ત્વાં ગણાધીશ મનોવાણીવિવર્જિતમ્ ।
મનોવાણીમયં સ્વામિન્ દ્વાભ્યાં હીનતયા સ્થિત ॥ ૧૭॥

અતો વેદાદયઃ સર્વે કુણ્ઠિતા નાત્ર સંશયઃ ।
યોગિનઃ શુકમુખ્યાશ્ચાતસ્ત્વાં પશ્યામિ ભાગ્યતઃ ॥ ૧૮॥

એવં સંસ્તુવતસ્તસ્ય ભક્તિરસસમુદ્ભવઃ ।
નનર્ત તેન શેષશ્ચ હૃષ્ટરોમાઽશ્રુલોચનઃ ॥ ૧૯॥

જગાદ ગણરાજસ્તુ તતસ્તં ભક્તમુત્તમમ્ ।
વરાન્ વરય શેષ ત્વં દાસ્યામિ ભક્તિભાવિતઃ ॥ ૨૦॥

ત્વયા કૃતમિદં સ્તોત્રં શાન્તિયોગપ્રદં ભવેત્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં સર્વસિદ્ધિદમ્ ॥ ૨૧॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
શ્રવણાન્નાઽત્ર સન્દેહો ભવેન્ મદ્ભક્તિવર્ધનમ્ ॥ ૨૨॥

તતસ્તં નાગરાજશ્ચ જગાદ વચનં હિતમ્ ।
પ્રણમ્ય ભાવસંયુક્તો વિઘ્નેશં ભક્તિલાલસઃ ॥ ૨૩॥

શેષ ઉવાચ ।
ભક્તિં દેહિ ગણાધીશ તવ પાદામ્બુજે પરામ્ ।
સદા શાન્તિસ્થમત્યન્તં કુરુષ્વ ગણનાયક ॥ ૨૪॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તત્ર ત્વં સતતં પ્રભો ।
તિષ્ઠસ્વ સ્ફૂર્તિરૂપેણ મદીયભ્રમનાશકઃ ॥ ૨૫॥

મનશ્ચઞ્ચલભાવેન સંસારવિષયે રતમ્ ।
ભવિષ્યતિ ન સન્દેહોઽતસ્ત્વં મે તનયો ભવ ॥ ૨૬॥

સંસારે પુત્રભાવેન ભજિષ્યામિ નિરન્તરમ્ ।
હૃદિ શાન્ત્યા તથા દેવ કુલદૈવતરૂપિણમ્ ॥ ૨૭॥

ગણેશક્ષેત્રમત્રૈવ ભવતુ ત્વત્પ્રસાદતઃ ।

સર્વસિદ્ધિપ્રદં નાથ ભક્તેભ્યઃ શાન્તિદાયકમ્ ॥ ૨૮॥

ચિત્તભૂમિધરં વીક્ષ્યાઽહં શાન્તોઽત્ર ગજાનન ।
ધરણીધરસંજ્ઞં ત્વાં વદિષ્યન્તિ જનાઃ પ્રભો ॥ ૨૯॥

યેનાઽહં વૈ ગણાધ્યક્ષ ત્વદ્રૂપો નાઽત્ર સંશયઃ ।
અતો મદીયનામ્ના ત્વં ધરણીધરકો ભવ ॥ ૩૦॥

અહં ધરાધરઃ પ્રોક્તઃ સ્થૂલશબ્દપ્રધારકઃ ।
ત્વં ચિત્તભૂમિગઃ સ્વામિન્ યોગેન ધરણીધરઃ ॥ ૩૧॥

એવમુક્ત્વા ગણેશાનં વિરરામ ચ કાશ્યપઃ ।
તમુવાચ ગણાધીશઃ સન્તુષ્ટો ભક્તવત્સલઃ ॥ ૩૨॥

શ્રીગણેશ ઉવાચ ।
ત્વયોક્તં સકલં શેષ સફલં તે ભવિષ્યતિ ।
સદા શાન્તિસ્વરૂપસ્થો માં ભજિષ્યસિ નિશ્ચિતમ્ ॥ ૩૩॥

(Page ખં. ૫ અ. ૧૮ પાન ૩૯)
યોગશાસ્ત્રસ્ય કર્તા વૈ ત્વં ભવિષ્યસિ માનદ ।
ન યોગે ત્વત્સમઃ ક્વાપિ ભવિષ્યતિ મહામતે ॥ ૩૪॥

સદા ભક્તિકરસ્ત્વં મે નાભૌ તિષ્ઠ ધરાધર ।
ભ્રમહીનઃ સ્વભાવેન માં ભજસ્વ વિશેષતઃ ॥ ૩૫॥

ધરાધરણદુઃખશ્રમાદિકં વૈ કદાચન ।
ન ભવિષ્યતિ તે શેષ સર્ષપેણ સમા ભવેત્ ॥ ૩૬॥

તવ વિષ્ણુઃ શરીરસ્થઃ શયિતા નિત્યમાદરાત્ ।
પુષ્પતુલ્યો ભવેદ્દેવઃ સોઽપિ બ્રહ્માણ્ડનાયકઃ ॥ ૩૭॥

સદા યજ્ઞેષુ ભાગસ્થો ભવિષ્યસિ ન સંશયઃ ।
દિક્પાલસ્ત્વં મહાભાગ સર્વમાન્યો ન સંશયઃ ॥ ૩૮॥

એવમુક્ત્વા ગણાધીશો રૂપં નાનાવિધં સ્વકમ્ ।
દર્શયામાસ શેષાય નાના યોગધરં પરમ્ ॥ ૩૯॥

સમષ્ટિવ્યષ્ટિરૂપં ચ દદર્શ નાદરૂપકમ્ ।
બિન્દું સોઽહં તથા બોધં વિદેહં નાગરાટ્ પ્રભો ॥ ૪૦॥

સ્વસ્વરૂપમયોગસ્થં યોગશાન્તિમયં તથા ।

દદર્શ વિસ્મિતઃ શેષોઽભવત્ સંશયવર્જિતઃ ॥ ૪૧॥

અન્તર્ધાનં યયૌ સદ્યો ગણેશો બ્રહ્મનાયકઃ ।
શેષસ્તત્ર ગણેશાનં સ્થાપયામાસ વિપ્રપૈઃ ॥ ૪૨॥

ધરણીધરવિઘ્નેશોઽભવત્તત્રૈવ સંસ્થિતઃ ।
ભક્તેભ્યઃ સિદ્ધિદાતા સ યાત્રામાત્રેણ નિશ્ચિતમ્ ॥ ૪૩॥

શેષો જગામ દક્ષ સ્વભવનં હર્ષસંયુતઃ ।
વિઘ્નરાજસ્ય નાભૌ ચ સ્વયં તિષ્ઠતિ નાગરાટ્ ॥ ૪૪॥

અનન્યભાવસંયુક્તોઽભજત્તં ગણનાયકમ્ ।
અથો વ્યાસાવતારશ્ચ બભૂવે ધર્મપાલકઃ ॥ ૪૫॥

બ્રહ્માણં શરણં ગત્વા ગાણેશં શુશ્રુવે મુનિઃ ।
પુરાણં સ તથા દેવમભજત્તપસા યુતઃ ॥ ૪૬॥

પ્રસન્નો ગણરાજઃ સ તસ્મૈ દત્વા યયૌ વરમ્ ।
વેદશાખાદિકં સર્વં ચકાર ભિન્નમાદરાત્ ॥ ૪૭॥

તતો બહૌ ગતે કાલે માયયા ભ્રાન્તિસંયુતઃ ।
યોગભ્રષ્ટોઽભવદ્યોગી ચિત્તચઞ્ચલભાવતઃ ॥ ૪૮॥

કદા નદીજલે વ્યાસસ્તર્પણં નિત્યમાકરોત્ ।
તસ્યાઞ્જલૌ સ્વયં શેષઃ પપાત સૂક્ષ્મરૂપધૃક્ ॥ ૪૯॥

તં દૃષ્ટ્વા વિસ્મિતો વ્યાસસ્તત્યાજ સ જલે ભયાત્ ।
મુનિં તં પ્રત્યુવાચેદં સર્પોઽગુષ્ઠપ્રમાણકઃ ॥ ૫૦॥

સર્પ ઉવાચ ।
જલે સત્ત્વા મહોગ્રાશ્ચ પ્રગ્રસિષ્યન્તિ માં પ્રભો ।
રક્ષસ્વ ત્વં મહાભાગ શરણં ત્વાં સમાગતમ્ ॥ ૫૧॥

તચ્છ્રુત્વા વિસ્મિતો વ્યાસસ્તં પ્રણમ્ય મહાયશાઃ ।
જગાદ હર્ષસંયુક્તો વચનં સ્વહિતાવહમ્ ॥ ૫૨॥

વ્યાસ ઉવાચ ।
કસ્ત્વં વદ મહાભાગાઞ્જલૌ મમ સમાગતઃ ।
નરવન્નાથ વદસિ ન ત્વાં જાનામિ ભાવતઃ ॥ ૫૩॥

તસ્ય તદ્વચનં શ્રુત્વા તં જગાદ પતઞ્જલિઃ ।

હર્ષયન્ હેતુગર્ભાભિર્વાગ્ભિર્હર્ષસમન્વિતઃ ॥ ૫૪॥

ચિન્તનં યદિ સન્ત્યક્તં તદા કુત્ર પ્રવર્તતે ।
અપૂર્વં મુનિશાર્દૂલ માયયા પૃચ્છસિ પ્રભો ॥ ૫૫॥

માયયા સર્પજાતિસ્થો નરવદ્ભાષણં સદા ।
કરોતિ નાત્ર સન્દેહો ન તયા દુર્લભં ભવેત્ ॥ ૫૬॥

તસ્ય તદ્વચનં શ્રુત્વા તં પ્રણમ્ય મુનિઃ પુનઃ ।
પપ્રચ્છ તે સ્વરૂપં મે દર્શયસ્વ નમો નમઃ ॥ ૫૭॥

તતો નરાકૃતિર્ભૂત્વા સંસ્થિતો ભગવાન્ સ્વયમ્ ।
શેષો બ્રાહ્મણરૂપસ્થસ્તં જગાદ મહામુનિમ્ ॥ ૫૮॥

પતઞ્જલિરુવાચ ।
તવાઞ્જલૌ મહાભાગ પતિતોઽહં હિતાય તે ।
(Page ખં. ૭ અ. ૯૯ પાન ૪૦)
પતઞ્જલિં ચ માં વિદ્ધિ મુને શેષં ધરાધરમ્ ॥ ૫૯॥

ગણેશાઽનેન વિપ્રેશ પ્રેરિતં માં વિશેષતઃ ।
ભ્રાન્તિનાશાર્થમેવં તે જાનીહિ સહસાઽઽગતમ્ ॥ ૬૦॥

જ્ઞાત્વાઽતિહર્ષિતો વ્યાસઃ પ્રણમ્ય તમુવાચ હ ।
ચિન્તનં ચ કથં નાથ ત્યક્તવ્યં ચિત્તગેન તુ ॥ ૬૧॥

નાનાભાવમિદં દૃષ્ટ્વા તત્ર તત્તાદૃશં ભવેત્ ।
ચિત્તં નાગેન્દ્રવન્દ્ય ત્વં વદસ્વાતિમહાદ્ભુતમ્ ॥ ૬૨॥

યોગશાસ્ત્રં સ્વયં તસ્મૈ જગાદ સ પતઞ્જલિઃ ।
યથા વિઘ્નેશ્વરેણૈવ દર્શિતં તાદૃશં પરમ્ ॥ ૬૩॥

વિપ્રેશોંઽતર્હિતો યોગી શેષઃ સર્વાર્થદાયકઃ ।
વ્યાસસ્તત્ર પ્રજાનાથ ખેદયુક્તો બભૂવ હ ॥ ૬૪॥

શુશ્રાવ સ યથાશાસ્ત્રં પરં શેષમુખાત્ પુરા ।
તથા ચિત્તં સમાગૃહ્ય યોગિવન્દ્યો બભૂવ હ ॥ ૬૫॥

પઞ્ચધા ચિત્તભૂમિસ્થસ્ત્યક્ત્વા તચ્ચિન્તનં સ્વયમ્ ।
ચિન્તામણૌ તદાકારો બભૂવ મુનિસત્તમઃ ॥ ૬૬॥

તસ્ય ભાષ્યં ચકારાપિ વ્યાસો ગૂઢાર્થસિદ્ધયે ।

નરાણાં પ્રહિતાર્થાય સુગમાર્થં પ્રજાપતે ॥ ૬૭॥

ઇદં શેષસ્ય માહાત્મ્યં કથિતં યોગશાન્તિદમ્ ।
અધુના શ‍ૃણુ દક્ષ ત્વં પ્રકૃતં યત્ કથાનકમ્ ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શેષાખ્યાનવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૫.૧૮

## ૫.૧૯ મૂષકદેવસમાગમો નામ એકોનવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
હૃદયાદ્બહિરાગત્ય શેષસ્ય ગણનાયકઃ ।
પુત્રભાવેન સંસ્થોઽભૂન્ મૂષકારૂઢ આદરાત્ ॥ ૧॥

તત ઉત્થાય શેષસ્તં પ્રણનામ કૃતાઞ્જલિઃ ।
પૂજયામાસ સર્વેશં પુનઃ સ પ્રણતોઽભવત્ ॥ ૨॥

અથર્વોપનિષદ્ભિસ્તં તુષ્ટાવ કરસમ્પુટૈઃ ।
નાગેશઃ પ્રાર્થયામાસ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૩॥

શેષ ઉવાચ ।
યોગેશસ્ત્વં ગણાધ્યક્ષ બ્રહ્મણાં નાયકઃ સ્મૃતઃ ।
કથં મે પુત્રભાવેન સંસ્થિતોઽસિ વિડમ્બનમ્ ॥ ૪॥

તતો ગજાનનસ્તં વૈ મોહયામાસ માયયા ।
મોહિતો નાગરાજસ્તં પુત્રં મેને ગજાનનમ્ ॥ ૫॥

શેષઃ સસ્ત્રીક આગૃહ્ય લાલયામાસ બાલકમ્ ।
ક્રમેણ પઞ્ચવર્ષસ્થો બભૂવે તદ્ગૃહે પ્રભુઃ ॥ ૬॥

અથ શ‍ૃણુ પ્રજાનાથ વૃત્તાન્તં દૈત્યસમ્ભવમ્ ।
માયાકરાસુરો દુષ્ટશ્ચકાર કર્મખણ્ડનમ્ ॥ ૭॥

આસુરં કર્મ સર્વત્ર કૃતં તેન દુરાત્મના ।
તેનોપોષણસંયુક્તા બભૂવુર્દેવનાયકાઃ ॥ ૮॥

તતો હાહાકૃતં સર્વૈર્વર્ણાશ્રમયુતૈર્જનૈઃ ।
ન સ્વાહા ન સ્વધાદ્યં વૈ કર્તું કેનાઽપિ શક્યતે ॥ ૯॥

તતો મુનિવરાઃ સર્વે દેવાઃ શમ્ભુપુરોગમાઃ ।
વિચારં દૈત્યનાશાર્થં ચક્રુર્ભયસમન્વિતાઃ ॥ ૧૦॥

તત્રોવાચ મહાયોગી બૃહસ્પતિરુદારધીઃ ।
(Page  ખં. ૫ અ. ૧૯ પાન ૪૧)
ગણેશં ભક્તિસંયુક્તા ભજધ્વં પદપ્રાપ્તયે ॥ ૧૧॥

ચતુઃપદાર્થસંયોગે ગણેશો નિજબોધકઃ ।
ચતુર્ભિર્વર્જિતશ્ચાઽયં હનિષ્યતિ મહાખલમ્ ॥ ૧૨॥

શ્રુત્વા તે ગુરુસંયુક્તાસ્તપસ્તેપુર્મહત્ પ્રભો ।
નિરાહારાદિસંયુક્તા નાનાઽનુષ્ઠાનતત્પરાઃ ॥ ૧૩॥

ગતે વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ ગજાનનઃ ।
આયયૌ તાન્ વરાન્ દાતું ભક્ત્યા તુષ્ટો મહાયશાઃ ॥ ૧૪॥

તં દૃષ્ટ્વા હર્ષસંયુક્તા દેવા મુનય આદરાત્ ।
પ્રણેમુઃ પૂજયામાસુસ્તુષ્ટુવુર્વિવિધૈઃ સ્તવૈઃ ॥ ૧૫॥

વરયામાસુરાદૃત્ય ગણેશં સર્વનાયકમ્ ।
દૈત્યં જહિ ગણાધ્યક્ષ પ્રભો માયાકરાસુરમ્ ॥ ૧૬॥

તથા માયાવિહીનાં વૈ ભક્તિં દેહિ ત્વદીયકામ્ ।
દાસાસ્તે પાદપદ્મસ્ય વયં સર્વે ન સંશયઃ ॥ ૧૭॥

શ્રુત્વા તાન્ ગણરાજસ્તુ જગાદ હર્ષસંયુતઃ ।
માયાકરં હનિષ્યામિ શેષપુત્રોઽહમઞ્જસા ॥ ૧૮॥

યદિ મે વાહનં તત્ર મુખ્યં ભવતિ દેવપાઃ ।
ચતુર્દેવમયં વિપ્રાસ્તદાઽઽરોહં કરોમ્યહમ્ ॥ ૧૯॥

મદીયા ભક્તિરુગ્રા વો ભવિષ્યતિ તુ નિશ્ચિતમ્ ।
સુદૃઢા મે સદા દાસા ભવિષ્યથ વિશેષતઃ ॥ ૨૦॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો દેવનાયકઃ ।
શેષધ્યાનાત્ સમુદ્ભૂતો ભક્તાનાં કાર્યસિદ્ધ્યે ॥ ૨૧॥

અથો દેવર્ષિમુખ્યાસ્તે વિચારં ચક્રુરઞ્જસા ।
ચતુર્દેવમયં તસ્ય વાહનં કીદૃશં ભવેત્ ॥ ૨૨॥

સર્વાંસ્તત્ર શિવઃ સાક્ષાદુક્તવાન્ વાક્યમુત્તમમ્ ।

વેદમૂર્તિમયો દેવઃ સર્વેષાં ગુરુરઞ્જસા ॥ ૨૩॥

શિવ ઉવાચ ।
અયં મૂષકવાહશ્ચ વેદેષુ કથિતોઽભવત્ ।
મૂષસ્તેયે તથા ધાતુર્જ્ઞાતવ્યઃ સ્તેયબહ્મધૃક્ ॥ ૨૪॥

નામરૂપાત્મકં સર્વં તત્રાઽસદ્બ્રહ્મ વર્તતે ।
નામરૂપેષુ યે ભોગાસ્તેષાં ભોક્તા સ્વમાયયા ॥ ૨૫॥

ભોગેષુ ભોગભોક્તા યસ્તદાકારેણ વર્તતે ।
અહઙ્કારયુતાસ્તે વૈ ન જાનન્તિ વિમોહિતાઃ ॥ ૨૬॥

વયં ભોક્તાર એવં તે માનયન્તિ વિશેષતઃ ।
ઈશ્વરઃ સર્વભોક્તા ચ ચૌર્યવૃત્તિષુ સંસ્થિતઃ ॥ ૨૭॥

સ એવ મૂષકઃ પ્રોક્તો મનુજાનાં પ્રચાલકઃ ।
માયયા ગૂઢરૂપો ભોગાન્ ભુનક્તિ સ ચોરવત્ ॥ ૨૮॥

તદ્વજ્જીવનગો દેવઃ સૂર્ય આત્મા વિશેષતઃ ।
નાના જીવેષુ ભોગાન્ ભુનક્તિ વૈ ચૌરવત્ સ્વયમ્ ॥ ૨૯॥

સમેષુ સર્વભોક્તા ચ વિષ્ણુસ્તદ્વન્ન સંશયઃ ।
સદસન્મયરૂપશ્ચ ચૌરવન્ માયયા પ્રભુઃ ॥ ૩૦॥

સહજેષુ તથા દેવઃ શિવો ભોક્તા તુરીયગઃ ।
ચૌરવન્નાઽત્ર સન્દેહો યુતો નિર્મોહમાયયા ॥ ૩૧॥

ભોક્તારં ચૌરભાવસ્થં વાહનં કુરુત પ્રિયાઃ ।
મૂષકાકૃતિરૂપં વૈ દીયતાં ગણપાય તત્ ॥ ૩૨॥

શ્રુત્વા તે હર્ષિતાઃ સર્વે શિવં દેવર્ષયોઽબ્રુવન્ ।
સાધુ સાધુ ત્વયા પ્રોક્તં સર્વજ્ઞસ્ત્વં સદાશિવ ॥ ૩૩॥

તતો ગણેશ્વરં ધ્યાત્વા ચતુર્ભિઃ કલ્પિતં વપુઃ ।
તત્ર સ્વાંશં દદુર્દેવા ભોક્તૃરૂપં પ્રજાપતે ॥ ૩૪॥

તદંશેન સજીવોઽભૂન મૂષકો બલસંયુતઃ ।
બ્રહ્મા દેવર્ષિભિઃ સાર્ધમભિષેકં ચકાર હ ॥ ૩૫॥

અન્તર્બાહ્યાદિકં સ્તેયં પરં સર્વત્ર વર્તતે ।
(Page ખં. ૫ અ. ૧૯ પાન ૪૨)

નાનાવિધં તથૈકં ચ તેષુ રાજાઽયમુચ્યતે ॥ ૩૬॥

અભિષિક્તઃ સ્વયં તત્ર મૂષકો હર્ષિતોઽભવત્ ।
યજ્ઞભાગસ્ય ભોક્તાઽસૌ કૃતો દેવૈઃ સવાસવૈઃ ॥ ૩૭॥

સઙ્ગૃહ્ય સર્વદેવાસ્તં મુનયઃ શેષમન્દિરમ્ ।
આજગ્મુસ્તાન્ સમાલોક્ય શેષશ્ચ વિસ્મિતોઽભવત્ ॥ ૩૮॥

પૂજયામાસ સર્વાન્ સ નાગરાજો મહાયશાઃ ।
નાનાઽઽસનેષુ સંસ્થાપ્ય પુનસ્તાન્ પ્રત્યુવાચ હ ॥ ૩૯॥

શેષ ઉવાચ ।
ધન્યં મે જન્મ દાનં વૈ તપો જ્ઞાનં સ્વભાવજમ્ ।
પિતરો મુનયો દેવા દર્શનાદ્ભવતાં કિલ ॥ ૪૦॥

કિમર્થમાગતાઃ સર્વે વદત માં સુરર્ષયઃ ।
ભવતાં કૃપયા યુક્તઃ કરિષ્યામિ સુભક્તિતઃ ॥ ૪૧॥

તસ્ય તદ્વચનં શ્રુત્વા શઙ્કરઃ સર્વનાયકઃ ।
જગાદ નાગરાજં તં હર્ષયન્ હર્ષવર્ધનઃ ॥ ૪૨॥

શિવ ઉવાચ ।
શેષ શેષ મહાભાગ ધન્યસ્ત્વં સર્વમણ્ડલે ।
તવ પુત્રત્વમાપન્નો બ્રહ્મણાં નાયકઃ પ્રભો ॥ ૪૩॥

મૂષકગોઽવતારોઽયં પઞ્ચવર્ષવયોન્વિતઃ ।
મા પુત્રં તં વિજાનીહિ તપસા ધ્યાનજં પ્રભુમ્ ॥ ૪૪॥

તસ્યેદં વાહનં મુખ્યં ચતુર્દેવકલાંશજમ્ ।
સ્તેયધર્મધરં પૂર્ણં સર્વેષાં હૃદિ વર્તતે ॥ ૪૫॥

અસ્યોપરિ સમારુહ્ય મૂષકગઃ પ્રતાપવાન્ ।
માયાકરાસુરં સદ્યો હનિષ્યતિ ગણેશ્વરઃ ॥ ૪૬॥

એવં તેષાં વચઃ શ્રુત્વા ખેદયુક્તઃ સ નાગરાટ્ ।
ન કિઞ્ચિત્ સઞ્જગૌ દેવાન્ પુત્રવત્સલભાવતઃ ॥ ૪૭॥

તતસ્તં શઙ્કરો દેવ ઉવાચ વચનં પુનઃ ।
મા ખેદં કુરુ કલ્યાણ વિઘ્નહા ન મરિષ્યતિ ॥ ૪૮॥

તપોભિર્વિવિધૈર્દેવૈઃ મુનિભિઃ પ્રાર્થિતોઽભવત્ ।

માયાકરવિનાશાય તવ પુત્રો ગજાનનઃ ॥ ૪૯॥

ત્વયાઽઽદૌ તપસા દેવ આરાધિતો ગજાનનઃ ।
વરદાનપ્રભાવેણ તવ પુત્રો બભૂવ હ ॥ ૫૦॥

એતસ્મિન્નન્તરે મૂષકગસ્તત્ર સમાગતઃ ।
નાગબાલૈર્મહાભાગૈઃ ક્રીડાયુક્તો ગજાનનઃ ॥ ૫૧॥

સમુત્તસ્થુઃ પ્રણેમુસ્તં દૃષ્ટ્વા વિપ્રાઃ સદેવપાઃ ।
તુષ્ટુવુઃ સામવેદસ્થેન સ્તોત્રેણ ગણેશ્વરમ્ ॥ ૫૨॥

તતસ્તાન્ ગણરાજો વૈ વચનં હિતકારકમ્ ।
ઉવાચ વૃણુત પ્રાજ્ઞા વરં મનેપ્સિતં પરમ્ ॥ ૫૩॥

તતોઽતિહર્ષસંયુક્તાસ્તમૂચુસ્તે સુરર્ષયઃ ।
માયાકરાસુરં સ્વામિન્ જહિ સર્વભયઙ્કરમ્ ॥ ૫૪॥

ભક્તિં દેહિ ગણાધીશ તવ પાદે ચ નિશ્ચલામ્ ।
દાસા વયં ગણેશાન પાલયસ્વ વિશેષતઃ ॥ ૫૫॥

તથેતિ તાનુવાચાઽથ વાહનં મે ન વર્તતે ।
અતો યોગ્યં મહાદેવા વાહનં દીયતાં પરમ્ ॥ ૫૬॥

ચતુઃપદાર્થરૂપેભ્યો મરણં ન પ્રવિદ્યતે ।
માયાકરસ્ય દુષ્ટસ્ય કથં કાર્યં મયા સુરાઃ ॥ ૫૭॥

ચતુઃપદાર્થરૂપં મે વાહનં યદિ જાયતે ।
તદાઽહં તં હનિષ્યામિ નાઽત્ર કાર્યા વિચારણા ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે મૂષકદેવસમાગમો નામ એકોનવિંશતિતમોઽધ્યાયઃ ॥ ૫.૧૯
(Page ખં. ૫ અ. ૨૦ પાન ૪૩)

## ૫.૨૦ મૂષકગમાયાકરાસુરસમાગમો નામ વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
મૂષકગવચઃ શ્રુત્વા દેવેન્દ્રા હર્ષિતા બભુઃ ।
ઊચુઃ પ્રાઞ્જલયસ્તં તે વિઘ્નેશં વિઘ્નવારણમ્ ॥ ૧॥

દેવર્ષય ઊચુઃ ।
ચતુર્બ્રહ્મમયં દેવ વાહનં તે પ્રવર્તતે ।
સ્વાનન્દે મૂષકાખ્યં ચ સર્વભોગકરં પરમ્ ॥ ૨॥

અધુના ભોગકારં તુ ચતુર્ભિઃ શિવમુખ્યકૈઃ ।
કૃતં સ્વસ્વકલાંશેન વાહનં તે ગજાનન ॥ ૩॥

જીવેષુ સર્વભોક્તા વૈ ચૌરવત્ પરમેશ્વરઃ ।
તદેવ વાહનં તેઽભૂદ્ ગૃહાણ સ્તેયરૂપિણમ્ ॥ ૪॥

એવમુક્ત્વા ગણેશાનં દેવા મુનિસમન્વિતાઃ ।
તુષ્ટુવુસ્તં મહાવીર્યં મૂષકં મૂષકાકૃતિમ્ ॥ ૫॥

દેવર્ષય ઊચુઃ ।
નમસ્તે સ્તેયરૂપાય સર્વહૃત્સ્થાય ધીમતે ।
અન્તર્ભોગકરાયૈવ મૂષકાય નમો નમઃ ॥ ૬॥

માયયા સ્તેયરૂપિણ્યા મોહયિત્વા ચરાચરમ્ ।
ચૌરવદ્ભોગકર્તા ત્વં ચૌરરૂપાય તે નમઃ ॥ ૭॥

ચરાચરમયાયૈવ ચરાચરધરાય તે ।
સર્વાધીશાય લોકાય કાલકાલાય તે નમઃ ॥ ૮॥

અનાદયે મહેશાય ચતુર્વર્ગપ્રદાયિને ।
ગણેશવાહનાયૈવ ગણેશધ્વજસંસ્થિત ॥ ૯॥

સર્વત્રગ ગણાધીશસ્ત્વયા હૃત્સ્થ ન સંશયઃ ।
ચાલકાત્મકવીર્યં યદ્ગણેશસ્ય ત્વમઞ્જસા ॥ ૧૦॥

બ્રહ્માકારશરીરાય સ્તેયાનાં સ્વસ્વરૂપિણે ।
નમો નમઃ પરેશાય ચતુર્મયસ્વરૂપિણે ॥ ૧૧॥

ચતુર્ણાં ગણપઃ પાતા ત્વયા તદ્રૂપધારિણા ।
ભવ વાહનમુખ્યં વૈ ગણેશસ્યાઽધુના પ્રભો ॥ ૧૨॥

ઇતિ સ્તુતઃ પ્રસન્નાત્મા મૂષકસ્તાનુવાચ હ ।
ભવિષ્યામિ મહાભાગા વાહનં ગણપસ્ય ચ ॥ ૧૩॥

એવમુક્ત્વા ગણેશાનં પ્રભું તુષ્ટાવ લબ્ધધીઃ ।
મૂષકો દર્શનેનૈવ હર્ષયુક્તો મહાદ્યુતિઃ ॥ ૧૪॥

મૂષક ઉવાચ ।
દેવાય યોગરૂપાય નમો મૂષકગાય તે ।
ગણેશાય પરેશાય પરાત્પરતરાય તે ॥ ૧૫॥

અનન્તાય મહેશાય મહેશૈઃ સંસ્તુતાય ચ ।
વિઘ્નેશાય મહાવિઘ્નધારિણે તે નમો નમઃ ॥ ૧૬॥

અનન્તસૂનવે તુભ્યં દૈત્યદાનવમર્દિને ।
દેવાનાં પાલકાયૈવ હેરમ્બાય નમો નમઃ ॥ ૧૭॥

સ્વાનન્દવાસિને તુભ્યં ભક્તસ્વાનન્દદાયિને ।
બ્રહ્મણે બ્રહ્મણાં ચૈવ પતયે તે નમો નમઃ ॥ ૧૮॥

ચતુર્ણાં ચાલકાયૈવ ચતુઃસંયોગમૂર્તયે ।
ચતુર્ણાં પદદાત્રે તે તૈર્હીનાય નમો નમઃ ॥ ૧૯॥

યોગેશયોગરૂપાય યોગિભ્યો યોગદાયિને ।
શાન્તિરૂપાય વૈ તુભ્યં શાન્તિદાય નમો નમઃ ॥ ૨૦॥

મૂષકવાહનાયૈવ મૂષકધ્વજિને નમઃ ।
સિદ્ધિબુદ્ધિપતે નાથ ભક્તેશાય નમો નમઃ ॥ ૨૧॥

વેદવાક્યપ્રમાણેન માં કુરુષ્વ ગજાનન ।
વાહનં ભક્તિસંયુક્તં સેવાયૈ તે નમો નમઃ ॥ ૨૨॥

ઇદં મૂષકગો નામ મદીયં તુ ત્વયા ધૃતમ્ ।
અતોઽભેદમયીં ભક્તિં દેહિ નાથ નમો નમઃ ॥ ૨૩॥

મદીયનાથરૂપેણ નામ તે ચાઽભવત્ પ્રભો ।
તતો મૂષકગો ભક્તં માં કુરુષ્વ મહાદ્ભુતમ્ ॥ ૨૪॥

એવં સ્તુત્વા ગણાધીશં પ્રણનામ સ દણ્ડવત્ ।
ભક્તિસંયુતમુત્થાપ્ય ગણાધીશો જગાદ તમ્ ॥ ૨૫॥

મૂષકગ ઉવાચ ।
વાહનં મે સદા સાધો ભવિષ્યસિ મહામતે ।
(Page  ખં. ૫ અ. ૨૦ પાન ૪૪)
મદીયા ભક્તિરત્યન્તં સુદૃઢા તે ભવિષ્યતિ ॥ ૨૬॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં ભક્તિદં ભવેત્ ।

ધર્માર્થકામમોક્ષાણાં દાયકં સર્વદં પરમ્ ॥ ૨૭॥

પઠતે શ‍ૃણ્વતે ચૈતત્ પુત્રપૌત્રાદિકપ્રદમ્ ।
યદ્યદિચ્છતિ તત્તદ્વૈ સફલં પ્રભવિષ્યતિ ॥ ૨૮॥

અન્યત્ત્વં શ‍ૃણુ મે વાક્યં દેવૈર્વિપ્રૈઃ કૃતં મહત્ ।
સ્તવનં સર્વમાન્યં તે ભવિષ્યતિ ન સંશયઃ ॥ ૨૯॥

યસ્ત્વાં સ્તોષ્યતિ ચૌરેશસ્તોત્રેણાનેન માનવઃ ।
સ સર્વં લભતે નિત્યમીપ્સિતં નાઽત્ર સંશયઃ ॥ ૩૦॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યતિ ।
મદીયકૃપયા સોઽપિ ત્વત્સમો મે પ્રિયો ભવેત્ ॥ ૩૧॥

એવમુક્ત્વા મહાદેવં મૂષકં ગણનાયકઃ ।
તમારુહ્ય યયૌ તત્ર યત્ર દૈત્યાધિપોઽભવત્ ॥ ૩૨॥

તે દેવરાજાસ્તમનુદેવાશ્ચ મુનયઃ પ્રભો ।
નાગાઃ શેષમુખાઃ સર્વે યયુર્બ્રહ્મસમન્વિતાઃ ॥ ૩૩॥

બ્રહ્માણં પ્રેષયામાસ મૂષકગઃ પ્રતાપવાન્ ।
દૂતં માયાકરસ્યાઽગ્રે બોધાર્થં નીતિપાલકઃ ॥ ૩૪॥

ગત્વા તમસુરં બ્રહ્મા જગાદ વચનં હિતમ્ ।
આખુવાહં ચ શરણં યાહિ નો ચેન્ મરિષ્યસિ ॥ ૩૫॥

ચતુર્ણાં બ્રહ્મણાં મૂષકગો યોગે પ્રકીર્તિતઃ ।
સ્વાનન્દવાસકારી સ ગણેશોઽયં વિચારય ॥ ૩૬॥

સુરાસુરમયશ્ચાયં ગચ્છતં ભક્તિસંયુતઃ ।
મમ પુત્રત્વમાપન્નો હિતં તે પ્રવદામ્યહમ્ ॥ ૩૭॥

બ્રહ્મણો વચનં શ્રુત્વા ક્રોધયુક્તસ્તમબ્રવીત્ ।
માયાકરાસુરઃ પાપી પાપયુક્તેન ચેતસા ॥ ૩૮॥

માયાકરાસુર ઉવાચ ।
ત્વં દેવપક્ષગો ભૂત્વા મોહનાર્થં સમાગતઃ ।
પઞ્ચમં બ્રહ્મ સર્વત્ર યોગરૂપં પ્રતિષ્ઠતિ ॥ ૩૯॥

તદેવ નાગતં કુત્ર ન ગતં ચ પ્રજાપતે ।
સમાગતં ગણેશાનં તં હનિષ્યામિ સામરમ્ ॥ ૪૦॥

ત્વં ગચ્છ દૂતરૂપેણાગતસ્તસ્માન્ મહામતે ।
સહામિ તેઽપરાધં વૈ નોચેદ્ધન્મિ સુરપ્રિયમ્ ॥ ૪૧॥

તતો બ્રહ્મા ગણેશાનમાયયૌ પ્રણિપત્ય તમ્ ।
વૃત્તાન્તં કથયામાસ તચ્છ્રુત્વા ક્રોધમાદધે ॥ ૪૨॥

દેવાનાજ્ઞાપયામાસ જેતું મૂષકગોઽપિ તમ્ ।
તતસ્તે શસ્ત્રસઙ્ઘાતૈર્જઘ્નુર્દૈત્યગણાન્ મૃધે ॥ ૪૩॥

અસુરાઃ છિન્નભિન્નાસ્તે પપલુર્ગુલ્મસંસ્થિતાઃ ।
સભાસીનં સમાચખ્યુર્વચો માયાકરાસુરમ્ ॥ ૪૪॥

દૈત્યા ઊચુઃ ।
કિં સ્થિતોઽસિ મહાવીર દેવાઃ ક્રોધસમન્વિતાઃ ।
આગતા નગરં સર્વં તેષામસ્ત્રૈઃ સુપીડિતમ્ ॥ ૪૫॥

તેષાં તદ્વચનં શ્રુત્વા ક્રોધયુક્તઃ સમાયયૌ ।
પ્રધાનૈરસુરૈઃ સર્વૈઃ સંવૃતો રણમણ્ડલમ્ ॥ ૪૬॥

માયાકરં સમાલોક્ય પપલુર્દેવસત્તમાઃ ।
આગમ્ય તં મૂષકગં શશંસુશ્ચેષ્ટિતં મહત્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે મૂષકગમાયાકરાસુરસમાગમો નામ વિંશોઽધ્યાયઃ ॥ ૫.૨૦
(Page ખં. ૫ અ. ૨૧ પાન ૪૫)

## ૫.૨૧ મૂષકગાવતારચરિતં નામ એકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
માયાકરાસુરં વીક્ષ્ય તુતોષ ગણનાયકઃ ।
મૂષકં સ સમારુહ્ય યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૧॥

ચતુરાયુધસંયુક્તં દૃષ્ટ્વા વિઘ્નેશ્વરં ખલઃ ।
દૈત્યાનાજ્ઞાપયામાસ દેવાનાં હનનાય સઃ ॥ ૨॥

તતો દૈત્યગણાઃ સર્વે ક્રોધયુક્તા મહાબલાઃ ।

વવૃષુઃ શસ્ત્રધારાભિર્મેઘા ઇવ સુદુર્મદાઃ ॥ ૩॥

દૃષ્ટ્વા દેવગણાઃ ક્રુદ્ધા યુયુધુસ્તાન્ સમાગતાન્ ।
એવં યુદ્ધં મહાઘોરં સૈન્યયોરુભયોરભૂત્ ॥ ૪॥

પરસ્પરં મમ્રુરેત્ય સમ્મુખં તે જયેપ્સવઃ ।
રક્તૌઘૈઃ સરિતસ્તત્ર સઞ્જાતા ભયદાયિકાઃ ॥ ૫॥

કદાચિજ્જયિનો દૈત્યાઃ કદાચિદમરા મૃધે ।
ન રાત્રૌ વિશ્રમં તે તુ ચક્રિરે ક્રોધસંયુતાઃ ॥ ૬॥

એવં દિનાનિ સપ્તૈવ યુયુધુઃ શસ્ત્રકોવિદાઃ ।
પલાયન્તામરા ભિન્ના હાહારવકરા ભૃશમ્ ॥ ૭॥

તદ્ દૃષ્ટ્વા શઙ્કરઃ ક્રુદ્ધ આયયૌ રણમણ્ડલે ।
તતો વિષ્ણુમુખા દેવા યુયુધુઃ ક્રોધસંયુતાઃ ॥ ૮॥

તેષાં શસ્ત્રપ્રહારેણ મૃતા દૈત્યા અનેકશઃ ।
પ્રજાપતે પલાયન્ત ભયભીતા દિશો દશ ॥ ૯॥

મૂર્ચ્છિતા દૈત્યરાજાસ્તે સર્વે ભૂતલમાશ્રિતાઃ ।
દૃષ્ટ્વા સિંહરવં માયાકરઃ કૃત્વા સમાગતઃ ॥ ૧૦॥

ક્રોધયુક્તો મહાદૈત્યઃ શસ્ત્રવૃષ્ટિં ચકાર હ ।
તયા દેવાઃ ક્ષતા ભૂમૌ પેતુઃ સર્વે પ્રજાપતે ॥ ૧૧॥

અગ્ન્યસ્ત્રેણ મહાદૈત્યઃ પાતયામાસ શઙ્કરમ્ ।
અન્યે દાહયુતાઃ સર્વે પલાયન્ત દિશો દશ ॥ ૧૨॥

એવં મૂષકગસ્તસ્ય બલં દૃષ્ટ્વા તુતોષ હ ।
સ્વયં સમાગતો હર્ષાદ્રણભૂમૌ મહાબલઃ ॥ ૧૩॥

દૃષ્ટ્વા મૂષકસંસ્થં તમવોચદ્ દૈત્યનાયકઃ ।
ક્રોધયુક્તઃ પ્રહસ્યાઽઽદૌ વચનં મદ્યપો યથા ॥ ૧૪॥

માયાકરાસુર ઉવાચ ।
કિં સઙ્ગ્રામાય વિઘ્નેશ મયા સહ સમાગતઃ ।
એકબાણેન હત્વા ત્વાં હનિષ્યામિ સુરાન્ મુનીન્ ॥ ૧૫॥

ચતુઃપદાર્થરૂપં વૈ જગત્ સર્વં પ્રવર્તતે ।
તસ્માન્મે મરણં નાસ્તિ કિં કરિષ્યસિ દેવપ ॥ ૧૬॥

બ્રહ્માણ્ડં નિર્જિતં યેન તેન સાર્ધં ગજાનન ।
યોદ્ધુમિચ્છસિ બાલઃ સન્ બાલભાવાન્ન સંશયઃ ॥ ૧૭॥

નત્વા માં સ્વગૃહં યાહિ ન હનિષ્યામિ નિશ્ચિતમ્ ।
ત્વામજ્ઞાનસમાયુક્તં પ્રેરકાંસ્તાન્નિહન્મ્યહમ્ ॥ ૧૮॥

નામ મૂષકગસ્તેચાખુતુલ્યસ્ત્વં મતો મમ ।
મૂર્ખવન્નૈવ જાનાસિ માં સર્વભયદાયકમ્ ॥ ૧૯॥

એવં માયાકરં વીક્ષ્ય બ્રુવન્તં સ્વપરાક્રમમ્ ।
મૂષકગસ્તમેવં વૈ જગાદ વચનં હિતમ્ ॥ ૨૦॥

મૂષકગ ઉવાચ ।
કિં માં વદસિ દૈત્યેન્દ્ર નાઽહં બાલોઽસુરાધમ ।
સ્વાનન્દવાસકારી વૈ ત્વાં હન્તું રૂપવાન્ પરઃ ॥ ૨૧॥

હનિષ્યામિ ન સન્દેહશ્ચતુર્ભિર્વર્જિતોઽધુના ।
બાલસ્ય પશ્ય મે મૂર્ખ પૌરુષં દૈત્યનાયક ॥ ૨૨॥

ઇત્યુક્ત્વા ક્રોધસંયુક્તઃ કમલં નિજહસ્તગમ્ ।
બિન્દુબ્રહ્મમયં જ્યોતિસ્તત્યાજ મૂષકેશગઃ ॥ ૨૩॥

આગતં કમલં દૃષ્ટ્વા જ્યોતીરૂપમયં મહત્ ।
માયાકરાસુરસ્તદ્વૈ જગ્રાહ બલગર્વિતઃ ॥ ૨૪॥

ગૃહીતં દૈત્યરાજેન હસ્તગં ન ચ હસ્તગમ્ ।
પપાત કણ્ઠદેશેઽસ્ય મમાર દૈત્યનાયકઃ ॥ ૨૫॥

કમલં ગણરાજસ્ય હસ્તગં પુનરઞ્જસા ।
(Page ખં. ૫ અ. ૨૧ પાન ૪૬)
બભૂવ ચાસુરેશાના વિસ્મિતાઃ સમ્બભૂવિરે ॥ ૨૬॥

અહો માયાકરો રાજા કથં મમાર ગર્વિતઃ ।
શરીરં યાદૃશં તસ્ય તાદૃશં દૃશ્યતેઽધુના ॥ ૨૭॥

તેજઃ સમાગતં હ્યત્ર તેન તેજો હૃતં મૃધે ।
શસ્ત્રઘાતવિહીનોઽયં મમાર દૈત્યનાયકઃ ॥ ૨૮॥

તતો દૈત્યગણાઃ સર્વે ભયભીતાઃ સમન્તતઃ ।

પાતાલં વિવિશુર્દક્ષ દેવા હર્ષયુતા બભુઃ ॥ ૨૯॥

મૂષકગં નમસ્કૃત્ય મુનિભિસ્તત્ત્વકોવિદૈઃ ।
સર્વે પુપૂજુર્દેવેશાસ્તુષ્ટુવુઃ કરસમ્પુટૈઃ ॥ ૩૦॥

દેવર્ષય ઊચુઃ ।
સર્વેષાં ભોગભોક્ત્રે મૂષકગાય નમો નમઃ ।
સર્વદેવાધિદેવાય ગણેશાય નમો નમઃ ॥ ૩૧॥

લમ્બોદરાય વિઘ્નાનાં નાયકાય પરાત્મને ।
ભક્તાનાં વિઘ્નહર્ત્રે તે વિઘ્નદાત્રે દુરાત્મનામ્ ॥ ૩૨॥

હેરમ્બાય નમસ્તુભ્યં ભક્તવત્સલરૂપિણે ।
સ્વાનન્દવાસિને ચૈવ પરેશાય નમો નમઃ ॥ ૩૩॥

મહોદરાય પૂજ્યાય સર્વેષાં સર્વરૂપિણે ।
સર્વાદિપૂજ્યકાયૈવ વક્રતુણ્ડાય તે નમઃ ॥ ૩૪॥

ત્રિનેત્રાય ચતુર્હસ્તકમલસ્ય ધરાય તે ।
મૂષકોપરિસંસ્થાય જ્યેષ્ઠરાજાય તે નમઃ ॥ ૩૫॥

અમેયાય ગણાધ્યક્ષ શૂર્પકર્ણપ્રધારિણે ।
સર્વેશાય નમસ્તુભ્યં બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૩૬॥

અનાદયે તથા મધ્યે નાનારૂપધરાય તે ।
અન્તે તાદૃશરૂપાય ત્રિસ્વરૂપાય વૈ નમઃ ॥ ૩૭॥

શેષપુત્રાય શૈવાય પારાશર્યાય તે નમઃ ।
સર્વેષાં જનકાયૈવ માત્રે બ્રહ્મેશ તે નમઃ ॥ ૩૮॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ગણેશાય નમો નમઃ ।
શાન્તિરૂપાય શાન્તિભ્યઃ શાન્તિદાય નમો નમઃ ॥ ૩૯॥

અપારગુણધારાય યોગિનાં હૃદિ સંસ્થિત ।
તત્ કિં સ્તુમો નઃ પ્રસીદ ગણાધીશ નમો નમઃ ॥ ૪૦॥

એવં સ્તુત્વા ગણેશાનં પ્રણેમુસ્તે સુરર્ષયઃ ।
પ્રસન્નાત્મા મૂષકગસ્તાનુવાચ પ્રહર્ષિતઃ ॥ ૪૧॥

મૂષકગ ઉવાચ ।
કૃતં મે સ્તવનં સર્વૈર્ભવદ્ભિઃ સર્વદં ભવેત્ ।

યદ્યદિચ્છથ તત્તદ્દાસ્યામિ વૈ ભક્તિતન્ત્રિતઃ ॥ ૪૨॥

પઠતાં શ ૃણ્વતાં નિત્યં સ્વાધીનોઽહં ભવામિ ચ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં પુત્રપૌત્રાદિવર્ધનમ્ ॥ ૪૩॥

વરં વૃણુત દેવેશા દેવા મુનિસમન્વિતાઃ ।
દાસ્યામિ સ્તોત્રતુષ્ટોઽહં વાઞ્છિતં નાત્ર સંશયઃ ॥ ૪૪॥

દેવર્ષય ઊચુઃ ।
માયાકરાસુરસ્યૈવ ત્વયા નાશઃ કૃતો મહાન્ ।
તેન તુષ્ટા ગણાધીશ કિં વદામો વરં પરમ્ ॥ ૪૫॥

ભક્તિં દેહિ દૃઢાં નાથ ત્વદીયાં શાન્તિદાયિનીમ્ ।
તયા વયં ગણેશાન કૃતકૃત્યા ન સંશયઃ ॥ ૪૬॥

તથેતિ તાનુવાચાથ ગણેશોંઽતર્દધે સ્વયમ્ ।
દેવાઃ ખિન્ના યયુઃ સર્વે સ્વસ્વસ્થાનં નિરામયાઃ ॥ ૪૭॥

મુનયઃ સ્વાશ્રમં જગ્મુર્મહાહર્ષસમન્વિતાઃ ।
પૂર્વવત્ કર્મકર્તારો બભૂવુઃ સર્વજન્તવઃ ॥ ૪૮॥

શેષઃ સમ્મૂર્ચ્છિતસ્તત્ર પપાત ધરણીતલે ।
હૃદિ તસ્ય ગણેશાનઃ પ્રકટોઽભૂચ્ચ તત્ક્ષણાત્ ॥ ૪૯॥

જગાદ તં મહાનાગં મન્મૂર્તિસ્થાપનં કુરુ ।
તત્ર પૂજાપરો ભૂત્વા કાલં ક્રામ ચ સર્પપ ॥ ૫૦॥

પાતાલવિવરે ક્ષેત્રં ભવિષ્યતિ સુસિદ્ધિદમ્ ।
તત્ર માં પૂજયિષ્યન્તિ તેભ્યઃ સર્વં દદામ્યહમ્ ॥ ૫૧॥

(Page ખં. ૫ અ. ૨૨ પાન ૪૭)
એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
શેષઃ સ્વગૃહમાગત્ય તથા ચક્રે સ ભાવતઃ ॥ ૫૨॥

શતયોજનપર્યન્તં ક્ષેત્રં ગણપતેઃ સ્મૃતમ્ ।
પાતાલે સિદ્ધિદં સર્વં સ્વાનન્દં કથ્યતેઽપરમ્ ॥ ૫૩॥

તત્ર પૂજનમાત્રેણ વાઞ્છિતં લભતે નરઃ ।
અનુષ્ઠાનવિધાનેન બ્રહ્મભૂયં લભેત્તથા ॥ ૫૪॥

ઇદં તે કથિતં દક્ષ મૂષકગસ્ય ચેષ્ટિતમ્ ।

ભુક્તિમુક્તિપ્રદં પૂર્ણં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૫૫॥

જગત્સુ બ્રહ્મસુ સ્થિત્વા ચૌરવદ્ ગણનાયકઃ ।
ભુનક્તિ ભોગકાન્ સર્વાંસ્તેનાઽયં મૂષકધ્વજઃ ॥ ૫૬॥

ભક્તાનાં સ્મરણેનાઽયં પુણ્યપાપભવં મલમ્ ।
હૃત્વા બ્રહ્મમયાંસ્તાંશ્ચ કુરુતે મૂષકધ્વજઃ ॥ ૫૭॥

જ્યેષ્ઠશુક્લચતુર્થ્યાં મહોત્સવો વૈ પ્રવર્તતે ।
જનુસ્તિથિર્ગણેશસ્યાઙ્ગારકી મધ્યગે રવૌ ॥ ૫૮॥

સ્તેયાનાં વિવિધાનાં સ રાજવાહોઽયમુચ્યતે ।
તતો મૂષકગો લમ્બોદરઃ પ્રોક્તઃ પ્રજાપતે ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે મૂષકગાવતારચરિતં નામ એકવિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૧

## ૫.૨૨ શક્તિપુત્રચરિતં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
લમ્બોદરાવતારો મૂષકગોઽયં પ્રકીર્તિતઃ ।
સ એવ શક્તિપુત્રોઽભૂત્તચ્છૃણુષ્વ પ્રજાપતે ॥ ૧॥

શક્તિલોકસ્થિતા દેવી નિર્મમે સકલં જગત્ ।
તદ્રક્ષણવિહારાર્થં ત્રિધાઽભૂત્ સાઽપિ માયયા ॥ ૨॥

મહાકાલી તથા દક્ષ મહાલક્ષ્મીઃ પ્રકીર્તિતા ।
મહાસરસ્વતી પ્રોક્તા ભક્તાનાં ભેદનાશનાત્ ॥ ૩॥

તાભ્યો નાનાવિધા જાતા દેવ્યો દુર્ગાદિકાઃ કિલ ।
દેવીભિઃ સહિતા સાઽપિ તતાપ તપ ઉત્તમમ્ ॥ ૪॥

એકાક્ષરવિધાનેન દિવ્યવર્ષસહસ્રકમ્ ।
તતઃ પ્રસન્નભાવન વિઘ્નેશો વરદોઽભવત્ ॥ ૫॥

સ્તુતઃ સમ્પૂજિતસ્તાભિર્વરં ચિત્તેપ્સિતં દદૌ ।
બહુત્વાન્નો કથયિતું ભવેચ્છક્યં પ્રજાપતે ॥ ૬॥

વરસ્યૈવ પ્રભાવેણ સ્વસ્વકાર્યરતા બભુઃ ।

દેવ્યો લમ્બોદરં નિત્યં ભજન્તે કુલદૈવતમ્ ॥ ૭॥

આદિશક્તિર્મહામાયા શાન્ત્યર્થં પુનરારભત્ ।
તપો દુષ્કરમત્યન્તં તતઃ શાન્તિમવાપ સા ॥ ૮॥

તથાપિ તપસા યુક્તા પુપૂજ ગણનાયકમ્ ।
તતો વર્ષેષુ પૂર્ણેષુ શતે હૃદિ સમાગતઃ ॥ ૯॥

તં દૃષ્ટ્વા હૃદિ સંસ્થં સા તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ।
તતો બહિર્વિનિઃસૃત્ય જગાદ જગદમ્બિકામ્ ॥ ૧૦॥

પુત્રોઽહં તે મહાભાગે ધ્યાનજો નાઽત્ર સંશયઃ ।
પશ્ય માં ત્વં મહામાયે સ્થિતં લમ્બોદરં બહિઃ ॥ ૧૧॥

સા પ્રબુદ્ધા બહિર્લમ્બોદરં વીક્ષ્ય તુતોષ હ ।
(Page ખં. ૫ અ. ૨૩ પાન ૪૮)
અથર્વશિરસા દેવી તુષ્ટવાપૂજ્ય સાશ્રુકા ॥ ૧૨॥

તુષ્ટસ્તાં ગણરાજશ્ચ જગાદ વૃણુ વાઞ્છિતમ્ ।
દાસ્યામિ ભક્તિયુક્તાયૈ પુત્રોઽહં પાલયસ્વ મામ્ ॥ ૧૩॥

શક્તિરુવાચ ।
અનેન વપુષા નાથ સ્થિરો ભવ ગજાનન ।
ભક્તિં દેહિ દૃઢાં વત્સ તવ પાદામ્બુજે પરામ્ ॥ ૧૪॥

યોગિનાં ધ્યાનજં બ્રહ્મ પુત્રો વેદે પ્રકીર્તિતઃ ।
તત્ર કિં ચિત્રમેવેદં વિનાયક કૃતં ત્વયા ॥ ૧૫॥

શ્રુત્વા તાં ગણરાજસ્તુ જગાદ વચનં હિતમ્ ।
મન્મૂર્તિસ્થાપનં કૃત્વા પૂજયસ્વ નિરન્તરમ્ ॥ ૧૬॥

પુત્રવત્સલતાં તત્ર કુલદેવત્વમાદરાત્ ।
બ્રહ્મભાવં તથા દેવિ કુરુ ત્વં સર્વદા મયિ ॥ ૧૭॥

તત્ર પૂજોપચારાદ્યૈઃ પૂજયસ્વ નિરન્તરમ્ ।
તયા ત્વં કૃતકૃત્યા ચ ભક્તિયુક્તા ભવિષ્યસિ ॥ ૧૮॥

એવમુક્ત્વાંઽતર્દધેઽસૌ લમ્બોદરઃ પ્રજાપતે ।
શક્તિસ્તથૈવ કૃત્વા તં ભજતે બ્રહ્મનાયકમ્ ॥ ૧૯॥

એવં નાનાઽવતારાશ્ચ લમ્બોદરસ્ય માનદ ।

ભક્તાનાં સર્વસિદ્ધ્યર્થં ભજતાં પરમાદ્ભુતાઃ ॥ ૨૦॥

રક્તદન્તાદિભિશ્ચૈવ દેવીભિસ્તપસા પ્રભુઃ ।
આરાધિતો વધાર્થાય દૈત્યાનાં ગણનાયકઃ ॥ ૨૧॥

દેવીભિઃ સંસ્તુતો દેવઃ પ્રસન્નો વરદોઽભવત્ ।
વરસ્યૈવ પ્રભાવેણ હતા દૈત્યા અનેકશઃ ॥ ૨૨॥

યોગનિષ્ઠા મહાદેવ્યોઽભજંસ્તં વિઘ્નનાશનમ્ ।
કુલદૈવતભાવેન શાન્ત્યર્થં ચ પ્રજાપતે ॥ ૨૩॥

તે સર્વે ગણરાજા વૈ સ્મૃતા લમ્બોદરાત્મકાઃ ।
જ્ઞાતવ્યાઃ સર્વભાવેન બ્રહ્મભૂતપદપ્રદાઃ ॥ ૨૪॥

ઇદં લમ્બોદરસ્યૈવાવતારસ્ય કથામૃતમ્ ।
શ‍ૃણોતિ પઠતે વાપિ સ સર્વફલભાગ્ ભવેત્ ॥ ૨૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શક્તિપુત્રચરિતં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૫.૨૨

## ૫.૨૩ ગાણપત્યદીક્ષાવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અથો શ‍ૃણુ મહાભાગ ગાણપત્યસ્વરૂપકમ્ ।
યેન ત્વં ગાણપત્યે વૈ પદે સુનિપુણો ભવેઃ ॥ ૧॥

નરો ગણેશભક્તિં યો ભવેત્ કર્તું સમુદ્યતઃ ।
ગણેશપ્રીતિકામાર્થં દીક્ષાયુક્તો ભવેદયમ્ ॥ ૨॥

ગાણપત્યં સુશાન્તિસ્થં ગુરું વેદાર્થપારગમ્ ।
નત્વા તં સંવદેત્ પૂર્વં દીક્ષાં દેહિ મહાપ્રભો ॥ ૩॥

ત્વમેવ ગણરાજોઽસિ ગાણપત્યપરાયણઃ ।
માં કુરુષ્વ મહાભાગ ગાણપત્યં સુશીલકમ્ ॥ ૪॥

એવં પૃષ્ટો ગુરુઃ શિષ્યં વદેદ્ દૃષ્ટ્વા સુશીલગમ્ ।
શ્રૌતસ્માર્તક્રિયાયુક્તં ગણેશભાવલાલસમ્ ॥ ૫॥

તતસ્તં શિક્ષયેદાદૌ ધર્માન્ ગાણેશકાન્ પરાન્ ।

તાંસ્તુભ્યં કથયામ્યેવ શ‍ૃણુ સર્વસુખપ્રદાન્ ॥ ૬॥

(Page ખં. ૫ અ. ૨૩ પાન ૪૯)
પરાન્નં ભક્ષયેન્નૈવાલોકયેન્ન રજસ્વલામ્ ।
પરસ્ત્રીગમનં ક્વાપિ ન કુર્યાન્ મનસાઽપિ સઃ ॥ ૭॥

સ્વાર્થાય ક્રોધસંયુક્તો ન ભવેલ્લોભસંયુતઃ ।
અભક્ષ્યભક્ષણં નૈવ કુર્યાત્ હિંસાં કદાપિ ન ॥ ૮॥

ગુરુદ્રોહં ચ પૈશૂન્યં જ્યેષ્ઠાનામપમાનકમ્ ।
વેદશાસ્ત્રાદિમાર્ગેભ્યો હીનં નૈવ સમાચરેત્ ॥ ૯॥

ઇહામુત્ર વિરક્તઃ સ ભવેદ્બ્રહ્મપરાયણઃ ।
ઇત્યાદિવિવિધાન્ ધર્માનુપદિશ્ય મનું દિશેત્ ॥ ૧૦॥

આદૌ કૃચ્છ્રાદિકં તસ્મૈ દાપયેચ્ચ તતઃ પરમ્ ।
ગાણપત્યાન્ સમાજ્ઞાપ્ય સુદિનં ત્વવલોકયેત્ ॥ ૧૧॥

અથવા ગણરાજસ્યોત્સવદાં તિથિમાદરાત્ ।
ચતુર્થીં શુક્લપક્ષસ્થાં વા કૃષ્ણામવલોકયેત્ ॥ ૧૨॥

ગણેશપ્રિયકાલં વા સમાલોક્ય સુસિદ્ધિદઃ ।
ગુરુઃ શિષ્યાય મન્ત્રં વૈ દદ્યાદ્ભક્ત્યર્થમાદરાત્ ॥ ૧૩॥

શ‍ૃણુ તત્ર વિધિં દક્ષ કથયામિ સુખપ્રદમ્ ।
શુચૌ મણ્ડપિકાં કૃત્વા ગોમયેનાઽવલેપયેત્ ॥ ૧૪॥

મૃન્મયાં તુ સ્વયં તત્ર વેદિં કુર્યાદ્વિચક્ષણઃ ।
ચતુરસ્રાં ચ તન્મધ્યે દિક્ષુ સંસ્થાપયેદ્ ઘટાન્ ॥ ૧૫॥

આદૌ ગણેશયન્ત્રં સ્વં કુઙ્કુમેનાત્ર કારયેત્ ।
સ્વેષ્ટમષ્ટગણેશાનાન્ પૂજયેદ્ વિધિપૂર્વકમ્ ॥ ૧૬॥

દીક્ષાયુક્તાંશ્ચ ગાણેશાન્ પૂજયેત્ સ તતઃ પરમ્ ।
તેભ્યો ભૂષણવસ્ત્રાદીન્ દાપયેચ્છાઠ્યવર્જિતઃ ॥ ૧૭॥

ગાણેશેનૈવ મન્ત્રેણ સ જપં કારયેત્તુ તૈઃ ।
પુરશ્ચરણસઙ્ખ્યાકમથવા લક્ષમાદરાત્ ॥ ૧૮॥

અથવા દશસાહસ્રમથવા ચ સહસ્રકમ્ ।
તદ્દશાંશેન હોમં વૈ કુર્યાત્તત્ર મહામતિઃ ॥ ૧૯॥

તતો બલિપ્રદાનં વૈ કુર્યાત્ પૂર્ણાહુતિં તતઃ ।
પુનઃ સમ્પૂજ્ય વિઘ્નેશં સ પ્રણમ્ય તતો ગુરુમ્ ॥ ૨૦॥

પ્રાર્થયેત્ સર્વભાવેન શિષ્યં માં તારય પ્રભો ।
મન્ત્રં દેહિ મહાભાગ ગાણપત્યં વિશેષતઃ ॥ ૨૧॥

પુનર્ગુરું સમભ્યર્ચ્ય તતઃ સકલશં પુનઃ ।
સ્થાપયેત્ સ્વેષ્ટદેવાઢ્યં ગાણેશેનૈવ મન્ત્રતઃ ॥ ૨૨॥

તત્ર વિઘ્નેશ્વરં ધ્યાત્વા પૂજયેત્ સ્વલ્પમાર્ગતઃ ।
તતો વસ્ત્રં સમાચ્છાદ્ય મસ્તકે ગુરુસંયુતઃ ॥ ૨૩॥

પ્રણમ્ય સ્વગુરું તત્ર પ્રાર્થયેદ્વદ મન્ત્રકમ્ ।
સંસારતારણાર્થાય દેહિ મન્ત્રં દ્વિજોત્તમ ॥ ૨૪॥

એવં ગુરુર્મહર્ષિશ્ચ પ્રાર્થિતસ્તં સુશિક્ષ્ય વૈ ।
ગણેશં મનસા ધ્યાત્વા મન્ત્રં શિષ્યાય દાપયેત્ ॥ ૨૫॥

તતસ્તાન્ કલશાન્ ગૃહ્ય પૂર્વદિક્ક્રમતશ્ચ તૈઃ ।
અષ્ટોત્તરશતં મન્ત્રં જપંસ્તં સ્નાપયેદ્ગુરુઃ ॥ ૨૬॥

એકૈકસિદ્ધિદઃ પ્રોક્તઃ કલશઃ સ્નાનમાત્રતઃ ।
બ્રહ્મભૂયકરઃ પ્રોક્તો મધ્યમઃ સર્વસિદ્ધિદઃ ॥ ૨૭॥

સ્નાતં શિષ્યં સમાદાય ગણેશં પ્રણિપત્ય ચ ।
શિષ્યેણ પૂજયેદ્દેવં તતસ્તં સ વિસર્જયેત્ ॥ ૨૮॥

પ્રણમેદ્ ગાણપત્યાંસ્તાંસ્તતો દદ્યાચ્ચ દક્ષિણામ્ ।
પુષ્કલાં શાઠ્યહીનઃ સ ભોજયેત્તાન્ મહાયશાઃ ॥ ૨૯॥

મોદકાપૂપલડ્ડૂકપાયસાન્નૈર્મહામતે ।
સૂક્ષ્મતન્દુલસંયુક્તૈર્નાનાપક્વાન્નમિશ્રિતૈઃ ॥ ૩૦॥

યથેષ્ટં ભોજયિત્વા વૈ પ્રણમેત્ સ પુનઃ પુનઃ ।
પ્રાર્થયેત્તાન્ વિશેષેણ તારિતોઽહં ભવાર્ણવાત્ ॥ ૩૧॥

સમ્ભારં ગુરવે દદ્યાદ્ગુરુવંશં નમેત્ સદા ।
(Page ખં. ૫ અ. ૨૪ પાન ૫૦)
ગાણપત્યાન્ પ્રદૃશ્યૈવોત્થાય તાંશ્ચ નમેન્નરઃ ॥ ૩૨॥

ગાણપત્યાન્ સમાલોક્ય ન નમેદ્યઃ પ્રજાપતે ।
તેન વિઘ્નેશ્વરઃ સાક્ષાદ્ધિંસિતો નાઽત્ર સંશયઃ ॥ ૩૩॥

એવં દીક્ષાં સમાગૃહ્ય ગણેશં પૂજયેત્ સદા ।
તત્સમીપે તુ મન્ત્રસ્ય પુરશ્ચરણકં ચરેત્ ॥ ૩૪॥

અથ ધર્માન્ પ્રવક્ષ્યામિ શ઼ૃણુ તાન્ સુસમાહિતઃ ।
દન્તકાષ્ઠમભુક્ત્વા તુ ન ગચ્છેદ્ગણપાલયમ્ ॥ ૩૫॥

મૈથુનં યદિ કૃત્વા દેવાલયં ચ ગમિષ્યતિ ।
સ સદ્યો ભ્રંશમાગચ્છેદતઃ સ્નાત્વા ચ તં વ્રજેત્ ॥ ૩૬॥

અશુદ્ધવસ્ત્રસંયુક્તો વિઘ્નરાજં ન સંસ્પૃશેત્ ।
પરવસ્ત્રધરો ભૂત્વા પૂજયેન્ન ગણાધિપમ્ ॥ ૩૭॥

છિદ્રયુક્તં ન વસ્ત્રં સ ધારયેદ્દેવપૂજને ।
મૌનેન પૂજયેદ્દેવં યથાવિધિ ગણેશ્વરમ્ ॥ ૩૮॥

ગણેશપૂજને સક્તો યદિ વાચં વદેન્નરઃ ।
પૂજાન્તરાયદોષેણ વિઘ્નયુક્તો ભવેન્નરઃ ॥ ૩૯॥

અભ્યઙ્ગસંયુતો યસ્તુ સ્નાનહીનો યદા ભવેત્ ।
દેવાલયં સમાગચ્છેત્તદા ભ્રંશમવાપ્નુયાત્ ॥ ૪૦॥

ઉપાનત્સ્પર્શસંયુક્તઃ પાદક્ષાલનવર્જિતઃ ।
ગણેશાનાલયં ગચ્છેદ્વિઘ્નયુક્તો ભવેન્નરઃ ॥ ૪૧॥

ગન્ધાદિચર્ચિતો ભૂત્વા યો નાર્ચ્ય ગણનાયકમ્ ।
દેવાલયં ગતો દૈવાલ્લભેદ્ ભ્રંશં સ માનવઃ ॥ ૪૨॥

અજીર્ણદોષસંયુક્તો યસ્તિષ્ઠેદ્દેવસન્નિધૌ ।
ઉદ્ગારાધઃ સમીરેણ વિઘ્નયુક્તો ભવેત્તુ સઃ ॥ ૪૩॥

ભેરીશબ્દમનાવાદ્ય ગણેશાલયગો ભવેત્ ।
સ ભ્રંશં ચ લભેદ્દક્ષ દેવગુહ્યપ્રભઞ્જનાત્ ॥ ૪૪॥

દેવાલયં સમાગત્યાઽનૃતવાચં વદેન્નરઃ ।
અથવા દેવસ્તુત્યાદિહીનાં સ ભ્રંશિતામિયાત્ ॥ ૪૫॥

નિત્યં તત્ર પ્રજાનાથ સંયતો દેવસન્નિધૌ ।
મર્યાદાં પાલયંસ્તિષ્ઠેત્ સ ઈપ્સિતફલં લભેત્ ॥ ૪૬॥

યથાશાસ્ત્રં વિચારેણ ગણેશં સર્વસિદ્ધિદમ્ ।
યો ભજેત્ ગાણપત્યસ્તં સ ગણેશો ભવેન્નરઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગાણપત્યદીક્ષાવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૫.૨૩

## ૫.૨૪ ગાણપત્યસ્વરુપવર્ણનં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
યદિ ક્ષત્રિયવંશસ્થો દીક્ષામિચ્છતિ શાશ્વતીમ્ ।
ગાણેશીં શ‍ૃણુ વક્ષ્યામિ વિધિં તસ્ય પ્રજાપતે ॥ ૧॥

બ્રાહ્મણસ્યૈવ હસ્તેન કારયેદેતદાદરાત્ ।
મન્ત્રમાત્રં જપેત્ સોઽપિ ન હોમાદિ સ્વહસ્તતઃ ॥ ૨॥

શસ્ત્રવિદ્યાં પરિત્યજ્ય દણ્ડાદિકમશેષતઃ ।
ગાણપત્યો ભવેત્ સોઽપિ ક્ષત્રિયો નાત્ર સંશયઃ ॥ ૩॥

વૈશ્યઃ સ્વવૃત્તિજં કર્મ ક્રયવિક્રયકં પરમ્ ।
ત્યજેત્તતો ગણેશસ્ય દીક્ષાયાં યોગ્યતામિયાત્ ॥ ૪॥

શૂદ્રાણાં નામમન્ત્રશ્ચ વક્તવ્યો બ્રાહ્મણૈઃ સદા ।
હિંસાદિકમથો ત્યક્ત્વા શૂદ્રો દીક્ષાં લભેત્ પરામ્ ॥ ૫॥

(Page  ખં. ૫ અ. ૨૪ પાન ૫૧)
નામમન્ત્રેણ સર્વં વૈ કુર્યાત્ શૂદ્રઃ સ્વયં વિધિમ્ ।
ગણેશ્વરસ્ય પૂજાદિ ન શ્લોકાદિ સમુચ્ચરેત્ ॥ ૬॥

ન હોમાદિભવં કર્મ પ્રાયશ્ચિત્તં ચરેત્તથા ।
ગાણપત્યો ભવેચ્છૂદ્રો દીક્ષાયુક્તો મહાયશાઃ ॥ ૭॥

ગણેશદીક્ષયા યુક્તો ભવેદ્ વિપથગો યદિ ।
સ એવ વિઘ્નસંયુક્તો ભવિષ્યતિ પ્રકોપતઃ ॥ ૮॥

અથ દીક્ષિતજન્તૂનાં ચિહ્નાનિ તે વદામ્યહમ્ ।
તૈર્યુક્તાન્ ગાણપત્યાન્ વૈ પરાન્ જાનાતિ માનવઃ ॥ ૯॥

પ્રાતઃ સ્નાનાદિકં કૃત્વા સન્ધ્યાં શાખોક્તમાર્ગતઃ ।
આગમોક્તાં ચ વેદોક્તાં પૂજાં કૃત્વા સમાપયેત્ ॥ ૧૦॥

અર્ચનં દ્વાદશાઙ્ગેષુ યઃ કુર્યાન્ મન્ત્રપૂર્વકમ્ ।
સર્વાઙ્ગલેપનેનૈવ તત્ર મન્ત્રાન્ શૃણુ પ્રભો ॥ ૧૧॥

ગણેશોચ્છિષ્ટગન્ધં વૈ ગૃહ્યાદૌ નિયતો ન્યસેત્ ।
સ્વાનન્દવાસિને જપ્ત્વા નમો મૂર્ધાનમર્ચયેત્ ॥ ૧૨॥

લલાટં ગણનાથાય નમ ઉચ્ચાર્ય ચાર્ચયેત્ ।
દક્ષિણં કર્ણમૂલં ચ ગજકર્ણાય વૈ નમઃ ॥ ૧૩॥

વામકર્ણં તથા દક્ષ શૂર્પકર્ણાય તે નમઃ ।
અર્ચયેચ્ચ તતઃ કણ્ઠં વિઘ્નેશાય તતઃ પઠન્ ॥ ૧૪॥

બાહું દક્ષિણગં તદ્વદ્ હેરમ્બાય નમોઽર્ચયેત્ ।
વામં સમર્ચયેત્ સુજ્ઞઃ સિદ્ધિનાથાય વૈ નમઃ ॥ ૧૫॥

હૃદયં ચાર્ચયેત્તત્ર બુદ્ધીશાય નમો વિધે ।
ઉદરં નાભિસંસ્થાનં નમો લમ્બોદરાય તે ॥ ૧૬॥

દક્ષિણં ચૈવ કુક્ષિં સ વક્રતુણ્ડાય વૈ નમઃ ।
વામં તુ ચિન્તામણયે હ્યર્ચયેન્નાત્ર સંશયઃ ॥ ૧૭॥

પૃષ્ઠદેશં નાભિસમમર્ચયેત્ ઢુણ્ઢયે નમઃ ।
એતે દ્વાદશ મન્ત્રાશ્ચ કથિતાસ્તે પ્રજાપતે ॥ ૧૮॥

લલાટં ચાર્ચયેત્ સુજ્ઞઃ સર્વભદ્રવિધાનતઃ ।
અઙ્ગાનિ સ તથા દક્ષ નાભેરુર્ધ્વં સમર્ચયેત્ ॥ ૧૯॥

સર્વાઙ્ગલેપનં શસ્તં ગાણેશાનાં વિશેષતઃ ।
રક્તચન્દનસંયુક્તો ગન્ધસ્તેષાં મતઃ સદા ॥ ૨૦॥

માલાં શમીભવાં વાઽપિ પ્રભો મન્દારવૃક્ષજામ્ ।
પ્રશસ્તાં સ્વગલે બાહૌ સર્વસિદ્ધિપ્રદાયિનીમ્ ॥ ૨૧॥

ધારયેન્નાત્ર સન્દેહો દેવકાષ્ઠપ્રમાણતઃ ।
અન્યકાષ્ઠભવાં માલાં ધારયેન્ન કદાચન ॥ ૨૨॥

વૈષ્ણવાનાં યથા દક્ષ તુલસીકાષ્ઠસમ્ભવા ।
તથા વૈ ગાણપત્યાનાં શમીમન્દારસમ્ભવા ॥ ૨૩॥

તદભાવે પ્રજાનાથ વિદ્રુમજાં તુ ધારયેત્ ।
અથવાઽક્ષમયીં માલાં ધારયેન્ મન્દમાર્ગતઃ ॥ ૨૪॥

સદા શુચિસ્વભાવસ્થો મિત્રશત્રુત્વવર્જિતઃ ।
દ્વન્દ્વભાવવિનિર્મુક્તો ગાણપત્યશ્ચરેન્ મહીમ્ ॥ ૨૫॥

શુક્લકૃષ્ણચતુર્થીજં વ્રતં નિત્યં સમાચરેત્ ।
ગાણપત્યાનિ સર્વાણિ વ્રતાનિ શ્રદ્ધયાન્વિતઃ ॥ ૨૬॥

અન્યદેવપ્રિયં દક્ષ વ્રતં તીર્થં ચરેત્તથા ।
શક્તિયુક્તો ભવેત્ સોઽપિ તદા સર્વં પ્રતિષ્ઠિતમ્ ॥ ૨૭॥

ક્ષેત્રાણિ ગાણપત્યાનિ ચરેન્નિયમસંયુતઃ ।
અન્યાનિ શક્તિયુક્તશ્ચેત્ નિશ્ચિતં મુનિભિઃ પુરા ॥ ૨૮॥

યથા ગણેશ્વરો દેવઃ સર્વેષામાદિપૂજ્યકઃ ।
અન્યદેવસ્ય ભક્તાનાં તથા તસ્ય વ્રતાદિકમ્ ॥ ૨૯॥

ગાણેશાનાં યથા દક્ષ એક એવ ગણેશ્વરઃ ।
આવશ્યકેન તદ્વદ્વ્રતાદિકં ચ સમાચરેત્ ॥ ૩૦॥

સદા ગણેશનામ્નશ્ચ કીર્તનં તત્ર વર્તતે ।
(Page ખં. ૫ અ. ૨૪ પાન ૫૨)
કથા નાનાવિધા રમ્યાઃ કથયન્તિ પરસ્પરમ્ ॥ ૩૧॥

ચરિત્રાણિ ગણેશસ્ય ગાયેયુર્હર્ષસંયુતાઃ ।
પાત્રીભૂતાન્ જનાન્ દૃષ્ટ્વા બોધયન્તિ સુસિદ્ધયે ॥ ૩૨॥

અત્ર તે કથયિષ્યામિ સંવાદં નારદેન્દ્રજમ્ ।
એકદા નારદો યોગી ભ્રમન્નિન્દ્રં સમાયયૌ ॥ ૩૩॥

ઇન્દ્રેણ પૂજિતઃ સોઽપિ ગાણેશં ગાનમાકરોત્ ।
તં પ્રણમ્ય મહેન્દ્રશ્ચ જગાદ વાક્યમુત્તમમ્ ॥ ૩૪॥

ઇન્દ્ર ઉવાચ ।
વદ બ્રહ્મન્ મહાભાગ ચિહ્નાનિ ગણપાત્મનામ્ ।
કૈશ્ચિહ્નૈઃ સંયુતા નિત્યં ગાણપત્યાશ્ચરન્તિ હિ ॥ ૩૫॥

નારદ ઉવાચ ।

સર્વાઙ્ગે ચન્દનાલેપો રક્તચન્દનસંયુતઃ ।
શમીમન્દારમાલા ચ તેષાં હસ્તે ગલે ભવેત્ ॥ ૩૬॥

સદા ગણેશનામ્નશ્ચ શ્રવણે તત્પરાઃ સ્મૃતાઃ ।
કીર્તને ભાવસંયુક્તાઃ ગાણપત્યા ઇમે બુધાઃ ॥ ૩૭॥

દ્વન્દ્વસ્ય ભાવો હૃદિ નોભવેત્ કદા યે નિઃસ્પૃહા યોગધરાઃ સુનિર્મલાઃ ।
ગાણેશ્વરા વન્દનશીલકાઃ સદા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૩૮॥

નિત્યં સ્વધર્મેણ ચ સંયુતાસ્તથા ન માનયન્તિ હ્યપવર્ગકં કદા ।
ભક્તૌ નિમગ્ના ગણરાજવર્ત્મનિ તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૩૯॥

ન સ્થાનગેહાદિકમાશ્રયન્તિ યે પ્રારબ્ધમાત્રેત્યવલમ્બિનોઽપરે ।
ચિન્તામણૌ ચિત્તનિવેશકાઃ સદા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૦॥

શ્રૌતે તથા સ્માર્તભવે સુકર્મણિ સંસક્તદેહા ગણરાજસિદ્ધયે ।
સર્વાણિ કર્માણિ સમર્પ્ય નૈજ્યપે તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૧॥

નિન્દાં સ્તુતિં વીક્ષ્ય વિકારવર્જિતાઃ કાન્તાસુવર્ણાદિષુ ભાવહીનકાઃ ।
પ્રાટન્તિ વિઘ્નેશ્વરભક્તિલાલસા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૨॥

આચ્છાદિતા યે ન ચ કેન ભાવિતાસ્તિરસ્કૃતા દેવવરિષ્ઠભોજિનઃ ।
જીવૈર્હતા દોષવિહીનચેતસસ્તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૩॥

નેચ્છન્તિ કૈલાસવિકુણ્ઠકાદિકં ન બ્રહ્મભૂયં ન રસાં રસાતલમ્ ।
ભક્તિં સદેચ્છન્તિ ગણેશભાવિકાન્ તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૪॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા મહેન્દ્રં સ નારદઃ સ્વેચ્છયા મુનિઃ ।
યયૌ વિઘ્નેશ્વરં ગાયન્ યત્ર તત્ર પ્રજાપતે ॥ ૪૫॥

એતત્તે ગાણપત્યાનાં સ્વરૂપં કથિતં મયા ।
શ્રવણાત્ પાપસમ્ભૂતમજ્ઞાનં નાશમાવ્રજેત્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગાણપત્યસ્વરૂપવર્ણનં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૪
(Page ખં. ૫ અ. ૨૫ પાન ૫૩)

## ૫.૨૫ શમીમન્દારવરપ્રદાનં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
શમીમન્દારમાહાત્મ્યં વદ મે કરુણાનિધે ।
કથં વિઘ્નેશ્વરસ્યૈવ પ્રિયૌ તૌ સમ્બભૂવતુઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
ઔર્વો નામાઽભવદ્વિપ્રઃ શ્રૌતસ્માર્તક્રિયાપરઃ ।
સ્વધર્મરતયા પત્ન્યા બ્રહ્મનિષ્ઠો મહાયશાઃ ॥ ૨॥

તયોઃ કાલેન સઞ્જાતા પુત્રી તેજસ્વિની પ્રભો ।
તસ્યા નામ દ્વિજૌ તૌ તુ શમીકેતિ પ્રચક્રતુઃ ॥ ૩॥

સા કન્યા રૂપસંયુક્તા ગુણયુક્તા પ્રજાપતે ।
સપ્તવર્ષવયઃ સંસ્થા બભૂવ જનકપ્રિયા ॥ ૪॥

તદર્થં બ્રાહ્મણઃ સોઽપિ વરમિચ્છન્ સમાયયૌ ।
શૌનકસ્યાશ્રમં તત્ર દદર્શ મુનિસત્તમમ્ ॥ ૫॥

પૂજિતઃ શૌનકેનૈવ મન્દારં શિષ્યમુત્તમમ્ ।
શૌનકસ્ય દદર્શાઽસૌ વિદ્યાઢ્યં ધૌમ્યનન્દનમ્ ॥ ૬॥

સુશીલં ગુરુસેવાયાં નિરતં ધર્મલાલસમ્ ।
હર્ષયુક્તોઽભવત્તત્ર મેને જામાતરં હૃદિ ॥ ૭॥

વિચાર્ય શૌનકેનૈવ સ્વગૃહં પ્રત્યપદ્યત ।
સુદિને તં સમાનાય્ય દદૌ કન્યાં મહાત્મને ॥ ૮॥

તેન યુક્તા શમી તત્ર શુશુભે રૂપસંયુતા ।
રત્નકાઞ્ચનયોર્યોગસ્તથા જાતઃ પ્રજાપતે ॥ ૯॥

પુનર્ગતે કિયત્કાલે યૌવનસ્થાં વિભાવ્ય તામ્ ।
શમીકાં સ સમાનેતું મન્દારઃ પ્રયયૌ સ્વયમ્ ॥ ૧૦॥

તં પ્રપૂજ્ય દદૌ કન્યામૌર્વો હર્ષસમન્વિતઃ ।
મન્દારઃ શ્વશુરં નત્વા માર્ગસંસ્થો બભૂવ હ ॥ ૧૧॥

કદા ભૃશુણ્ડિનામા યો ગાણેશશ્ચ મહાયશાઃ ।
વિશ્રાન્તિમાશ્રમે તસ્ય ચક્રતુર્દમ્પતી પરે ॥ ૧૨॥

સ્વકાશ્રમવિહારાર્થં ભૃશુણ્ડી સઙ્ગતોઽભવત્ ।
તં દૃષ્ટ્વા શુણ્ડયા યુક્તં જહસતુશ્ચ મૂર્ખવત્ ॥ ૧૩॥

શુણ્ડાયા અપમાનેન પાપં પ્રાપ્તં મહાદ્ભુતમ્ ।
તેન સમ્પ્રેરિતો યોગી ચુકોપ રક્તલોચનઃ ॥ ૧૪॥

ઉવાચ તૌ મહાયોગી ભૃશુણ્ડી ચ દ્વિજાધમૌ ।
દૃષ્ટ્વા જહસથુઃ શુણ્ડાં પાદપૌ ભવતં રુષા ॥ ૧૫॥

શુણ્ડાયા અપમાનં યઃ કરિષ્યતિ નરાધમઃ ।
સ મે શત્રુર્ન સન્દેહો ગજાસ્યસ્યાપમાનતઃ ॥ ૧૬॥

તૌ તં ભૃશુણ્ડિનં વિપ્રૌ પ્રણેમતુઃ સુદુઃખિતૌ ।
અજ્ઞાનેન કૃતં હાસ્યં ક્ષન્તુમર્હસિ યોગિપ ॥ ૧૭॥

ઉચ્છાપં વદ વિપ્રેશ દાસૌ તે નાત્ર સંશયઃ ।
અત્યન્તં ગણરાજસ્ય પ્રિયૌ કુરુ ચ માનદ ॥ ૧૮॥

તતોઽતિકરુણાવિષ્ટો જગાદ મુનિસત્તમઃ ।
શુણ્ડાયા અપમાનેન મયા શપ્તૌ ન સંશયઃ ॥ ૧૯॥

અતઃ શુણ્ડાધરો દેવઃ પ્રસન્નશ્ચ ભવિષ્યતિ ।
તદા સર્વં શુભં પૂર્ણં યુવયોર્વાઞ્છિતં ભવેત્ ॥ ૨૦॥

મમાધીનં ન કિઞ્ચિદ્વૈ શાપદાતા ગજાનનઃ ।
ક્રોધહીનસ્ય મે ક્રોધઃ પ્રેરિતસ્ય સમાયયૌ ॥ ૨૧॥

એવમુક્ત્વા મહાયોગી સ્વાસનસ્થો બભૂવ હ ।
તૌ સદ્યો વૃક્ષયોનિસ્થૌ બભૂવતુઃ પ્રજાપતે ॥ ૨૨॥

અથ માસે ગતે વિપ્રઃ શૌનકશ્ચિન્તયાન્વિતઃ ।
શિષ્યાન્ ગૃહ્ય યયૌ વિપ્રમૌર્વં દુઃખાન્ મહામુનિઃ ॥ ૨૩॥

તં પપ્રચ્છ શનૈઃ સોઽપિ મન્દારઃ કુત્ર વર્તતે ।
શમીકાયા આનયને પ્રેષિતોઽયં મયા સુતઃ ॥ ૨૪॥

તતસ્તં શોકસંયુક્તમૌર્વો જગાદ વિસ્મિતઃ ।
દત્વા કન્યાં મયા સદ્યઃ પ્રેષિતશ્ચ ત્વદન્તિકે ॥ ૨૫॥

(Page ખં. ૫ અ. ૨૫ પાન ૫૪)

શ્રુત્વૈવં શોકસંયુક્તા ઔર્વશૌનકમુખ્યકાઃ ।
તયોઃ શોધનકામાસ્તે નિસસ્રુસ્ત્વરિતાસ્તતઃ ॥ ૨૬॥

તત્ર માર્ગે જનાન્ સર્વાન્ ગ્રામસ્થાન્ વનસંસ્થિતાન્ ।
પપ્રચ્છુસ્તે સમૂચુસ્તાન્ માસમાત્રાદ્ ગતૌ કિલ ॥ ૨૭॥

એવં વિચાર્ય તે યાતા ભૃશુણ્ડ્યાશ્રમમુત્તમમ્ ।
તત્ર વિશ્રાન્તિકૃત્ સ્થાને જનાનાં દદૃશુસ્તરૂ ॥ ૨૮॥

અનુપેતૌ તતો જ્ઞાત્વા શૌનકો ધ્યાનમાશ્રિતઃ ।
જ્ઞાત્વા ભૃશુણ્ડિના શપ્તૌ વૃત્તાન્તં તાનવેદયત્ ॥ ૨૯॥

તતઃ સર્વાન્ મહાયોગી વિસૃજ્ય તપસિ સ્થિતૌ ।
શૌનકૌર્વૌ મહાદુઃખાદ્ ગણેશારાધને રતૌ ॥ ૩૦॥

અવાયુભક્ષભાવેન ધ્યાનેન ગણનાયકમ્ ।
તોષયામાસતુઃ પ્રીત્યા તયોરઘવિમુક્તયે ॥ ૩૧॥

એવં દ્વાદશવર્ષેષુ ગતેષુ દ્વિરદાનનઃ ।
આયયૌ તૌ વરં દાતું ભૃશં તત્ ક્લેશતાપિતઃ ॥ ૩૨॥

દૃષ્ટ્વા વિઘ્નેશ્વરં તૌ તુ પ્રણમ્યાપૂજ્ય હર્ષતઃ ।
ગણાધ્યક્ષં તુષ્ટુવતુઃ પ્રણમ્ય કરસમ્પુટૈઃ ॥ ૩૩॥

શૌનકૌર્વૌ ઊચતુઃ ।
નમસ્તે ગજવક્ત્રાય વિઘ્નેશાય પરાત્મને ।
અપારાય મહેશાય હેરમ્બાય નમો નમઃ ॥ ૩૪॥

સંસારાર્ણવતારાય માયામોહહરાય તે ।
બ્રહ્મેશાય શિવાદિભ્યો યોગદાય નમો નમઃ ॥ ૩૫॥

જ્યેષ્ઠાનાં જ્યેષ્ઠરાજાય સર્વેષાં પૂજ્યમૂર્તયે ।
આદિપૂજ્યાય દેવાય ચાન્તઃસ્થાય નમો નમઃ ॥ ૩૬॥

અનાદયે ચ સર્વેષાં માત્રે પિત્રે પરાત્મને ।
સ્વાનન્દવાસિને તુભ્યં ગણેશાય નમો નમઃ ॥ ૩૭॥

શૂર્પકર્ણાય શૂરાય લમ્બોદરાય ઢુણ્ઢયે ।
વિઘ્નકર્ત્રે હ્યભક્તાનાં ભક્તાનાં વિઘ્નહારિણે ॥ ૩૮॥

બ્રહ્મેશાય નમસ્તુભ્યં બ્રહ્મભૂતપ્રદાય ચ ।

યોગેશાય સુશાન્તાય શાન્તિદાય નમો નમઃ ॥ ૩૯॥

ગુણાન્તં ન યયુર્યસ્ય શિવવિષ્ણ્વાદયોઽમરાઃ ।
યોગિનઃ સગુણસ્યાપિ નિર્ગુણસ્યાઽત્ર કા કથા ॥ ૪૦॥

નમો નમઃ પ્રસન્નસ્ત્વં ભવ સ્વામિન્ ગજાનન ।
ધૌમ્યપુત્રં ચ મન્દારં શિષ્યં મે તારયાઽધુના ॥ ૪૧॥

તારયસ્વ શમીમૌર્વકન્યાં તાં નાથ વિઘ્નપ ।
વૃક્ષયોનિગતૌ તૌ તુ માનુષૌ કુરુ તાદૃશૌ ॥ ૪૨॥

ભક્તિં તે દેહિ હેરમ્બ યયા ભ્રાન્તિર્વિનશ્યતિ ।
દાસૌ તે પાદપદ્મસ્ય વાઞ્છિતં કુરુ સર્વદા ॥ ૪૩॥

તયોર્વચનમાકર્ણ્ય જગાદ ગણનાયકઃ ।
તૌ ભક્તૌ તપસા યુક્તૌ ભક્તિબદ્ધસ્વભાવતઃ ॥ ૪૪॥

શ્રીગજાનન ઉવાચ ।
ભૃશુણ્ડિના ચ વિપ્રર્ષી શમૌ તૌ દમ્પતી પુરા ।
જ્ઞાત્વા મદીયતુણ્ડસ્યાપમાનાન્નાત્ર સંશયઃ ॥ ૪૫॥

ભૃશુણ્ડિનોઽતિભક્તસ્ય મમ મિથ્યાવચઃ કદા ।
ન કરોમિ મહાભાગૌ દેહાદધિક એવ સઃ ॥ ૪૬॥

ભૃશુણ્ડિનોઽપમાનશ્ચ ક્રિયતે વિવિધૈર્જનૈઃ ।
ન તત્ર કોપસંયુક્તો ભવતે મુનિસત્તમઃ ॥ ૪૭॥

મદીયમપમાનં સ સહતે ન કદાચન ।
અતોઽહં તસ્ય વાક્યં વૈ ન કરોમિ નિરર્થકમ્ ॥ ૪૮॥

ભવદ્ભ્યાં તપસા બદ્ધઃ કરિષ્યામિ હિતાવહમ્ ।
શ‍ૃણુતં મે વચો રમ્યં વરં દાસ્યામિ મુખ્યકમ્ ॥ ૪૯॥

મન્દારસ્ય ચ શમ્યાશ્ચ મૂલે સ્થાસ્યામિ નિશ્ચલઃ ।
મદ્રૂપૌ વૃક્ષજાતીનાં સર્વવન્દ્યૌ ભવિષ્યતઃ ॥ ૫૦॥

(Page ખં. ૫ અ. ૨૫ પાન ૫૫)
દેવાસ્તૌ પ્રણમસ્યન્તિ કિં પુનર્જન્તવો મતાઃ ।
દર્શનાત્ સ્પર્શનાચ્ચૈવ પાપઘ્નૌ તૌ ભવિષ્યતઃ ॥ ૫૧॥

મત્પ્રિયૌ સર્વભાવેન દેવાનાં પ્રિયરૂપિણૌ ।

ભવિષ્યતો વિશેષેણ વૃક્ષરાજૌ મહામુની ॥ ૫૨॥

શમીપત્રેણ માં વિપ્રા પૂજયિષ્યન્તિ માનવાઃ ।
તેષાં વાઞ્છાં સદાઽહં વૈ પૂરયિષ્યામિ શાશ્વતીમ્ ॥ ૫૩॥

મન્દારપુષ્પમેકં સમર્પયિષ્યતિ મે નરઃ ।
તેન હૃષ્ટો ભવિષ્યામિ ફલં દાસ્યામિ વાઞ્છિતમ્ ॥ ૫૪॥

કૃતા નાનાવિધા પૂજા મદીયા માનવેન ચ ।
દૂર્વાહીના વૃથા સર્વા ભવત્યત્ર ન સંશયઃ ॥ ૫૫॥

અદ્ય પ્રભૃતિ વિપ્રેશૌ શમીપત્રેણ સંયુતા ।
મન્દારકુસુમેનૈવ સફલા સા ભવિષ્યતિ ॥ ૫૬॥

શમીપત્રં નરેણૈવ ભવેન્ મયિ સમર્પિતમ્ ।
ન તુ ઋતુશતેનૈવ તુલ્યં તેભ્યોઽધિકં મતમ્ ॥ ૫૭॥

શમીપત્રેણ સન્તુષ્ટો ભવિષ્યામિ નિરન્તરમ્ ।
મન્દારપુષ્પકેણૈવ કો વદેત્તુ તયોઃ ફલમ્ ॥ ૫૮॥

નિત્યં શમીં નમેદ્યસ્તુ પૂજયેદ્વા તુ સંસ્પૃશેત્ ।
સ સપ્તકુલસંયુક્તઃ સ્વાનન્દં મે ગમિષ્યતિ ॥ ૫૯॥

તથા મન્દારવૃક્ષં યો નમેત્ સમ્પૂજયેન્નરઃ ।
સંસ્પૃશેત્ સોઽપિ સ્વાનન્દં વ્રજેત્ સપ્તકુલૈર્યુતઃ ॥ ૬૦॥

પ્રદક્ષિણાં પ્રકુર્વીત શમીમન્દારવૃક્ષયોઃ ।
સપ્તદ્વીપવતી પૃથ્વ્યાઃ કૃતા તેન પ્રદક્ષિણા ॥ ૬૧॥

યદિ ભાવેન વૃક્ષસ્ય પ્રદક્ષિણા કૃતા ભવેત્ ।
શતભૂમિપ્રદાક્ષિણ્યસમં પુણ્યં લભેન્નરઃ ॥ ૬૨॥

બહુનાઽત્ર કિમુક્તેન મદ્રૂપૌ વૃક્ષજાતિષુ ।
તયોશ્ચ મહિમાનં કો ભવેદ્વર્ણયિતું ક્ષમઃ ॥ ૬૩॥

વૃક્ષબુદ્ધ્યા શમીં યો વૈ મન્દારં યદિ પશ્યતિ ।
સ નારકી નરો વિપ્રૌ ભવિષ્યતિ ન સંશયઃ ॥ ૬૪॥

શમીં મન્દારકં વીક્ષ્ય ન નમેદ્યો નરાધમઃ ।
દક્ષિણં કુરુતે નૈવ નષ્ટપુણ્યો ભવેત્તદા ॥ ૬૫॥

શમીં યશ્છેદયેદ્વાપિ મન્દારં મુનિસત્તમૌ ।
નરકેષુ મહાપાપી પતિષ્યતિ ન સંશયઃ ॥ ૬૬॥

શાખાં પત્રં તુ યઃ પાપી છેદયિષ્યતિ માનવઃ ।
નારકી સ ભવેન્નૂનં દર્શનાત્ પાપદો ભવેત્ ॥ ૬૭॥

શમીં યો નિન્દયેદ્વા યો મન્દારં વૃક્ષસત્તમમ્ ।
સર્વભાગ્યવિહીનઃ સ નારકી જાયતે તતઃ ॥ ૬૮॥

મદ્રૂપેણૈવ મન્દારં શમીં યસ્તુ પ્રપશ્યતિ ।
સ ભુક્ત્વા વિવિધાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૬૯॥

મન્દારમૂલમાદાય મૂર્તિં કૃત્વા મદીયિકામ્ ।
પૂજયિષ્યન્તિ મદ્ભક્તાસ્તેષાં સાધ્યોઽહમઞ્જસા ॥ ૭૦॥

મન્દારમૂલજા મૂર્તિઃ સદ્યઃ સિદ્ધિપ્રદાયિકા ।
તદ્ભન્નૈવાન્યસમ્ભૂતા મમ મૂર્તિર્ભવિષ્યતિ ॥ ૭૧॥

મન્દારમૂર્તિગં પૂજેત્ શમીપત્રેણ ભાવતઃ ।
દૂર્વામન્દારપુષ્પૈશ્ચ ત્રયં સુદુર્લભં મતમ્ ॥ ૭૨॥

શમી મન્દારદૂર્વાશ્ચ ત્રયમેકત્ર કારિતમ્ ।
ભક્તેન સ તુ મત્તુલ્યો પૂજાયાં મે ભવિષ્યતિ ॥ ૭૩॥

શમીમન્દારજાં માલાં કૃત્વા જપં સમાચરેત્ ।
અનન્તફલભોક્તાઽસૌ ભવિષ્યતિ ન સંશયઃ ॥ ૭૪॥

શમીમન્દારજાં માલાં દધાનઃ પુરુષો ભવેત્ ।
તસ્ય દેહં સમાલોક્ય વિઘ્ના નશ્યન્તિ પાપકાઃ ॥ ૭૫॥

અન્તે શમીભવં પત્રં મન્દારકુસુમં તથા ।
(Page ખં. ૫ અ. ૨૬ પાન ૫૬)
દૂર્વાપત્રં ધૃતં યેન ધરિષ્યતિ યમો ન તમ્ ॥ ૭૬॥

શમીમન્દારસામીપ્યે પૂજયેન્ માં ચ માનવઃ ।
તેનાપ્યસઙ્ખ્યકા પૂજા કૃતા મે નાઽત્ર સંશયઃ ॥ ૭૭॥

એવમુક્ત્વા પુનસ્તૌ સ જગાદ ગણનાયકઃ ।
મદ્ભક્તિં યદિ વિપ્રેશાવિચ્છથો ભાવસંયુતૌ ॥ ૭૮॥

તદા મન્દારવૃક્ષસ્ય મૂલજાં મૂર્તિમાદરાત્ ।

કૃત્વા પૂજાં પ્રકુર્વાથાં યથા વિધિસમન્વિતૌ ॥ ૭૯॥

શમીમન્દારદૂર્વાભિઃ સન્તુષ્ટોઽહં ભવામિ તુ ।
નાન્યથા પૂર્ણભાવેન મમ તુષ્ટિકરં ભવેત્ ॥ ૮૦॥

તુલસીવર્જિતાં પૂજાં મદીયાં કુરુતં સદા ।
શમીમન્દારમાલાભિર્જપં મે કુરુતં સદા ॥ ૮૧॥

એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તરધીયત ।
વિપ્રૌ બભૂવતુર્હર્ષસમાયુક્તૌ વિશેષતઃ ॥ ૮૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શમીમન્દારવરપ્રદાનં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૫

## ૫.૨૬ શમીમન્દારસ્પર્શમહિમાવર્ણનં નામ ષડ્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો ધૌમ્યં સમાગમ્ય શૌનકો હર્ષસંયુતઃ ।
કથયામાસ વૃત્તાન્તં સોઽપિ સંહર્ષિતોઽભવત્ ॥ ૧॥

ધન્યો મે વૃક્ષગઃ પુત્રઃ સર્વસિદ્ધિપ્રદાયકઃ ।
સાક્ષાદ્ગણેશરૂપશ્ચ સર્વેષાં વન્દ્ય આદરાત્ ॥ ૨॥

શમીસમીપગો હર્ષસંયુક્તસ્તત ઔર્વકઃ ।
તતાપ તપ ઉગ્રં સ શમીસંયોગકારણાત્ ॥ ૩॥

સ એવ મરણે તત્ર શમીગર્ભસ્થિતો હ્યભૂત્ ।
અગ્નિરૌર્વાભિધાનશ્ચ ગાણપત્યો મહાયશાઃ ॥ ૪॥

કલ્પાન્તે ગણનાથં સ યયૌ યોગસમન્વિતઃ ।
શૌનકશ્ચ તથા ઢુણ્ઢિમભજત્ સ્નેહસંયુતઃ ॥ ૫॥

મન્દારમૂલજાં મૂર્તિં કૃત્વા પૂજાપરાયણઃ ।
શમીમન્દારદૂર્વાભિસ્તોષયામાસ વિઘ્નપમ્ ॥ ૬॥

શમીમન્દારમાલાભિઃ શુશુભે બ્રાહ્મણોત્તમઃ ।
ગાણપત્યસ્વરૂપેણ તથા ધૌમ્યો બભૂવ હ ॥ ૭॥

ભૃશુણ્ડી તદ્ભવં વૃત્તં શ્રુત્વા હર્ષસમન્વિતઃ ।

આગત્ય સ્વાશ્રમે સંસ્થૌ નનામ વૃક્ષસત્તમૌ ॥ ૮॥

નિત્યં પુપૂજ ચ શમીં મન્દારં ભક્તિસંયુતઃ ।
શમીમન્દારદૂર્વાભિઃ પૂજયામાસ વિઘ્નપમ્ ॥ ૯॥

શમીમન્દારમાલાભિર્ભૂષિતો મુનિસત્તમઃ ।
શુશુભે ગાણપત્યેષુ ગણરાજ ઇવાપરઃ ॥ ૧૦॥

એવં યે યે સ્થિતા દક્ષ ગાણપત્યા વિશેષતઃ ।
તે તે સર્વે શમીમન્દારપૂજાસંયુતા બભુઃ ॥ ૧૧॥

એતત્તે કથિતં સર્વં શમીમન્દારસમ્ભવમ્ ।
માહાત્મ્યં પુનરન્યત્ત્વં શૃણુ પાપહરં પરમ્ ॥ ૧૨॥

દ્રાવિડે શૂદ્રયોનિસ્થો બભૂવે પાપકારકઃ ।
વનં ગત્વા જનાન્ હત્વા દ્રવ્યલોભી દુરાત્મવાન્ ॥ ૧૩॥

એકદા વનમધ્યસ્થોઽભવત્ વ્યાઘ્રેણ ધર્ષિતઃ ।
પપાત ભયભીતશ્ચ સદ્યસ્તેન પ્રભક્ષિતઃ ॥ ૧૪॥

તત્ર વાયુબલેનૈવ શમીપત્રં સમાયયૌ ।
(Page  ખં. ૫ અ. ૨૬ પાન ૫૭)
તસ્ય સ્પર્શોઽભવત્તસ્ય દૈવયોગાત્ પ્રજાપતે ॥ ૧૫॥

તં નેતું યમદૂતાશ્ચ સમાજગ્મુર્મહાબલાઃ ।
ગાણેશાસ્તત્ર સંયાતાઃ સમકાલે નરાધમમ્ ॥ ૧૬॥

યમદૂતાંસ્તિરસ્કૃત્ય ગાણેશાસ્તં પ્રગૃહ્ય વૈ ।
ગન્તું સમુદ્યતા યાવત્તાવત્તે તાન્ પ્રદુદ્રુવુઃ ॥ ૧૭॥

મુસલેન હતાઃ પેતુર્યમદૂતા મહીતલે ।
ગાણેશાસ્તં પ્રગૃહ્યૈવ બ્રહ્મભૂતં પ્રચક્રિરે ॥ ૧૮॥

યમદૂતા યમં ગત્વા શોકદુઃખસમન્વિતાઃ ।
વૃત્તાન્તં કથયામાસુઃ ક્રોધેન પરિપૂરિતાઃ ॥ ૧૯॥

યામા ઊચુઃ ।
સ્વામિન્ શાસ્ત્રકરાઃ કેચિદ્બભૂવુર્ભૂમિમણ્ડલે ।
ત્વદાજ્ઞાવશગં સર્વં વર્તતે કુત્ર તદ્ ગતમ્ ॥ ૨૦॥

ત્વં સાક્ષાદ્ધર્મરાજશ્ચ યથા વેદાર્થવાન્ પ્રભુઃ ।

વર્તસે તેન સર્વં વૈ ત્વદાજ્ઞાવશગં મતમ્ ॥ ૨૧॥

શમ્ભુવિષ્ણુમુખા દેવા ધર્માધારા ભવન્તિ વૈ ।
ધર્મયુક્તસ્વભાવેન વર્તેરન્નાત્ર સંશયઃ ॥ ૨૨॥

મહાપાપી વિશાલાક્ષો નામ શૂદ્રો મમાર હ ।
તં ગૃહીતું વયં તત્ર ગતાઃ પાશધરાઃ પ્રભો ॥ ૨૩॥

અકસ્માત્તત્ર સંયાતા પુરુષાઃ પરમાદ્ભુતાઃ ।
શુણ્ડાદણ્ડધરાઃ સર્વે ચતુર્બાહુવિરાજિતાઃ ॥ ૨૪॥

અસ્માંસ્તે તુ તિરસ્કૃત્ય તં શૂદ્રં ગૃહ્ય સૂર્યજ ।
ગન્તું સમુદ્યતા યાવત્તાવદ્યોદ્ધું વયં સ્થિતાઃ ॥ ૨૫॥

નિપાત્ય નો મહાવીર્યા મુસલેન પ્રગૃહ્ય તમ્ ।
ગતાઃ કુત્ર ન જાનીમોઽધુના સર્વે મહામતે ॥ ૨૬॥

અતસ્તં યત્નસંયુક્તો મદં તેષાં હરસ્વ ચ ।
એવમુક્ત્વા પ્રણમ્યૈનં સ્થિતાઃ પ્રાઞ્જલયોઽભવન્ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
તેષાં તદ્વચનં શ્રુત્વા ધ્યાનસ્થોઽભૂન્ મહામતિઃ ।
યમઃ સર્વં વિદિત્વા તુ ભયં દધ્રે મહાયશાઃ ॥ ૨૮॥

ધ્યાત્વા ગજાનનં દેવં હૃષ્ટરોમા ચ સાશ્રુકઃ ।
હૃદિ પ્રણમ્ય વિઘ્નેશમુવાચ ભયસઙ્કુલઃ ॥ ૨૯॥

મદીયકિઙ્કરૈઃ સ્વામિન્નપરાધઃ કૃતો મહાન્ ।
તં ક્ષમસ્વ દયાસિન્ધો પ્રભો હ્યજ્ઞાનસંયુતૈઃ ॥ ૩૦॥

ગાણપત્યૈર્મહાભાગૈર્વિવાદો નૈવ શોભનઃ ।
સ એવ તુ મયા પ્રાપ્તો ભાગ્યહીનબલેન ચ ॥ ૩૧॥

એવં ક્ષમાપ્ય વિઘ્નેશં સ્થિતં મનસિ કિઙ્કરાન્ ।
આકાર્ય ભાનુજઃ સર્વાન્ જગાદ વચનં હિતમ્ ॥ ૩૨॥

યમ ઉવાચ ।
મન્દારમાલાશમિકાષ્ઠજા ચ યસ્યૈવ દેહે ભવતિ પ્રમાણમ્ ।
પુષ્પં તયોઃ પત્રયુતં ચ શૂરાઃ સન્ત્યજ્ય દૂરં ચરત પ્રભીતાઃ ॥ ૩૩॥

દૂર્વાયુતં વિઘ્નહરસ્ય ગાથાં સઙ્ગાયમાનં યદિ પાપયુક્તમ્ ।

પૂજાદિકારં ગણનાયકસ્ય સન્ત્યજ્ય દૂરં ચરત પ્રભીતાઃ ॥ ૩૪॥

ગણેશ હેરમ્બ ગજાનનેતિ મહોદર સ્વાનુભવપ્રકાશિન્ ।
વરિષ્ઠ સિદ્ધિપ્રિય બુદ્ધિનાથ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૫॥

અનેકવિઘ્નાન્તક વક્રતુણ્ડ સ્વસંજ્ઞવાસિંશ્ચ ચતુર્ભુજેતિ ।
કવીશ દેવાન્તકનાશકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૬॥

મહેશસૂનો ગજદૈત્યશત્રો વરેણ્યસૂનો વિકટ ત્રિનેત્ર ।
પરેશ ધરણીધર એકદન્ત વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૭॥

પ્રમોદમોદેતિ નરાન્તકારે ષડૂર્મિહન્તર્ગજકર્ણ ઢુણ્ઢે ।
દ્વન્દ્વારિસિન્ધૌ સ્થિરભાવકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૮॥

(Page ખં. ૫ અ. ૨૫ પાન ૫૮)
વિનાયક જ્ઞાનવિઘાતશત્રો પરાશરસ્યાત્મજ વિષ્ણુપુત્ર ।
અનાદિપૂજ્યાખુગ સર્વપૂજ્ય વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૯॥

વિઘેર્જ લમ્બોદર ધૂમ્રવર્ણ મયૂરપાલેતિ મયૂરવાહિન્ ।
સુરાસુરૈઃ સેવિતપાદપદ્મ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૦॥

વરિન્ મહાખુધ્વજ શૂર્પકર્ણ શિવાજ સિંહસ્થ અનન્તવાહ ।
દિતૌજ વિઘ્નેશ્વર શેષનાભે વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૧॥

અણોરણીયન્ મહતો મહીયન્ રવેર્જ યોગેશ વરિષ્ઠરાજ ।
નિધીશ મન્ત્રેશ ચ શેષપુત્ર વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૨॥

વરપ્રદાતર્હ્યદિતેશ્ચ સૂનો પરાશરજ્ઞાનદ તારવક્ત્ર ।
ગુહાગ્રજ બ્રહ્મપ પાર્શ્વપુત્ર વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૩॥

સિન્ધોશ્ચ શત્રો પરશુપ્રપાણે શમીશ પુષ્પપ્રિય વિઘ્નહારિન્ ।
દૂર્વાભરૈરર્ચિત દેવદેવ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૪॥

ધિયઃ પ્રદાતશ્ચ શમીપ્રિયેતિ સુસિદ્ધિદાતશ્ચ સુશાન્તિદાતઃ ।
અમેયમાયામિતવિક્રમેમિ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૫॥

દ્વિધા ચતુર્થીપ્રિય કશ્યપાજ્જ ધનપ્રદ જ્ઞાનપ્રદપ્રકાશ ।
ચિન્તામણે ચિત્તવિહારકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૬॥

યમસ્ય શત્રો અભિમાનશત્રો વિઘેર્જહન્તઃ કપિલસ્ય સૂનો ।
વિદેહ સ્વાનન્દ અયોગયોગ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૭॥

ગણસ્ય શત્રો કમલસ્ય શત્રો સમસ્થ ભાવજ્ઞ ચ ભાલચન્દ્ર ।
અનાદિમધ્યાન્તમયપ્રચારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૮॥

વિભો જગદ્રૂપ ગુણેશ ભૂમન્ પુષ્ટેઃ પતે આખુગતેતિ બોધ ।
કર્તશ્ચ પાતશ્ચ તુ સંહરેતિ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૯॥

ઇદમષ્ટોત્તરશતં નામ્નાં તત્ પ્રપઠન્તિ યે ।
શ‍ૃણ્વન્તિ તેષુ કુરુત ભીતા મા વૈ પ્રવેશનમ્ ॥ ૫૦॥

ભુક્તિમુક્તિપ્રદં ઢુણ્ઢેર્ધનધાન્યપ્રવર્ધનમ્ ।
બ્રહ્મભૂયકરં સ્તોત્રં જપતો નિત્યમાદરાત્ ॥ ૫૧॥

યત્ર કુત્ર ગણેશસ્ય ચિહ્નયુક્તાનિ વૈ ભટાઃ ।
ધામાનિ તત્ર કુરુત સમ્ભીતા મા પ્રવેશનમ્ ॥ ૫૨॥

તેન સંસ્થાપિતાઃ સર્વે સ્વસ્વકાર્યેષુ સેવકાઃ ।
કેશાદ્યાસ્તત્ર કે યૂયં વયં ભજત તં સદા ॥ ૫૩॥

એવમુક્ત્વા યમઃ સર્વાન્ કિઙ્કરાન્ મૌનમાદધે ।
યામાઃ સર્વે ગણેશાનં ભજન્તે ભાવસંયુતાઃ ॥ ૫૪॥

ઇદં શમીભવં પુણ્યં માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠતિ સિદ્ધિદં તસ્ય મન્દારસ્ય ભવિષ્યતિ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શમીમન્દારસ્પર્શમહિમાવર્ણનં નામ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૬
(Page ખં. ૫ અ. ૨૭ પાન ૫૯)

## ૫.૨૭ દૂર્વોત્પત્તિકથનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
દૂર્વાયાશ્ચરિતં હર્ષકારકં બ્રૂહિ મુદ્ગલ ।
અહો શમ્યાસમં નાસ્તિ મન્દારેણ પવિત્રકમ્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
પુરાઽઽદૌ દેવદેવેશો બ્રહ્મા સૃષ્ટ્વા ચરાચરમ્ ।

તેષામન્નાર્થમત્યન્તચિન્તાયુક્તો બભૂવ હ ॥ ૨॥

ધ્યાત્વા ગજાનનં દેવં સંસ્થિતઃ પ્રપિતામહઃ ।
તસ્ય રોમભ્ય એકા વૈ દેવી સન્નિઃસૃતા બભૌ ॥ ૩॥

સર્વતઃ પાણિપાદાં તાં સહસ્રવદનાં પરામ્ ।
સહસ્રાવયવૈઃ સર્વૈઃ શોભમાનાં દદર્શ સઃ ॥ ૪॥

તતોઽતિહર્ષિતો બ્રહ્મા બભૂવે સર્વધારકઃ ।
જ્ઞાત્વા તામન્નરૂપાં વૈ સર્વપોષણકારિણીમ્ ॥ ૫॥

ધાતારં તં પ્રણમ્યાઽસૌ સંસ્થિતા કરસમ્પુટા ।
આજ્ઞાં કુરુ જગદ્ધાતઃ કિં કરોમિ પિતામહ ॥ ૬॥

બ્રહ્મોવાચ ।
સર્વેષામન્નભૂતા ત્વં દૂર્વાનામ્ની ભવિષ્યસિ ।
તપસ્વ ચ તતઃ સર્વમન્નં સૃજ વિધાનતઃ ॥ ૭॥

તથેતિ તં પ્રણમ્યૈવ તતાપ તપ ઉત્તમમ્ ।
ગણેશં મનસિ ધ્યાત્વા નિરાહારસમન્વિતા ॥ ૮॥

એકાક્ષરસ્ય મન્ત્રસ્ય જપેન દ્વિરદાનનઃ ।
દિવ્યવર્ષસહસ્રેણ યયૌ તાં વરદાયકઃ ॥ ૯॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ પુપૂજ સા ।
અથર્વશિરસા દેવં તુષ્ટાવ કરસમ્પુટા ॥ ૧૦॥

તામુવાચ ગણેશાનઃ સૃષ્ટિં નાનાવિધાં સદા ।
કરિષ્યસિ મહાભાગે સર્વવન્દ્યા ભવિષ્યસિ ॥ ૧૧॥

એવમુક્ત્વા ગણાધીશોઽન્તર્ધાનં પ્રજગામ હ ।
સાઽપિ હર્ષસમાયુક્તા સૃષ્ટિં કર્તું મનો દધે ॥ ૧૨॥

તસ્યા મસ્તકભાગાદ્ વૈ સ્વર્ગાન્નં વિવિધં મહત્ ।
નિઃસૃતં તેન સ્વર્ગસ્થા ભુઞ્જતે વિવિધાન્ રસાન્ ॥ ૧૩॥

ઉદરાદ્ ભૂમિસંસ્થાનાં નિઃસૃતં વિવિધં વિધે ।
અન્નં તેનૈવ ભૂમિસ્થા ભુઞ્જતે વિવિધાન્ રસાન્ ॥ ૧૪॥

પાતાલવાસિનાં પદ્ભ્યામન્નં નાનાવિધં પરમ્ ।
ભુઞ્જતે ષડ્રસાન્નિત્યં નિઃસૃતં તેન તદ્ગતાઃ ॥ ૧૫॥

અઙ્ગપ્રત્યઙ્ગરૂપેભ્યો નાનાન્નં સસૃજે પ્રભો ।
દેવી તેન તુ સન્તુષ્ટા બભૂવુઃ સર્વજન્તવઃ ॥ ૧૬॥

હૃષ્ટપુષ્ટજનાન્ વીક્ષ્ય બ્રહ્મા સન્તોષમાદધે ।
તામાગત્ય દ્વિજૈર્મન્ત્રૈરભિષેકં ચકાર હ ॥ ૧૭॥

અન્નાનામાધિપત્યે ચાભિષિક્તા બ્રહ્મણા પુરા ।
શુશુભે સર્વમાન્યા સા દેવી દૂર્વા વિશેષતઃ ॥ ૧૮॥

રાજ્યશ્રીસંયુતા દેવી મદયુક્તા બભૂવ હ ।
વિસસ્માર જપં મન્ત્રં ગણેશસ્ય પ્રજાપતે ॥ ૧૯॥

તતો વિઘ્નાકુલા જાતા સ્પર્ધાં ચક્રે વિશેષતઃ ।
પાર્વત્યા નિત્યમાનન્દાદન્નપૂર્ણાહમાદરાત્ ॥ ૨૦॥

જગદમ્બા ચ સર્વેષામન્નપૂર્ણત્વકારણાત્ ।
સાઽહમન્નસ્વરૂપસ્થા વૃથેયં ગર્વમાદધે ॥ ૨૧॥

તસ્યાશ્ચેષ્ટિતમાજ્ઞાય ક્રોધયુક્તા જગન્મયી ।
દૌરાત્મ્યસહનં કૃત્વા હ્યતિષ્ઠચ્છિવસન્નિધૌ ॥ ૨૨॥

એકદા ચન્દ્રગેહે વૈ બભૂવ હ મહોત્સવઃ ।
તત્ર દેવાદિકાઃ સર્વે સસ્ત્રીકાશ્ચ સમાયયુઃ ॥ ૨૩॥

તત્ર દૂર્વા મદોત્સિક્તા નિનિન્દ જગદમ્બિકામ્ ।
વૃથેયં જગદમ્બા વૈ નામ્ના ખ્યાતા બભૂવ હ ॥ ૨૪॥

ઇત્યાદિવિવિધૈર્વાક્યૈર્નિનિન્દ જગદમ્બિકામ્ ।
તતઃ ક્રોધસમાયુક્તા પાર્વતી તાં શશાપ હ ॥ ૨૫॥

પાર્વત્યુવાચ ।
મદીયરોમકૂપસ્થા નિઃસૃતા ત્વં ન સંશયઃ ।
વૃથા માં સ્પર્ધસે દુષ્ટે પતસ્વ તૃણરૂપિણી ॥ ૨૬॥

(Page ખં. ૫ અ. ૨૭ પાન ૬૦)
પૃથિવ્યાં તૃણરૂપા ચ સા બભૂવ પ્રજાપતે ।
તદાદિ સર્વવન્દ્યેયં દૂર્વા પરમપાવની ॥ ૨૭॥

તતોઽતિદુઃખસંયુક્તા સસ્માર દ્વિરદાનનમ્ ।

ભો ક્ષમસ્વાપરાધં મે મન્ત્રત્યાગકૃતં પ્રભો ॥ ૨૮॥

ગત્વા વનાન્તરે દૂર્વા તતાપ તપ ઉત્તમમ્ ।
ધ્યાત્વા વિઘ્નેશ્વરં દેવં મન્ત્રજપપરાયણા ॥ ૨૯॥

ગતે વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ ગજાનનઃ ।
તામાયયૌ વરં દાતું ભક્તિસ્થાં ભજનપ્રિયઃ ॥ ૩૦॥

આગતં ગણરાજં સા દૃષ્ટ્વા નનામ ભાવતઃ ।
સંહૃષ્ટા પૂજ્ય તુષ્ટાવ કૃત્વા કરપુટં વિધે ॥ ૩૧॥

દૂર્વોવાચ ।
ગણેશાય નમસ્તુભ્યં વિઘ્નરાજાય તે નમઃ ।
ભક્તાનાં વિઘ્નસંહર્ત્રે ત્વભક્તાનાં ભયઙ્કર ॥ ૩૨॥

અનન્તાયાપ્રમેયાય નાનાલીલાધરાય ચ ।
હેરમ્બાય મહેશાનાં નમઃ પૂજ્યાય તે નમઃ ॥ ૩૩॥

સર્વપૂજ્યાય સર્વાદિપૂજ્યાય બ્રહ્મરૂપિણે ।
બ્રહ્માકારાય સર્વેશ બ્રહ્મણસ્પતયે નમઃ ॥ ૩૪॥

અનાકારાય સાકારમૂર્તયે બ્રહ્મરૂપિણે ।
શાન્તિભ્યઃ શાન્તિદાત્રે તે પરેશાય નમો નમઃ ॥ ૩૫॥

લમ્બોદરાય ચૌરેશવાહનાય પરાત્મને ।
ચતુર્ભુજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૩૬॥

જ્યેષ્ઠેભ્યો જ્યેષ્ઠરાજાય જ્યેષ્ઠપદપ્રદાયિને ।
મહોદરાય પૂર્ણાય પૂર્ણાનન્દાય તે નમઃ ॥ ૩૭॥

સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપતે નાથ ભક્તેશાય નમો નમઃ ॥ ૩૮॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદા વિસિસ્મિરે ।
અતસ્ત્વાં પ્રણમામ્યેવ તેન તુષ્ટો ભવ પ્રભો ॥ ૩૯॥

એવં સ્તુત્વા ગણેશાનં ભક્તિયુક્તા નનર્ત હ ।
જગાદ ગણરાજસ્તુ દૂર્વાં તાં હર્ષસંયુતઃ ॥ ૪૦॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રમપરાધસહં ભવેત્ ।

માં સ્તૌતિ તસ્ય દૂર્વેऽહમપરાધં સહામ્યહમ્ ॥ ૪૧॥

યં યં ચિન્તયતે કામં તં તં દાસ્યામિ સર્વદા ।
ભુક્તિમુક્તિપ્રદં સ્તોત્રં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૪૨॥

વરં વરય દાસ્યામિ ચિત્તસ્થં ભક્તિતોષિતઃ ।
ક્રોધયુક્તોऽપિ દેવિ ત્વાં મન્ત્રત્યાગકરીં પુનઃ ॥ ૪૩॥

શ્રુત્વા તં ભયસંયુક્તા જગાદ વાક્યમુત્તમમ્ ।
દૂર્વા લમ્બોદરં પ્રીત્યા સાશ્રુનેત્રા પ્રજાપતે ॥ ૪૪॥

દૂર્વોવાચ ।
વરદોऽસિ યદા નાથ તદા તે ભક્તિમુત્તમામ્ ।
દૃઢાં દેહિ ગણાધ્યક્ષ તયા સર્વં શુભં ભવેત્ ॥ ૪૫॥

અન્યચ્ચ મદસંયુક્તાં જગદમ્બાં ગજાનન ।
સ્પર્ધેહં તત્કલાંશા વૈ તયા શપ્તાऽતિદારુણમ્ ॥ ૪૬॥

તૃણરૂપા ભવિષ્યામિ પતિષ્યામિ ધરાતલે ।
તદર્થં ત્વામનુપ્રાપ્તા રક્ષ માં મહતો ભયાત્ ॥ ૪૭॥

શ્રીગજાનન ઉવાચ ।
મા કુરુષ્વ વૃથા ચિન્તાં દૂર્વે મે શરણાગતે ।
સર્વં શુભં કરિષ્યામિ ભવિષ્યામિ નિયન્ત્રિતઃ ॥ ૪૮॥

અંશેન તૃણરૂપા ત્વં ભવિષ્યસિ મહીતલે ।
દેવી દેહધરા સ્વર્ગે ચરિષ્યસિ યથા પુરા ॥ ૪૯॥

પૃથિવ્યાં તૃણરૂપા ત્વમમૃતરૂપધારિકા ।
શતમૂલા પ્રકાણ્ડાદ્ વૈ પ્રરોહા ચ શતાઙ્કુરા ॥ ૫૦॥

સર્વમાન્યા સર્વપૂજ્યા દેવાદીનાં સદા પ્રિયા ।
(Page ખં. ૫ અ. ૨૭ પાન ૬૧)
ભવિષ્યસિ ન સન્દેહો મદ્વરાદન્નનાયિકે ॥ ૫૧॥

મહામઙ્ગલદા પ્રોક્તા મમ પ્રીતિવિવર્ધિની ।
ભવિષ્યસિ તુ લોકાનાં શુભમઙ્ગલદાયિકા ॥ ૫૨॥

ત્વત્પત્રેણ નરા ભૂમાવર્ચયિષ્યન્તિ દેવપાન્ ।
ન ત્વત્સમં તુ પત્રેષુ પુણ્યદં પ્રભવિષ્યતિ ॥ ૫૩॥

શક્તેશ્ચૈવાવતારા યે લક્ષ્મીલલિતિકાદયઃ ।
તાસાં પ્રિયા વિશેષેણ ભવિષ્યસિ મહાશુભે ॥ ૫૪॥

શાપિતા ગિરિપુત્ર્યા ત્વં સા ત્વાં નૈવ સ્પૃશેત્ કદા ।
અન્યત્ર માન્યભાવેન ભવિષ્યસિ ન સંશયઃ ॥ ૫૫॥

મદીયા ભક્તિરત્યન્તં દૃઢા તે પ્રભવિષ્યતિ ।
મચ્ચિત્તા મદ્ગતપ્રાણા ભવિષ્યસિ ચ દૂર્વિકે ॥ ૫૬॥

મદીયામિચ્છસિ ભક્તિમતસ્તેઽહં સુહર્ષિતઃ ।
કરિષ્યામિ સદા દેવિ મમ પ્રીતિવિવર્ધિનીમ્ ॥ ૫૭॥

દૂર્વાપત્રં વિના દેવિ પૂજયિષ્યન્તિ માં નરાઃ ।
તેષાં નૈવ ફલં તસ્યાઃ પૂજાયાઃ પ્રભવિષ્યતિ ॥ ૫૮॥

દૂર્વાસમં ન મે કિઞ્ચિત્ પૂજાયાં સુપ્રિયં ભવેત્ ।
વિના દૂર્વાં નિરાહારી ભવિષ્યામિ નિરન્તરમ્ ॥ ૫૯॥

ત્યક્ત્વા દૂર્વાદલં યે વૈ પૂજયિષ્યન્તિ માનવાઃ ।
શત્રવસ્તે મતા નિત્યં નરકેષુ પચન્તુ તે ॥ ૬૦॥

યેનાર્પિતં ચ પૂજાયાં દૂર્વાપત્રં મહામતે ।
તેનાપારમયં સર્વં દત્તં મહ્યં વિશેષતઃ ॥ ૬૧॥

દૂર્વાપત્રેણ સન્તુષ્ટો દાસ્યામિ સકલં ચ મે ।
ઐશ્વર્યં તદપિ પ્રાજ્ઞે ન સમં દૂર્વયા ભવેત્ ॥ ૬૨॥

યે મદ્ભક્તાશ્ચ તૈર્નિત્યં કર્તવ્યં દૂર્વયા યુતમ્ ।
પૂજનં મે સદા દેવિ જિતોઽહં નાત્ર સંશયઃ ॥ ૬૩॥

એવમુક્ત્વા ગણેશાનોંઽતર્દધે ચ પ્રજાપતે ।
દૂર્વા હર્ષસમાયુક્તા વિઘ્નેશં ભજતે પરમ્ ॥ ૬૪॥

યથા લમ્બોદરેણૈવ કથિતં તાદૃશં નરાઃ ।
દેવેશાદ્યાસ્તતશ્ચક્રુઃ પાર્વતી સા વિશેષતઃ ॥ ૬૫॥

સર્વમઙ્ગલરૂપા સા બભૂવે પાપનાશિની ।
ગણેશવરદાનેન ગાણપત્યા તથાઽભવત્ ॥ ૬૬॥

એતત્તે કથિતં સર્વં દૂર્વામાહાત્મ્યમુત્તમમ્ ।
શ ૃણ્વતે પઠતે તસ્મૈ ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે દૂર્વોત્પત્તિકથનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૭

## ૫.૨૮ દૂર્વાપત્રસ્પર્શમહિમાવર્ણનં નામાષ્ટાવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અત્ર તે વર્ણયિષ્યેહમિતિહાસં પુરાતનમ્ ।
દૂર્વાયા મહિમા યત્ર જ્ઞાયતે માનવૈઃ પરઃ ॥ ૧॥

દણ્ડકારણ્યદેશસ્થો બભૂવાન્ત્યજજઃ પુમાન્ ।
પિશુનો નામ દુર્બુદ્ધિઃ પાપકર્મપરાયણઃ ॥ ૨॥

ચૌરકર્મા વને ગત્વા જનાન્ જઘાન દારુણઃ ।
ક્વચિત્ પરસ્ત્રિયં દૃષ્ટ્વૈકાકિનીમયભત્ ખલઃ ॥ ૩॥

શિશ્નોદરપરો ભૂત્વા વિચચાર વનાન્તરે ।
ગ્રામે ચ નગરે વાઽપિ શસ્ત્રધારી દુરાત્મવાન્ ॥ ૪॥

બ્રહ્મહત્યાદિકં પાપમપારં સ ચકાર હ ।
ન વક્તું શક્યતે દક્ષ મયા તસ્ય ચરિત્રકમ્ ॥ ૫॥

એકદા વનસંસ્થોઽયં દ્વિજં દૃષ્ટ્વા મહાખલઃ ।
કોટરાત્ સ વિનિઃસ્મૃત્યાધાવચ્છસ્ત્રધરઃ સ્વયમ્ ॥ ૬॥

તમાગતં સમાલોક્ય કાલં દણ્ડધરં યથા ।
(Page  ખં. ૫ અ. ૨૮ પાન ૬૨)
પપાલ સ દ્વિજસ્તસ્માત્ હાહાકારકરો ભૃશમ્ ॥ ૭॥

દ્વિજશબ્દં સમાકર્ણ્ય ક્ષત્રિયા આગતા વનાત્ ।
દૈવયોગેન પઞ્ચૈવ સમીપે માર્ગયાયિનઃ ॥ ૮॥

તૈઃ શસ્ત્રૈઃ સ હતઃ પાપી મમાર ચ પપાત હ ।
બ્રાહ્મણો હર્ષસંયુક્તઃ સ્વાશ્રમં ચાગતોઽભવત્ ॥ ૯॥

તતો યામાઃ પ્રગૃહ્યૈવ પિશુનં તં મહાખલમ્ ।
રૌરવે તે વિનિક્ષિપ્ય નરકે પાચયંસ્તદા ॥ ૧૦॥

પઞ્ચમે દિવસે પ્રાપ્તે તત્રાશ્ચર્યં બભૂવ વૈ ।
નરકઃ શાન્તરૂપશ્ચ યાતનાવર્જિતોઽભવત્ ॥ ૧૧॥

તં દૃષ્ટ્વા પરમાશ્ચર્યં યમદૂતા યમં યયુઃ ।
વૃત્તાન્તં કથયામાસુર્નરકસ્ય સુશાન્તિજમ્ ॥ ૧૨॥

તચ્છ્રુત્વા વિસ્મિતો ધર્મો ધ્યાનસંસ્થો બભૂવ હ ।
જ્ઞાત્વા તાન્ કથયામાસ સ્મૃત્વા લમ્બોદરં પ્રભુઃ ॥ ૧૩॥

ધર્મરાજ ઉવાચ ।
પિશુનોઽયં મહાપાપી ચાણ્ડાલો નાઽત્ર સંશયઃ ।
ન યોગ્યો નરકે દૂતા અધુના પુણ્યવાનભૂત્ ॥ ૧૪॥

યત્રાઽયં તુ મૃતસ્તત્ર ગાણપત્યઃ સમાગતઃ ।
તસ્ય મસ્તકગા દૂર્વા પપાત પિશુનોપરિ ॥ ૧૫॥

યસ્ય સ્પર્શો ભવેદ્ દૂતા અસ્થિકસ્ય શવસ્ય વા ।
તસ્ય પાપં લયં સર્વં ગમિષ્યતિ ન સંશયઃ ॥ ૧૬॥

પુણ્યરાશિર્ભવેત્ સોઽપિ સર્વમાન્યો વિશેષતઃ ।
અત એનં તુ નિષ્કાસ્યાનયન્તુ મમ સન્નિધૌ ॥ ૧૭॥

યમસ્ય વચનં શ્રુત્વા વિસ્મિતાસ્તે સમાયયુઃ ।
નિષ્કાસિતું સમુદ્યુક્તાસ્તાવચ્ચિત્રં બભૂવ હ ॥ ૧૮॥

ગણેશદૂતસંયુક્તં વિમાનં નેતુમાયયૌ ।
તં ગૃહ્ય ગાણપત્યાસ્તે યયુઃ સ્વાનન્દકં પુરમ્ ॥ ૧૯॥

પિશુનં બ્રહ્મભૂતં તે ચક્રુર્હર્ષસમન્વિતાઃ ।
પૂર્વદેહસ્ય દૂર્વાયાઃ સ્પર્શે ભક્તિપરાયણાઃ ॥ ૨૦॥

ધર્મોઽતિવિસ્મિતો ભૂત્વા તાન્ જગાદ સ્વસેવકાન્ ।
અહો પશ્યત દૂતેશા દૂર્વામાહાત્મ્યમુત્કટમ્ ॥ ૨૧॥

ધન્યોઽયં પિશુનો પાપી યસ્ય દેહે સમાગતા ।
દૂર્વા યયા વિશેષેણ યોગિનાં પદગોઽભવત્ ॥ ૨૨॥

મહિમાનં તુ દૂર્વાયાઃ કો જાનાતિ સમગ્રકમ્ ।
શવસ્પર્શેન દૂતેશા બ્રહ્મભૂતપદપ્રદમ્ ॥ ૨૩॥

તાનુક્ત્વા સાશ્રુનેત્રઃ સ બભૂવ રવિનન્દનઃ ।

ગણેશં મન્યતે નિત્યં ભજતે ભક્તિસંયુતઃ ॥ ૨૪॥

ઇદં દૂર્વાભવં ચિત્રં માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠતિ તસ્ય વિઘ્નેશો વાઞ્છિતં દદતે સદા ॥ ૨૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે દૂર્વાપત્રસ્પર્શમહિમાવર્ણનં નામાષ્ટાવિંશતિતમોઽધ્યાયઃ ॥ ૫.૨૮
(Page ખં. ૫ અ. ૨૯ પાન ૬૩)

## ૫.૨૯ ત્રિશિરસશ્ચરિતવર્ણનં નામ એકોનત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અન્યત્ત્વં શ‍ૃણુ માહાત્મ્યં દૂર્વાયાઃ સ્વસુખપ્રદમ્ ।
યયા તૃપ્તિસમાયુક્તો બભૂવ દ્વિરદાનનઃ ॥ ૧॥

એકદા નારદો યોગી જગામ જનકાલયમ્ ।
પૂજિતો જનકં સોઽપિ જગાદ હર્ષસંયુતઃ ॥ ૨॥

નારદ ઉવાચ ।
ધન્યસ્ત્વં ગણનાથસ્ય ભક્તઃ પરમભાવિકઃ ।
મનેપ્સિતં ગણાધ્યક્ષો દદતે તે નિયન્ત્રિતઃ ॥ ૩॥

નારદસ્ય વચઃ શ્રુત્વા તં પ્રહસ્ય મહામુનિમ્ ।
જગાદ જનકો વાક્યં યોગયુક્તં સ યોગવિત્ ॥ ૪॥

જનક ઉવાચ ।
યાજ્ઞવલ્ક્યેન યોગશ્ચ કથિતો મે શુભપ્રદઃ ।
પૂર્ણશાન્તિપ્રદો વિપ્ર ગાણેશો નાત્ર સંશયઃ ॥ ૫॥

એકાક્ષરં ગણેશસ્ય દદૌ મન્ત્રં સુસિદ્ધિદમ્ ।
મહ્યં સ કૃપયા યોગિન્ સાધનં પ્રજગામ હ ॥ ૬॥

તથા મયા મહાયોગિન્ સાધિતં જ્ઞાનમુત્તમમ્ ।
ગણેશકૃપયાઽહં તુ યોગી જાતો ગુરુર્યથા ॥ ૭॥

અતોઽહં ગણનાથશ્ચ ન ભિન્નૌ મુનિસત્તમ ।
ગણેશસ્ય કૃપા કુત્ર વર્તતે ભેદદાયિની ॥ ૮॥

મયા યચ્ચિન્તિતં તત્તત્ કથં દદાતિ વિઘ્નપઃ ।
અયોગિનામિદં સર્વં ભ્રાન્તિદં ભવતીત્યહો ॥ ૯॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ તાસાં પ્રકાશકારકઃ ।
ચિન્તામણિઃ સ્વયં સાક્ષાત્ ખેલતિ હૃદિ સંસ્થિતઃ ॥ ૧૦॥

જનકઃ કુત્ર યોગીન્દ્ર વર્તતે વદ સામ્પ્રતમ્ ।
તસ્યોપરિ ગણેશસ્ય કૃપાદિકમિદં મુને ॥ ૧૧॥

અહં હર્તા અહં કર્તાઽહં પાતા ચ મદાત્મનામ્ ।
ભ્રાન્તવદ્ભાષણં યોગ્યં નૈવ તે યોગિસત્તમ ॥ ૧૨॥

જનકસ્ય વચઃ શ્રુત્વા નારદઃ ક્રોધસંયુતઃ ।
ઉવાચ તં મહાભાગં નિર્ભર્ત્સ્ય જનકં પુનઃ ॥ ૧૩॥

નારદ ઉવાચ ।
જ્ઞાનમત્તોઽસિ રાજેન્દ્ર નશ્વરસ્ત્વં કથં ભવેઃ ।
ગણેશાકારરૂપશ્ચ દેહવાન્ ભ્રમધારકઃ ॥ ૧૪॥

બ્રહ્મણસ્પતિનામા વૈ ગણેશો વેદવાદતઃ ।
શરીરે તસ્ય સા સત્તા વર્તતે પૂર્ણભાવતઃ ॥ ૧૫॥

યોગિદેહેન સા સત્તા કદાપિ નૃપ વર્તતે ।
સમાધિના ચ યોગીન્દ્રો ગણેશઃ કથિતો બુધૈઃ ॥ ૧૬॥

પ્રારબ્ધદેહધારિત્વાન્નરો યોગી ન સંશયઃ ।
નરતુલ્યા શરીરેસ્ય ભવેત્ સત્તા હિ સર્વદા ॥ ૧૭॥

ગર્વિષ્ઠો યોગમાહાત્મ્યાજ્જનક ત્વાં વિશેષતઃ ।
ભવિતા ગર્વભઙ્ગસ્તે ગજાનનપ્રસાદતઃ ॥ ૧૮॥

એવમુક્ત્વા નૃપં યોગી કૈલાસે ગણપં યયૌ ।
તં પ્રણમ્ય વિનીતઃ સ વૃત્તાન્તં પ્રજગાદ હ ॥ ૧૯॥

પુનઃ પ્રણમ્ય વિઘ્નેશં યયૌ સ્વેચ્છાચરો મુનિઃ ।
નારદો ગણનાથસ્ય ગાનાસક્તો મહામતિઃ ॥ ૨૦॥

તતો ગજાનનો ભૂપં વૃદ્ધબ્રાહ્મણરૂપધૃક્ ।
આયયૌ જનકં કુષ્ઠી કૃમિભારાકુલઃ પતન્ ॥ ૨૧॥

કમ્પેન સંયુતઃ સોઽપિ દુર્ગન્ધેન સમાવૃતઃ ।

પૂયશોણિતધર્મૌઘૈર્વ્યાપ્તશ્ચ મક્ષિકાવૃતઃ ॥ ૨૨॥

દ્વારપાલેન રાજ્ઞશ્ચાજ્ઞયા તત્ર પ્રવેશિતઃ ।
યયાચે તં નૃપં વિપ્રો ભોજનં તોષકારકમ્ ॥ ૨૩॥

રાજ્ઞા સમ્પૂજિતો વિપ્રો બુભુજેઽન્નં સમાગતમ્ ।
અન્નં પુનર્યયાચે તં પુષ્કલં પ્રદદૌ નૃપઃ ॥ ૨૪॥

તદેવ તેન સમ્ભુક્તં પુના રાજા ભયાકુલઃ ।
અયુતાનાં સમં તસ્મૈ દદાવન્નં સુતુષ્ટિદમ્ ॥ ૨૫॥

(Page ખં. ૫ અ. ૨૯ પાન ૬૪)
ભક્ષયિત્વા તદપિ સ યયાચેઽન્નં મહામુનિઃ ।
તતોઽપક્વં દદૌ તસ્મૈ તદ્ બભક્ષ દ્વિજોત્તમઃ ॥ ૨૬॥

તતો રાજા પુરે સંસ્થં ભૂમિસ્થં પ્રદદૌ પુનઃ ।
અન્નં બભક્ષ તત્ સોઽપિ યયાચે તં ધરાપતિમ્ ॥ ૨૭॥

પુરપ્રાન્તે સ્થિતા ગ્રામાસ્તેભ્યો રાજ્ઞા સમાહૃતમ્ ।
અન્નં દત્તં ચ વિપ્રેણ ભક્ષિતં સકલં પ્રભો ॥ ૨૮॥

યયાચે સ નૃપં વિપ્રો દેહ્યન્નં રાજસત્તમ ।
રાજ્ઞા લજ્જાસમાયુક્તો ન કિઞ્ચિત્તમુવાચ હ ॥ ૨૯॥

રાજાનં મુનિવર્યશ્ચ જગાદ પ્રહસન્નિવ ।
ત્વં ગણેશો ન સન્દેહઃ કથં સત્તાવિવર્જિતઃ ॥ ૩૦॥

અકર્તું કર્તુમદ્યૈવાન્યથા કર્તું ગજાનનઃ ।
સમર્થસ્ત્વં કથં રાજંસ્તૂષ્ણીં તિષ્ઠસિ તદ્ વદ ॥ ૩૧॥

ભ્રાન્તો યોગમદેનાસિ રાજેન્દ્રાત્ર ન સંશયઃ ।
પ્રત્યક્ષં નરતુલ્યોઽસિ ન ગણેશો મતઃ કદા ॥ ૩૨॥

એવમુક્ત્વા ગણેશાનો બ્રાહ્મણસ્ય સ્વરૂપધૃક્ ।
બહિર્નિઃસૃત્ય લોકાન્ સ યયાચેઽન્નં ક્ષુધાતુરઃ ॥ ૩૩॥

લોકાઃ સર્વે સમૂચુસ્તં સર્વેષાં ગૃહગં મુને ।
રાજ્ઞા સમાહૃતં ચાન્નં ત્વયા સર્વં પ્રભક્ષિતમ્ ॥ ૩૪॥

નાસ્મદ્ગેહેઽધુના કિઞ્ચિદન્નં ત્વં ગચ્છ વાડવ ।
સર્વભક્ષઃ કુતો યાતઃ કોઽસિ ન જ્ઞાયતે જનૈઃ ॥ ૩૫॥

શ્રુત્વા સોઽપિ હસન્ વિપ્રો બભ્રામ યત્ર તત્ર તુ ।
પુરપ્રાન્તે ગતો દૈવાદ્ દદર્શદ્ વાડવાલયમ્ ॥ ૩૬॥

ત્રિશિરા મુનિવર્યશ્ચાયાચિતા વૃત્તિધારકઃ ।
ગાણપત્યાગ્રણીઃ પત્ન્યા સ વિરોચનયા યુતઃ ॥ ૩૭॥

તં દદર્શ ગણેશાનઃ પ્રવિવેશ તદાશ્રમમ્ ।
સર્વાપકારસંયુક્તં ધાતુધાન્યાદિવર્જિતમ્ ॥ ૩૮॥

યયાચે તં મહાભાગમન્નં તૃપ્તિકરં મુને ।
દીયતાં મે ક્ષુધાર્તાય ગાણપત્યસ્વરૂપધૃક્ ॥ ૩૯॥

જગાદ ત્રિશિરાસ્તત્ર બ્રાહ્મણં વાક્યમુત્તમમ્ ।
મદ્ગૃહે નૈવ વિપ્રેન્દ્ર ધાન્યં કિઞ્ચિત્ પ્રવર્તતે ॥ ૪૦॥

દરિદ્રાણાં મહારાજોઽહમેકો નાત્ર સંશયઃ ।
મત્સમો માનવો યુક્તો દારિદ્યેણ ન તિષ્ઠતિ ॥ ૪૧॥

દૂર્વાઙ્કુરાઃ સમાનીતા ગણેશપૂજનાય ચ ।
તેષ્વેકો વિદ્યતે વિપ્ર નાન્યત્ કિઞ્ચિદ્ વિચારય ॥ ૪૨॥

તસ્ય તદ્ વચનં શ્રુત્વા જગાદ ક્ષુધિતો દ્વિજઃ ।
ભક્ત્યા દેહિ મહાભાગ દૂર્વાઙ્કુરં ક્ષુધાપહમ્ ॥ ૪૩॥

તતો વિરોચના વિપ્રં દદૌ નત્વા ગજાનનમ્ ।
ધ્યાત્વા દૂર્વાઙ્કુરં તસ્મૈ નાનાન્નં કલ્પ્ય તત્ર સા ॥ ૪૪॥

ભક્ત્યા દત્તં તયા વિપ્રો બભક્ષ પ્રીતિસંયુતઃ ।
તેન દૂર્વાઙ્કુરેણૈવ સન્તૃપ્તોઽભૂન્ મહામતે ॥ ૪૫॥

ભક્ત્યા તુષ્ટો દદૌ વિપ્રં દર્શનં ગણનાયકઃ ।
ગજવક્ત્રાદિચિહ્નૈશ્ચ યુતં રૂપં પરાત્પરમ્ ॥ ૪૬॥

દૃષ્ટ્વા લમ્બોદરં તૌ તુ પ્રણેમતુઃ પુનઃ પુનઃ ।
તં સાશ્રુનયનૌ પૂજ્ય તુષ્ટુવતુઃ કૃતાઞ્જલી ॥ ૪૭॥

વિરોચનાત્રિશિરસાવૂચતુઃ ।
ગણેશાય નમસ્તુભ્યં નમઃ સર્વપ્રિયઙ્કર ।
બ્રહ્મણે બ્રહ્મનાથાય વિઘ્નેશાય નમો નમઃ ॥ ૪૮॥

હેરમ્બાય પરેશાય મૂષકધ્વજિને નમઃ ।
આત્મનેઽનાત્મને તુભ્યં નમો લમ્બોદરાય વૈ ॥ ૪૯॥

અનામય હ્યનાધાર સર્વાધાર સુમૂર્તયે ।
(Page ખં. ૫ અ. ૨૯ પાન ૬૫)
વક્રતુણ્ડાય સર્વેષાં નમઃ પૂજ્યાય તે નમઃ ॥ ૫૦॥

આદિમધ્યાન્તહીનાય તદાકારાય ઢુણ્ઢયે ।
જ્યેષ્ઠરાજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૫૧॥

સર્વાદિશૂર્પકર્ણાય પૂર્ણાય ધરણીધર ।
શેષનાભિવિભૂષાય નમશ્ચિન્તામણે નમઃ ॥ ૫૨॥

સિદ્ધિબુદ્ધિપ્રદાત્રે તે સ્વાનન્દે વાસકારિણે ।
ભક્તેભ્યઃ શાન્તિદાત્રે વૈ શાન્તિસ્થાય નમો નમઃ ॥ ૫૩॥

સિદ્ધિબુદ્ધિવરાયૈવ નમો મૂષકવાહન ।
ગજાનનાય જ્યેષ્ઠેભ્યઃ પદજ્યેષ્ઠપ્રદાયિને ॥ ૫૪॥

ધન્યૌ માતા પિતા નાથ કુલશીલાદિકં ચ મે ।
યેન દૃષ્ટો ગણાધીશો વેદાન્તાગોચરો વિભુઃ ॥ ૫૫॥

વેદા વિદુર્નો ન ચ યોગિનોઽયં બ્રહ્માદયો વેદવિદઃ શિવાદયઃ ।
શાન્ત્યા પ્રલભ્યં ગણનાથમેવં પશ્યાવહે ચિત્રમિદં ન સંશયઃ ॥ ૫૬॥

પરાત્પરસ્ત્વં પરમપ્રમેયઃ કથં મહાત્મન્ સદને ગતો મમ ।
ન મત્સમો હ્યણ્ડકટાહમધ્યે ગણેશ તે પાદસમીપગાદહો ॥ ૫૭॥

એવં સંસ્તુવતસ્તસ્ય સસ્ત્રીકસ્ય મહામુને ।
અત્યન્તભક્તિમાહાત્મ્યાત્ કણ્ઠરોધઃ સમાભવત્ ॥ ૫૮॥

નનર્ત પરમાનન્દયુક્તસ્તત્ર પ્રજાપતે ।
સરોમાઞ્ચો ન સસ્માર યથા ભ્રાન્તશ્ચ સાશ્રુકઃ ॥ ૫૯॥

તતસ્તં ગણનાથો વૈ જગાદ વચનં હિતમ્ ।
સ્વયં સાશ્રુઃ સરોમાઞ્ચો ભક્તિં દૃષ્ટ્વા મહામુને ॥ ૬૦॥

શ્રીગણેશ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં બહુ ।
ભવિષ્યતિ જનાનાં વૈ મુને મદ્ભક્તિવર્ધનમ્ ॥ ૬૧॥

યઃ પઠિષ્યતિ યો મર્ત્યઃ શ્રોષ્યતે સર્વમાલભેત્ ।
ભુક્તિં મુક્તિં બ્રહ્મભૂયં સર્વદા મત્પ્રિયો ભવેત્ ॥ ૬૨॥

વરાન્ વૃણુ મહાયોગિંસ્ત્રિશિરો મનસીપ્સિતાન્ ।
સર્વં દાસ્યામિ ભક્ત્યા તે તોષિતોઽહં ન સંશયઃ ॥ ૬૩॥

ગણેશવચનં શ્રુત્વા સસ્ત્રીકસ્ત્રિશિરાઃ પુનઃ ।
ઉવાચ તં પ્રણમ્યાદૌ ભક્ત્યા નમ્રો મહામુનિઃ ॥ ૬૪॥

ત્રિશિરા ઉવાચ ।
માં મોહયસિ કિં નાથ ન વૃણોમિ ગજાનન ।
સર્વં ભ્રાન્તિપ્રદં મત્વા ભક્તિં યાચે ત્વયિ સ્થિરામ્ ॥ ૬૫॥

શ્રુત્વા જગાદ તં વિઘ્નરાજોઽસૌ વિસ્મિતોઽભવત્ ।
અહો યઃ સુદૃઢાં ભક્તિમેકાં વૃણોતિ વાડવઃ ॥ ૬૬॥

શ્રીગણેશ ઉવાચ ।
પૂર્ણાં ભક્તિં મહાયોગિન્ લભસે નાત્ર સંશયઃ ।
મદીયાં તે વશે નિત્યં ભવિષ્યામિ તયા કિલ ॥ ૬૭॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
સસ્ત્રીકસ્ત્રિશિરાસ્તત્ર ખેદયુક્તો બભૂવ હ ॥ ૬૮॥

ગણેશકૃપયા તત્ર ગૃહં તસ્ય મહામુનેઃ ।
શુશુભે રત્નસંયુક્તં સુવર્ણભિત્તિરાજિતમ્ ॥ ૬૯॥

દ્વારિ નાના જનાસ્તત્ર સુવર્ણયષ્ટિધારકાઃ ।
સ્થિતાસ્તથા સ્ત્રિયો દાસાઃ સેવાં કર્તું સુલાલસાઃ ॥ ૭૦॥

નાનાસમ્પત્તિસંયુક્તં દૃષ્ટ્વાઽસૌ વિસ્મિતોઽભવત્ ।
તાવદ્દાસાશ્ચ તં ગૃહ્ય સેવાં ચક્રુઃ સુભાવિકાઃ ॥ ૭૧॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં મુનિઃ પત્નીં સમબ્રવીત્ ।
માયા ભક્તિપ્રણાશાર્થં દત્તા વિઘ્નેશ્વરેણ ચ ॥ ૭૨॥

અતો યત્નસમાયુક્તા ભુઙ્ક્ષ્વ ભોગાન્ મહાસતિ ।
એવં મદવિહીનૌ તૌ પરં બુભુજતુઃ સુખમ્ ॥ ૭૩॥

(Page ખં. ૫ અ. ૩૦ પાન ૬૬)
દાનમાર્ગેણ સ દદૌ દ્રવ્યં નાનાવિધં વિધે ।

તથાપિ તાદૃશં તત્ર રેજે સોઽપિ સુવિસ્મિતઃ ॥ ૭૪॥

એતત્તે કથિતં કિઞ્ચિત્ દૂર્વામાહાત્મ્યમુત્કટમ્ ।
ગણેશતોષકં પૂર્ણં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૭૫॥

ગણેશરોમકૂપેષુ બ્રહ્માણ્ડાનિ હ્યનેકશઃ ।
બ્રહ્મ નાનાવિધં દેહે સ્થિતં તસ્ય પ્રજાપતે ॥ ૭૬॥

તત્સર્વં તૃપ્તિમાયાતિ તૃપ્તે વિઘ્નેશ્વરે પરે ।
ફલં તસ્ય ચ લોકે કો વર્ણયેદ્વદ માનદ ॥ ૭૭॥

ત્રૈલોક્યાદિકમેતસ્માન્ન તુલ્યં દૂર્વયા ભવેત્ ।
અપારપુણ્યદા પ્રોક્તા ગણેશે તોષકારિણી ॥ ૭૮॥

દૂર્વાયા મહિમા દક્ષ કથિતો બ્રહ્મદાયકઃ ।
ભુક્તિમુક્તિપ્રદઃ પૂર્ણઃ પઠતે શ‍ૃણ્વતે ભવેત્ ॥ ૭૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ત્રિશિરસશ્ચરિતવર્ણનં નામ એકોનત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૨૯

## ૫.૩૦ દૂર્વામાહાત્મ્યવર્ણનં નામ ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
શ્રુતં દૂર્વાર્પણસ્યાઽપિ માહાત્મ્યં સર્વસિદ્ધિદમ્ ।
ન દૂર્વયા સમં કિઞ્ચિદ્ દૃશ્યતે ભુવનેષુ વૈ ॥ ૧॥

તથાપિ તૃપ્તિં નો યામિ યોગામૃતપરાયણઃ ।
અતો મે વદ યોગીન્દ્ર જનકસ્ય કથાનકમ્ ॥ ૨॥

ગણેશેન મહાયોગી જનકશ્છલિતોઽભવત્ ।
કિં ચકાર તતઃ સોઽપિ ગતે વિઘ્નેશ્વરે વદ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ પ્રજાપતે ચિત્રં ચરિત્રં જનકસ્ય ચ ।
ગતે ગણેશ્વરે સોઽપિ દુઃખયુક્તો બભૂવ હ ॥ ૪॥

શુશોચ હૃદિ સઙ્ક્ષુબ્ધો જગાદ સ્વસ્ય ચેતસિ ।
અહો નારદવિપ્રેણ કથિતં સત્યમેવ તત્ ॥ ૫॥

દેહો ભક્તિકરઃ પ્રોક્તો ન ભજેદ્યસ્તમાપ્ય સઃ ।
ગજાનનં નરો નિત્યં વઞ્ચિતો માયયા પરમ્ ॥ ૬॥

કર્મનિષ્ઠૈર્ગણેશાનઃ સેવ્યઃ સ્વહિતકારણાત્ ।
તપઃફલપ્રદઃ સેવ્યઃ તપોનિષ્ઠૈસ્તથાઽપિ સઃ ॥ ૭॥

જ્ઞાનનિષ્ઠૈઃ સદા સેવ્યો જ્ઞાનસિદ્ધિપ્રદાયકઃ ।
યોગિભિર્યોગદાતા સ સેવ્યો બ્રહ્મમયઃ પ્રભુઃ ॥ ૮॥

અહો દેહધરઃ સાક્ષાદ્બ્રહ્મણસ્પતિવાચકઃ ।
વેદેષુ કથિતશ્ચાયં ગણેશો નાત્ર સંશયઃ ॥ ૯॥

સન્ત્યજ્ય મૂર્ખવદ્ભ્રાન્તોઽહં ગણેશં પ્રભાવતઃ ।
યોગસ્ય ચાવદં મિથ્યા નરતુલ્યસ્વભાવવાન્ ॥ ૧૦॥

ગણેશભજનં મુખ્યં ધૃતં યેન મહાત્મના ।
સ યોગીન્દ્રગુરુઃ સાક્ષાત્તત્સમં નૈવ વિદ્યતે ॥ ૧૧॥

એવં ક્ષોભસમાયુક્તો જનકઃ સ્વગૃહે સ્થિતઃ ।
સમાયયુશ્ચ યોગીન્દ્રાસ્તં નવર્ષભનન્દનાઃ ॥ ૧૨॥

નગ્નાઃ સર્વત્ર પૂજ્યાશ્ચ સદા યૌવનધારકાઃ ।
અવ્યાહતાસ્ત્રિલોકેષુ ભ્રમન્તઃ સ્વેચ્છયાચરાઃ ॥ ૧૩॥

સર્વવન્દ્યાઃ સદા દક્ષ બ્રહ્મભૂયપરાયણાઃ ।
(Page ખં. ૫ અ. ૩૦ પાન ૬૭)
વિધિનિષેધહીનાશ્ચ યોગરૂપધરા ઇવ ॥ ૧૪॥

ગણેશસ્ય ચરિત્રાણિ કથયન્તઃ પરસ્પરમ્ ।
તદ્રૂપાસ્તસ્ય નામાનિ વદન્તો હર્ષસંયુતાઃ ॥ ૧૫॥

સ્વપરભ્રાન્તિશૂન્યાશ્ચ સમલોષ્ટાશ્મકાઞ્ચનાઃ ।
ભેદાભેદવિહીના વૈ વર્ણાશ્રમવિવર્જિતાઃ ॥ ૧૬॥

સ્વેચ્છયા કર્મ કર્તારઃ સ્વેચ્છયા જ્ઞાનધારકાઃ ।
સ્વેચ્છયા સમશીલા વૈ સ્વેચ્છયા સહજપ્રિયાઃ ॥ ૧૭॥

સ્વેચ્છયા સ્વસ્વરૂપસ્થા સ્વેચ્છયા યોગતત્પરાઃ ।
સ્વેચ્છયા પૂર્ણયોગસ્થા વર્ણવન્તશ્ચ સ્વેચ્છયા ॥ ૧૮॥

સ્વેચ્છયાઽઽશ્રમસંયુક્તાઃ સ્વેચ્છયા વિધિધારકાઃ ।

નિષેધે સ્વેચ્છયા યુક્તાઃ સ્વાધીનાસ્તે ચ યોગિનઃ ॥ ૧૯॥

વિધિનિષેધહીનાશ્ચ સ્વેચ્છયા વૈ વિનાયકાઃ ।
દણ્ડાદિભિર્વિહીનાસ્તે ગણેશગાનતત્પરાઃ ॥ ૨૦॥

તાન્ દૃષ્ટ્વા જનકો રાજા સમ્ભ્રમાકુલચેતસા ।
સમુત્થાય નનામાઽઽદૌ દણ્ડવત્ પૃથિવીતલે ॥ ૨૧॥

ઉત્થાય તાન્ પ્રપૂજ્યાઽથ ભોજયામાસ ચાન્ધસા ।
પાદસંવાહને સંસ્થો જગાદ વચનં હિતમ્ ॥ ૨૨॥

જનક ઉવાચ ।
ધન્યૌ મે પિતરૌ વિદ્યા તપઃસ્વાધ્યાયકાદયઃ ।
બ્રહ્મણસ્પતિરૂપાણાં ભવતાં દર્શનાત્ કિલ ॥ ૨૩॥

નિઃસ્પૃહાઃ સર્વભાવેષુ ભવન્તો નાત્ર સંશયઃ ।
તથાપિ ભવદાજ્ઞાં વૈ કર્તુમીહે ચ યોગિનઃ ॥ ૨૪॥

ભવતાં કિઞ્ચિદાજ્ઞાયાં સંસ્થિતો યદિ માનવઃ ।
સકૃત્તસ્ય પુનર્જન્મ વિદ્યતે નૈવ ભક્તિભાક્ ॥ ૨૫॥

અવમાનેન સદ્યો વૈ નારકી જાયતે નરઃ ।
સાક્ષાદ્યોગસ્વરૂપાશ્ચ ભવન્તઃ કૃપયાઽઽગતાઃ ॥ ૨૬॥

ન મત્સમસ્ત્રિલોકેષુ ભવતાં દર્શનાદ્ભવેત્ ।
અધુના કૃતકૃત્યોઽસ્મિ જાતોઽહં ભાગ્યગૌરવાત્ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
જનકસ્ય વચઃ શ્રુત્વા સાધુ તં તે પ્રજાપતે ।
જગુઃ પ્રહૃષ્ટભાવેન રાજાનં શાન્તિદાયકાઃ ॥ ૨૮॥

નવયોગિન ઊચુઃ ।
ધન્યસ્ત્વં માનવો રાજા વિદેહોઽસિ ન સંશયઃ ।
સાધુત્વે દેહસંસ્થોઽપિ ત્વયિ ચિત્રં ન સમ્ભવેત્ ॥ ૨૯॥

સાધુદર્શનકામાશ્ચ વયં તે ગૃહમાગતાઃ ।
દૃષ્ટ્વા ત્વાં યોગિનં પૂર્ણં તૃપ્તાઃ સ્મઃ શ્રુતકીર્તયઃ ॥ ૩૦॥

ગચ્છામો રાજશાર્દૂલ નેચ્છામઃ કિઞ્ચિદપ્યહો ।
પૂજાં ત્વયા કૃતાં દૃષ્ટ્વા સન્તુષ્ટાઃ સ્મો મહામતે ॥ ૩૧॥

તેષાં તદ્વચનં શ્રુત્વા તાન્ જગાદ નૃપઃ પુનઃ ।
પ્રણમ્ય ભક્તિસંયુક્તો હિતં સર્વજનપ્રિયઃ ॥ ૩૨॥

જનક ઉવાચ ।
વદેત યોગસંસિધ્યૈ કિં કર્તવ્યં જનૈઃ સદા ।
યેન યોગીન્દ્ર વન્દ્યાસ્તે ભવન્તિ માનવા બુધાઃ ॥ ૩૩॥

કવિરુવાચ ।
સ્વધર્મપાલકો નિત્યં ભવેદ્યોગપરાયણઃ ।
રજસ્તમસ્તિરસ્કૃત્ય સત્ત્વયુક્તો મુમુક્ષુકઃ ॥ ૩૪॥

ગણેશાર્પણબુદ્ધ્યા વૈ કર્માણિ સતતં નરઃ ।
કુર્યાચ્છ્રૌતાનિ સ્માર્તાનિ વ્રતાદીનિ વિશેષતઃ ॥ ૩૫॥

આન્તરાણિ મહારાજ વાયુસાધનકાનિ વૈ ।
સ્મૃતાનિ તાનિ સર્વાણિ કુર્યાત્ ધ્યાનપરાયણઃ ॥ ૩૬॥

ગણેશસ્ય સદા ધ્યાનં કુર્યાત્ સ્વહૃદિ ભૂમિપ ।
એકાક્ષરાદિમન્ત્રાશ્ચ તેષ્વૈકજપકારકઃ ॥ ૩૭॥

સમ્પ્રજ્ઞાતસમાધિસ્થઃ સમ્ભવેદ્યદિ માનવઃ ।
તથાપિ ગણરાજસ્ય ધ્યાનં નૈવ પરિત્યજેત્ ॥ ૩૮॥

અસમ્પ્રજ્ઞાતયોગસ્થઃ ભવેદ્યદિ સ માનવઃ ।
તથાપિ વિઘ્નરાજસ્ય સદા ધ્યાનં સમાચરેત્ ॥ ૩૯॥

ગણેશધ્યાનસંયુક્તો યોગભૂમિં નૃપાત્મજ ।
સ ચ સ્વલ્પેન કાલેનોલ્લઙ્ઘયેદ્વિઘ્નહાનતઃ ॥ ૪૦॥

તતો યોગી ભવેન્નૂનં શાન્તિયોગપરાયણઃ ।
ચિત્તે ચિન્તામણૌ સોઽપિ તદાકારઃ સુસાધનાત્ ॥ ૪૧॥

ન ગણેશસમં કિઞ્ચિજ્જગત્સુ બ્રહ્મદં ભવેત્ ।
સર્વેભ્યો યોગદાનાર્થં બભૂવે દેહધારકઃ ॥ ૪૨॥

એતત્તે કથિતં ભૂપ યોગપ્રાપ્તૌ સુસિદ્ધિદમ્ ।
ભજનં સિદ્ધિનાથસ્ય યોગસિદ્ધિપ્રદાયકમ્ ॥ ૪૩॥

જનક ઉવાચ ।
કથં ચિન્તામણિઃ પ્રોક્તો ગણેશાનો વદન્તુ મે ।

તસ્ય રૂપં કથં જ્ઞેયં નરૈશ્ચિત્તે વિશેષતઃ ॥ ૪૪॥

હરિરુવાચ ।
ચિત્તં પઞ્ચવિધં પ્રોક્તં તત્ર ચિન્તામણિઃ સ્થિતઃ ।
ચિત્તપ્રકાશકત્વાદ્વૈ વિઘ્નેશાનઃ પ્રકથ્યતે ॥ ૪૫॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
પઞ્ચધા ચિત્તમેવં તુ ભવતે શ‌ૃણુ ભૂમિપ ॥ ૪૬॥

યત્ર ક્ષિપ્તં મનઃ સર્વૈસ્તત્ર જ્ઞાનયુતં ભવેત્ ।
તદેવ કર્તુમુદ્યુક્તં સમર્થં સમ્ભવેત્ કથમ્ ॥ ૪૭॥

ક્ષિપ્તં ચિત્તં વિજાનીહિ સ્મૃતસ્તત્ર પ્રકાશકઃ ।
ચિન્તામણિર્ગણાધીશસ્તં ભજસ્વ મહામતે ॥ ૪૮॥

યત્ર ક્ષિપ્તં નરેણૈવ ચિત્તં તત્ર ન ગચ્છતિ ।
જ્ઞાનહીનતયા તસ્ય મૂઢવન્ મૂઢસંજ્ઞિતમ્ ॥ ૪૯॥

અન્યચ્ચ ભ્રાન્તિયુક્તાનાં પિશાચવત્ સ્થિતં સદા ।
ચિત્તં તદેવ મૂઢં ચ જ્ઞાતવ્યં જનવત્સલ ॥ ૫૦॥

તત્ર પ્રકાશકર્તા સ નાનાખેલપરાયણઃ ।
ચિન્તામણિર્ગણાધ્યક્ષઃ સ તિષ્ઠતિ ભજસ્વ તમ્ ॥ ૫૧॥

સત્વભાવસમાયુક્તો માનવો મોક્ષકામુકઃ ।
બ્રહ્માર્પણતયા સર્વં કુરુતે કર્મ નિત્યદા ॥ ૫૨॥

બ્રહ્માનુભવહીનો ન જગત્સુ સુખલાલસઃ ।
બ્રહ્માર્થં તસ્ય ચિત્તં વૈ વિક્ષિપ્તં કથિતં બુધૈઃ ॥ ૫૩॥

સંસારે ક્ષિપ્તભાવશ્ચ તસ્માદ્વિગતક્ષેપણમ્ ।
કર્તું સમુદ્યતઃ સોઽપિ સદા સાધનતત્પરઃ ॥ ૫૪॥

અનેન વિધિના રાજન્ વિક્ષિપ્તં ચિત્તમુચ્યતે ।
તત્ર પ્રકાશકર્તારં ચિન્તામણિં ભજસ્વ તમ્ ॥ ૫૫॥

જ્ઞાનદૃષ્ટિઃ સમુત્પન્ના હૃદિ સર્વત્ર ભૂમિપ ।
સાક્ષાદ્ભાવસ્યૈક્યકરાવયવાદિકવર્જિતા ॥ ૫૬॥

તયા સોઽપિ નરસ્તત્ર યત્ર પશ્યતિ યોગવિત્ ।
આકારરહિતં ભાતિ વિશ્વં સર્વં ન સંશયઃ ॥ ૫૭॥

અષ્ટધા સા સમાખ્યાતા સમ્પ્રજ્ઞાતસ્વરૂપિકા ।
એકભાવકરા વૃત્તિરેકાગ્રા કથિતા બુધૈઃ ॥ ૫૮॥

તત્ર ચિન્તામણિઃ સાક્ષાત્ પ્રકાશકારકઃ સ્મૃતઃ ।
તં ભજસ્વ વિધાનેન સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૯॥

જગદવયવૈર્યુક્તં ચતુર્દેહમયં નૃપ ।
બિન્દુસ્તસ્ય પરા કાષ્ઠા બ્રહ્મકાયાપ્રધારકમ્ ॥ ૬૦॥

દેહી ભેદવિહીનશ્ચ દેહચાલક ઉચ્યતે ।
સોઽહં માત્રાત્મકઃ સોઽપિ કથિતો વેદવાદિભિઃ ॥ ૬૧॥

તયોર્યોગે નિરોધશ્ચ સદા ભવતિ ચેતસઃ ।
તસ્ય ભેદૌ સમાખ્યાતૌ સંયોગાયોગરૂપિણૌ ॥ ૬૨॥

સ્વત ઉત્થાનયુક્તં પરત ઉત્થાનધારકમ્ ।
સ્વતઃ પરત ઉત્થાનવર્જિતં બ્રહ્મ ઉચ્યતે ॥ ૬૩॥

એતત્ સંયોગકં પ્રોક્તં સમાધેર્ધારકં પરમ્ ।
સર્વેષાં તત્ર સંયોગો બ્રહ્માકારેણ જાયતે ॥ ૬૪॥

(Page ખં. ૫ અ. ૩૦ પાન ૬૯)
અન્યદયોગરૂપં વૈ નિવૃત્તેર્ધારકં પરમ્ ।
બ્રહ્મ માયાવિહીનં તુ વ્યતિરેકપ્રભાવતઃ ॥ ૬૫॥

કેષાઞ્ચિત્તત્ર સંયોગો બ્રહ્મણાં જગતાં ભવેત્ ।
નૈવ કેષુ ચ તસ્યાપિ બ્રહ્માયોગં પ્રકથ્યતે ॥ ૬૬॥

સ્વકીયભેદનાશેન લભ્યતે નાત્ર સંશયઃ ।
તદેવ બ્રહ્મભૂતત્વં નિરોધવૃત્તિજં મતમ્ ॥ ૬૭॥

નિરોધે ચિત્તકે રાજન્ પ્રકાશદગણેશ્વરમ્ ।
ચિન્તામણિં ભજસ્વ ત્વં પરં તત્ ખેલલાલસમ્ ॥ ૬૮॥

પઞ્ચધા ચિત્તભૂમિસ્થં ત્યક્ત્વા યોગપરો ભવેત્ ।
સ્વયં ચિન્તામણિઃ સાક્ષાદ્ભવતે ચિત્તનાશનાત્ ॥ ૬૯॥

શાન્ત્યા સર્વત્ર રાજેન્દ્ર ચિત્તેષુ નિત્યમાદરાત્ ।
ચિન્તામણિઃ પ્રલભ્યેત ત્યક્ત્વા સદ્યશ્ચ ચિન્તનમ્ ॥ ૭૦॥

એતત્તે કથિતં પૂર્ણં ચિન્તામણિસ્વરૂપકમ્ ।
તં ભજસ્વ વિધાનેન શાન્ત્યા યોગપરાયણઃ ॥ ૭૧॥

જનક ઉવાચ ।
એતાદૃશો ગણેશાનઃ કથં દેહધરોઽભવત્ ।
તત્ર શ્રદ્ધાદિકં નાથાસ્તાદૃશં જાયતે કથમ્ ॥ ૭૨॥

અન્તરિક્ષ ઉવાચ ।
વામભાગે રાજસશ્ચ દક્ષિણે તામસઃ સ્મૃતઃ ।
મધ્યે સત્ત્વમયઃ પ્રોક્તસ્તેષાં યોગે તુરીયકઃ ॥ ૭૩॥

ચતુર્વિધમયો દેહસ્તત્રાહઙ્કારધારકઃ ।
દેહી ચ તન્મયઃ સાક્ષાત્ કણ્ઠાધો ગણનાયકઃ ॥ ૭૪॥

યસ્માત્ સર્વં સમુત્પન્નં યત્ર ગચ્છતિ ભૂમિપ ।
સમાધિના મહોગ્રેણ પ્રલયે તદ્ગજઃ સ્મૃતઃ ॥ ૭૫॥

કદા ન જાયતે ભૂપ લયં ગચ્છતિ નો કદા ।
તદેવ ગજશબ્દાખ્યં બ્રહ્મ વેદૈઃ પ્રકથ્યતે ॥ ૭૬॥

તદેવ મસ્તકં તસ્ય ગણેશસ્ય મહાત્મનઃ ।
તયોર્યોગે ગણાધ્યક્ષઃ સાકારો ભવતીત્યહો ॥ ૭૭॥

સમ્પ્રજ્ઞાતમયો દેહઃ કણ્ઠાધસ્તસ્ય કીર્તિતઃ ।
અસમ્પ્રજ્ઞાતરૂપં ચ કણ્ઠાદૂર્ધ્વં શિરઃ સ્મૃતમ્ ॥ ૭૮॥

તયોર્યોગે સ્વયં સાક્ષાદ્ભક્તાનુગ્રહકારણાત્ ।
દેહધારી બભૂવાઽપિ ગણેશો બ્રહ્મનાયકઃ ॥ ૭૯॥

ન સર્વસમભાવાખ્યો દેહસ્તસ્ય મહાત્મનઃ ।
દેહધારી ગણાધીશો ભક્તિભોગાર્થમઞ્જસા ॥ ૮૦॥

ન ભક્તેશ્ચ સમં તસ્ય પ્રિયં રાજેન્દ્ર વર્તતે ।
તદર્થં સકલં હિત્વા ભક્તાધીનો ભવેત્ સ્વયમ્ ॥ ૮૧॥

માયયા ભ્રાન્તચિત્તાનાં દેહધારી યથા નરઃ ।
તથાઽયં ભવતિ પ્રાજ્ઞ સાક્ષાદ્યોગસ્વરૂપધૃક્ ॥ ૮૨॥

જનક ઉવાચ ।
કીદૃશી ગણરાજસ્ય માયા ભ્રાન્તિકરી મતા ।

તાં મે વદત યોગીન્દ્રા બ્રહ્મભૂયાર્થમઞ્જસા ॥ ૮૩॥

પ્રબુદ્ધ ઉવાચ ।
વામાઙ્ગાત્ સિદ્ધિરુત્પન્ના વામભાગપ્રકાશિની ।
દક્ષિણાઙ્ગાત્તથા બુદ્ધિર્દક્ષિણાઙ્ગધરા બભૌ ॥ ૮૪॥

સિદ્ધિપુત્રઃ સ્વયં લક્ષો બુદ્ધિપુત્રો મહામતે ।
લાભસ્તયોશ્ચ ચિત્તાત્તૌ સઞ્જાતૌ ખેલકૌ પરૌ ॥ ૮૫॥

માયામોહિતચિત્તાનાં ભ્રામકૌ નાત્ર સંશયઃ ।
તયો રૂપં પ્રવક્ષ્યામિ શ‍ૃણુ લોકહિતાય ચ ॥ ૮૬॥

પાપેષુ ચ નરા રાજન્ યદા લક્ષં પ્રકુર્વતે ।
તદા નરકદો લાભો ભવતે પાપકારિણામ્ ॥ ૮૭॥

યદા પુણ્યેષુ લક્ષં વૈ કુર્વતે માનવા નૃપ ।
તદા સ્વર્ગપ્રદો લાભો જાયતે પુણ્યકર્મણામ્ ॥ ૮૮॥

યદા બ્રહ્મણિ લક્ષં વૈ કુર્વતે માનવા નૃપ ।
તદા યોગમયો લાભઃ સદા ભવતિ યોગિનામ્ ॥ ૮૯॥

હૃદિ લક્ષઃ સ્થિતો નિત્યં સર્વત્ર લક્ષદાયકઃ ।
પદાર્થેષુ સ્થિતો લાભો મતો નાના ફલપ્રદઃ ॥ ૯૦॥

તાભ્યાં સ યુવરાજાભ્યાં વિઘ્નેશો માયયા ચરન્ ।
બન્ધહીનઃ ખેલતિ ચ સ્વેચ્છાચારિસ્વરૂપધૃક્ ॥ ૯૧॥

તત્ર ભ્રાન્તિકરી પ્રોક્તા સિદ્ધિઃ સર્વત્ર વર્તતે ।
સિદ્ધ્યર્થં સર્વલોકાશ્ચ બભ્રમુસ્ત્વં વિચારય ॥ ૯૨॥

ધર્મસિદ્ધિસ્તથાર્થસ્ય સિદ્ધિઃ કામપ્રદાયિની ।
મોક્ષસિદ્ધિસ્તથા રાજન્ બ્રહ્મભૂયકરી મતા ॥ ૯૩॥

અહં ગણેશરૂપશ્ચેત્ કથમત્ર પ્રવર્તતે ।
ભુક્તિમુક્તિબ્રહ્મભૂયં સિદ્ધિઃ સુભ્રાન્તિદા મતા ॥ ૯૪॥

ભ્રાન્તિધારકરૂપા સા બુદ્ધિઃ સર્વત્ર વર્તતે ।
બુદ્ધ્યા બુદ્ધ્વા તુ રાજેન્દ્ર પશ્ચાન્ મોહો નિવર્તતે ॥ ૯૫॥

પઞ્ચચિત્તમયી બુદ્ધિઃ સ્વયં વિશ્વાત્મિકા મતા ।
બ્રહ્માકારા તથા ભિન્નં પદમિચ્છતિ દુઃખદમ્ ॥ ૯૬॥

સકામા ચૈવ નિષ્કામા બ્રહ્મભૂયપરાયણા ।
બુદ્ધિર્ભવતિ સા ભ્રાન્ત્યા ભ્રાન્તિધારકતાં ગતા ॥ ૯૭॥

નાનાભ્રાન્તિયુતં સર્વં ચકાર સિદ્ધિમઞ્જસા ।
નાનામોહયુતં તદ્વદ્ બુદ્ધિશ્ચકાર ખેલયા ॥ ૯૮॥

તાભ્યાં સમ્મોહિતં સર્વં લક્ષલાભયુતં ભવેત્ ।
નાનાલક્ષસમાયુક્તં નાનાલાભફલૈર્યુતમ્ ॥ ૯૯॥

અતો માયાયુતઃ સોઽપિ ગણેશો બ્રહ્મનાયકઃ ।
બિમ્બે ખેલતિ બિમ્બીવ જાનીહિ નૃપસત્તમ ॥ ૧૦૦॥

એતન્ માયાસ્વરૂપં તે કથિતં મોહકારકમ્ ।
યજ્જ્ઞાત્વા યોગિવન્દ્યશ્ચ જાયતે માનવઃ ક્ષણાત્ ॥ ૧૦૧॥

જનક ઉવાચ ।
ભક્તિપ્રિયો ગણેશશ્ચેત્ કથં મોહયુતાન્ જનાન્ ।
સ્વભક્તાન્ન સ યોગીન્દ્રાઃ કરોતિ વદત પ્રિયાઃ ॥ ૧૦૨॥

ન પરાધીનતા તસ્ય સ્વપ્રિયં ગણનાયકઃ ।
પરાધીનસમાનં ન ન કરોતિ મહાદ્ભુતમ્ ॥ ૧૦૩॥

પિપ્પલાયન ઉવાચ ।
ગણેશેન મહારાજ ક્રીડાર્થં રચિતં જગત્ ।
માયામયં વિશેષેણ નાનાખેલયુતં તથા ॥ ૧૦૪॥

તત્રાદૌ દ્વિવિધં તેન તદર્થં રચિતં પુરા ।
તચ્છૃણુષ્વ વિધાનેન સર્વસંશયહારકમ્ ॥ ૧૦૫॥

સ્વસ્વસ્વાર્થયુતં પૂર્ણં માયાસુખકરં મતમ્ ।
તદર્થં સર્વલોકાશ્ચ બ્રહ્માણિ સમ્ભ્રમન્તિ વૈ ॥ ૧૦૬॥

યોગમાર્ગસ્તથા રાજન્ ગાણેશઃ શાન્તિદઃ પરઃ ।
રચિતો મોહનાશાર્થં માયાનાશકરો મતઃ ॥ ૧૦૭॥

યોગેન ગણપં જ્ઞાત્વા નરઃ પૂર્ણં તતો નૃપ ।
ભજતેઽનન્યભાવેન તન્નિષ્ઠસ્તત્પરાયણઃ ॥ ૧૦૮॥

યસ્ય ભાવો ભવેદ્યત્ર યાદૃશસ્તાદૃશં ચરેત્ ।

તત્ર વિઘ્નેશ્વરઃ સાક્ષાદાગ્રહં ન કરોતિ ચ ॥ ૧૦૯॥

યદા ગણેશ્વરો વિશ્વં ભક્તિયુક્તં નિરન્તરમ્ ।
કરોતિ ચેદ્ગણેશસ્ય તદા ખેલઃ કુતો ભવેત્ ॥ ૧૧૦॥

ન પરાધીનતા તસ્ય ક્રીડાર્થં ગણનાયકઃ ।
વિશ્વં તુ દ્વિવિધં કૃત્વા પરાં પશ્યતિ ભાવનામ્ ॥ ૧૧૧॥

એતત્તે કથિતં રાજન્ શ્રોતુમિચ્છસિ કિં પરમ્ ।
સ્વાધીનં તુ પરાધીનં માયયા દૃશ્યતે સદા ॥ ૧૧૨॥

જનક ઉવાચ ।
કિં કર્મ કિમકર્માપિ વિકર્માપિ કથં ભવેત્ ।
કર્મયોગશ્ચ વિપ્રેન્દ્રાઃ કીદૃશો વદત પ્રિયાઃ ॥ ૧૧૩॥

આવિર્હોત્ર ઉવાચ ।
સ્વસ્વધર્મયુતં કર્મ વિધિયુક્તં મહામતે ।
(Page ખં. ૫ અ. ૩૦ પાન ૭૧)
દેહસૌખ્યપ્રદં પ્રોક્તં જન્મમૃત્યુપ્રદં ભવેત્ ॥ ૧૧૪॥

સ્વસ્વધર્મવિહીનં યદ્વિધિહીનં વિશેષતઃ ।
વિકર્મ વિદ્ધિ રાજેન્દ્ર તદેવં પાપરૂપકમ્ ॥ ૧૧૫॥

પાપાચરણમાત્રેણ નરો દુર્ગતિમાપ્નુયાત્ ।
દેહદુઃખકરં પ્રોક્તં પરિણામે ન સંશયઃ ॥ ૧૧૬॥

સત્કર્મ મુક્તિકામાર્થં કુરુતે નિત્યમાદરાત્ ।
બ્રહ્માર્પણસ્વભાવેનાકર્મ વિદ્ધિ મહામતે ॥ ૧૧૭॥

શુક્લગત્યા નરો વેદે મુક્તિં પ્રાપ્નોતિ શાશ્વતીમ્ ।
અકર્મણઃ પ્રભાવેણ સ નિષ્કામપરો મતઃ ॥ ૧૧૮॥

કર્મયોગમયં વિશ્વં સર્વં જાનીહિ પાર્થિવ ।
ક્રિયાયાં યત્ સ્થિતં બ્રહ્મ સ એવ કર્મયોગકઃ ॥ ૧૧૯॥

ક્રિયમાણં ચ યત્પ્રોક્તં તદેવ કર્મ ઉચ્યતે ।
તસ્ય ભેદાન્ પ્રવક્ષ્યામિ સમાહિતમનાઃ શૃણુ ॥ ૧૨૦॥

મૌનં યદિ ધૃતં તેન તદા જાતં નૃપાત્મજ ।
અતઃ કર્મમયં વિદ્ધિ ધારણાન્નાત્ર સંશયઃ ॥ ૧૨૧॥

વાયુબન્ધનયોગેન પ્રાણો નીતઃ સ્વમસ્તકે ।
તદેવ કર્મરૂપં વૈ વાયુચાલનતઃ પરમ્ ॥ ૧૨૨॥

ધ્યાનં કરોતિ ચેચ્ચિત્તે દમયિત્વા મનઃ સ્વયમ્ ।
તદેવં કર્મરૂપં તુ મનોનિગ્રહકારણાત્ ॥ ૧૨૩॥

જાગૃતિર્જાગરં કર્મ સ્વપ્નઃ સુપ્તિમયં ભવેત્ ।
અજ્ઞાનં વિદ્ધિ સૌષુપ્તં કર્મરૂપં ન સંશયઃ ॥ ૧૨૪॥

ઇત્યાદ્યા બહવો ભેદા મયા વક્તું ન શક્યતે ।
નામરૂપધરઃ કોઽપિ કર્મહીનો ન વર્તતે ॥ ૧૨૫॥

ઉત્પત્તિશ્ચ સ્થિતી રાજન્ સંહારસ્ત્રિવિધં પરમ્ ।
સર્વં કર્મમયં વિદ્ધિ કર્મયોગેન જાયતે ॥ ૧૨૬॥

અસદ્બ્રહ્મ ચ યત્ પ્રોક્તં વેદે તન્માયયા બભૌ ।
કર્મરૂપં ન સન્દેહો નામરૂપપ્રધારણાત્ ॥ ૧૨૭॥

નામરૂપપરિત્યાગે હ્યસત્ સ્વાનન્દગં ભવેત્ ।
માનવો બ્રહ્મરૂપઃ સ કર્મયોગી પ્રકથ્યતે ॥ ૧૨૮॥

એતત્ કર્મસ્વરૂપં તે કથિતં બ્રહ્મવાચકમ્ ।
કર્માધીનં જગત્ સર્વં બ્રહ્મ નાનાવિધં તથા ॥ ૧૨૯॥

જનક ઉવાચ ।
જ્ઞાનં ચ કીદૃશં પ્રોક્તં તન્મે વદત યોગિનઃ ।
યેન યોગી ભવેજ્જન્તુર્જ્ઞાનયોગપરાયણઃ ॥ ૧૩૦॥

દ્રુમિલ ઉવાચ ।
હૃદિ સ્ફૂર્તિમયં જ્ઞાનં જ્ઞાતવ્યં વિબુધૈઃ સદા ।
સ્ફૂર્તિદાતૃસ્વરૂપેણ બ્રહ્મ તત્ર સ્થિતં ભવેત્ ॥ ૧૩૧॥

નામરૂપવિહીનં યત્ સદાઽમૃતમયં ભવેત્ ।
આદ્યન્તભાવહીનં વૈ તદ્વિદ્ધિ જ્ઞાનમુત્તમમ્ ॥ ૧૩૨॥

જ્ઞાનચક્ષુઃ સ્વભાવેન બ્રહ્માનુભવકારકમ્ ।
નાનાજ્ઞાનલયં કૃત્વા જ્ઞાનયોગી ભવેત્તતઃ ॥ ૧૩૩॥

સત્યસ્વાનન્દરૂપં ત્વં જાનીહિ જ્ઞાનમૂલકમ્ ।
જ્ઞાનાનાં યોગભાવેન લભ્યતે યોગસેવયા ॥ ૧૩૪॥

જનક ઉવાચ ।
આનન્દઃ કીદૃશઃ પ્રોક્તઃ સહજં કીદૃશં મતમ્ ।
બ્રહ્મભૂયં ચ યોગીન્દ્રાઃ કીદૃશં કથયન્તુ મે ॥ ૧૩૫॥

ચમસ ઉવાચ ।
બાહ્યાન્તરવિભેદેનાનન્દઃ સર્વત્ર વર્તતે ।
ઉભયાત્મકભાવસ્થઃ સમરૂપધરો મતઃ ॥ ૧૩૬॥

નાનાદ્વન્દ્વેષુ રાજેન્દ્ર સ્થિતમાનન્દરૂપકમ્ ।
સમં વિદ્ધિ ચ સર્વત્ર જગત્સુ બ્રહ્મસુ પરમ્ ॥ ૧૩૭॥

સત્યાસત્યમયં તદ્ધિ સમસ્વાનન્દગં પરમ્ ।
બ્રહ્મ રાજન્ સદાનન્દરૂપં તદેવ સમ્મતમ્ ॥ ૧૩૮॥

દ્વન્દ્વેષુ ત્વાસમન્તાદ્યન્નન્દનાત્તન્ મહીપતે ।
આનન્દઃ પરમાનન્દો બ્રહ્માનન્દઃ પ્રકથ્યતે ॥ ૧૩૯॥

સમભાવસ્થિતાનાં ચ યોગેન બ્રહ્મ લભ્યતે ।
(Page  ખં. ૫ અ. ૩૦ પાન ૭૨)
આનન્દાખ્યં પ્રજાનાથ યોગસાધનતઃ પરમ્ ॥ ૧૪૦॥

એતત્તે કથિતં પૂર્ણમાનન્દસ્ય સ્વરૂપકમ્ ।
આનન્દાનાં સમાયોગે સમસ્વાનન્દગો ભવેત્ ॥ ૧૪૧॥

દ્વિવિધા તસ્ય માયા તુ દ્વન્દ્વભાવધરા મતા ।
તયોઃ સંયોગભાવે સ ઉભયાત્મક ઉચ્યતે ॥ ૧૪૨॥

તદેવ દ્વિવિધેષ્વેવ મોહયુક્તં નરાધિપ ।
સમં સર્વત્ર જાનીહિ દ્વન્દ્વમોહાદિદાયકમ્ ॥ ૧૪૩॥

ત્રિષુ મોહવિહીનં યત્ સદા નેતિ સ્વરૂપકમ્ ।
સ્વાધીનં સહજં વિદ્ધિ ચતુર્થં રાજસત્તમ ॥ ૧૪૪॥

સ્વેચ્છયા સત્ સમાયુક્તં સ્વેચ્છયા સત્ પરાયણમ્ ।
સ્વેચ્છયાઽઽનન્દસંયુક્તં ત્રિભિર્હીનં નિજેચ્છયા ॥ ૧૪૫॥

આજ્ઞયા ત્રિવિધં બ્રહ્મ વર્તતે નાત્ર સંશયઃ ।
સર્વેષાં નાશકં તુર્યં સહજં નેતિ ભાવતઃ ॥ ૧૪૬॥

ન તસ્ય નેતિ કર્તા વૈ વિદ્યતે યોગભાવતઃ ।

તેન નેતિમયં સ્વચ્છન્દગં પ્રોક્તં સનાતનમ્ ॥ ૧૪૭॥

સ્વેચ્છયા બન્ધયુક્તશ્ચ સ્વેચ્છયા બન્ધવર્જિતઃ ।
સ્વેચ્છયા સમભાવસ્થો ભવતે સહજાખ્યકઃ ॥ ૧૪૮॥

અવ્યક્તેન ત્રિભાવેષુ તેન યોગેન લભ્યતે ।
સહજં બ્રહ્મ વેદેષુ યત્ પ્રોક્તં વેદવાદિભિઃ ॥ ૧૪૯॥

સ્વાધીનાનાં સમાયોગે વ્યક્તઃ સ્વાનન્દ ઉચ્યતે ।
અવ્યક્તયોગભાવત્વાન્નિરાકર્તું ન શક્યતે ॥ ૧૫૦॥

એતત્તે કથિતં ભૂપ સહજં મોહવર્જિતમ્ ।
અધુના શ‍ૃણુ યોગં ત્વં બ્રહ્મભૂયપ્રકાશકમ્ ॥ ૧૫૧॥

સ્વાનન્દઃ સર્વસંયોગે ભવતિ બ્રહ્મધારકઃ ।
ચતુર્ણાં તત્ર સંયોગઃ કર્તવ્યઃ સ્વસમાધિના ॥ ૧૫૨॥

ત્રિવિધં મોહયુક્તં ચ મોહહીનં ચતુર્થકમ્ ।
નૈવ બ્રહ્મણિ રાજેન્દ્ર મોહયુક્તવિહીન તે ॥ ૧૫૩॥

સ્વાધીનં ન ભવેત્તત્તુ પરાધીનં ન વર્તતે ।
બ્રહ્મણાં જગતાં તત્ર સંયોગો જાયતે પરઃ ॥ ૧૫૪॥

સ્વસંવેદ્યમયો ભૂત્વા યસ્તુ તિષ્ઠતિ માનવઃ ।
તત્ર કિં ભિન્નભાવાખ્યં વર્તતે યોગનાશકમ્ ॥ ૧૫૫॥

સંયોગે નાશભૂતે તુ બ્રહ્માયોગઃ પ્રકીર્તિતઃ ।
ન તત્ર જગતાં ભૂપ સંયોગો બ્રહ્મણાં ભવેત્ ॥ ૧૫૬॥

અયોગસ્ય ન સંયોગઃ કેષુ બ્રહ્મસુ કીર્તિતઃ ।
યોગિભિર્યોગપ્રાપ્ત્યર્થં વ્યતિરેકાદ્વિચારય ॥ ૧૫૭॥

સંયોગે માયયા યુક્તો ભવતે ગણનાયકઃ ।
માયાધીનસ્વરૂપેણ સદાઽયોગઃ પ્રવર્તતે ॥ ૧૫૮॥

માયયા સર્વભાવસ્થો ભવતિ દ્વિરદાનનઃ ।
સંયોગાભેદભાવેન નિજમાયામયઃ સ્મૃતઃ ॥ ૧૫૯॥

સ્વાનન્દે ગણનાથસ્ય દર્શનં યોગિનાં ભવેત્ ।
સંયોગાભેદકં તેન વિદુઃ સ્વાનન્દવાસિનમ્ ॥ ૧૬૦॥

અયોગે માયયાહીનો ગણેશઃ સર્વદા મતઃ ।
યાદૃશસ્તાદૃશઃ સોઽપિ નાગતો ન ગતો ભવેત્ ॥ ૧૬૧॥

વૃથા ભ્રાન્તિમયં સર્વં ભાસતે માયયા કિલ ।
ભ્રાન્તાનાં તેન સર્વત્ર નિવૃત્તિર્જાયતે પરા ॥ ૧૬૨॥

સ્વકીયા ભેદભાવાચ્ચ નિવૃત્તિં વ્યતિરેકતઃ ।
ધૃત્વા હ્યયોગયોગસ્થઃ સ્વયં ભવતિ માનવઃ ॥ ૧૬૩॥

અયોગે માયયા હીનઃ સંયોગે માયયા યુતઃ ।
નરો ભવતિ રાજેન્દ્ર પઞ્ચપઞ્ચસ્વરૂપયા ॥ ૧૬૪॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ય સંયોગઃ કુત્ર વર્તતે ।
(Page  ખં. ૫ અ. ૩૦ પાન ૭૩)
અયોગશ્ચ મહીપાલ નાન્વયવ્યતિરેકતઃ ॥ ૧૬૫॥

ચિત્તં પઞ્ચવિધં ત્યક્ત્વા ચિત્તભ્રાન્તિં ચ પઞ્ચધા ।
સ્વયં ચિન્તામણિઃ સાક્ષાદ્ બ્રહ્મભૂતો નરો ભવેત્ ॥ ૧૬૬॥

સંયોગાત્મા ગકારશ્ચ ણકારોઽયોગવાચકઃ ।
તયોઃ સ્વામી ગણાધીશઃ સંયોગાયોગવર્જિતઃ ॥ ૧૬૭॥

ઇતિ તે કથિતં ભૂપ બ્રહ્મભૂતસ્વરૂપકમ્ ।
કિં શ્રોતુમિચ્છસિ પ્રાજ્ઞ ગમિષ્યામો યદૃચ્છયા ॥ ૧૬૮॥

જનક ઉવાચ ।
ગણેશો ભક્તિભાવેન નરાધીનો ભવેત્ સ્વયમ્ ।
ન ભક્તિસમભાવાખ્યં મોહદં તસ્ય સમ્ભવેત્ ॥ ૧૬૯॥

અતો વદત મે ભક્તિસ્વરૂપં યોગિસત્તમાઃ ।
તયા વિઘ્નેશ્વરં નિત્યં ભજિષ્યામિ વિશેષતઃ ॥ ૧૭૦॥

કરભાજન ઉવાચ ।
ભક્તિશ્ચ નવધા પ્રોક્તા હૃદયે રસધારિણી ।
કથયામિ સમાસેન સ્વરૂપં રસદાયકમ્ ॥ ૧૭૧॥

શ્રવણં કીર્તનં તસ્ય સ્મરણં પાદસેવનમ્ ।
અર્ચનં વન્દનં દાસ્યં સખ્યમાત્મનિવેદનમ્ ॥ ૧૭૨॥

નવધા માનસી રાજન્ ગતિઃ સર્વત્ર વર્તતે ।

ભાવેષુ રસસંયુક્તા દશમી નૈવ વિદ્યતે ॥ ૧૭૩॥

યદા ભક્તૌ નરસ્યૈવ રસઃ પૂર્ણઃ પ્રવર્તતે ।
તદાઽસ્ય નવધા નિત્યં ચિત્તં તસ્યાં વસેત્ સ્વયમ્ ॥ ૧૭૪॥

યદા મુક્તૌ તથા જન્તો રસઃ પૂર્ણો જનાધિપ ।
તદા મુક્તિપદાર્થેષુ ચિત્તં તુ નવધા ભવેત્ ॥ ૧૭૫॥

યદા ચ બ્રહ્મભૂતેષુ રસસ્તસ્ય પ્રવર્તતે ।
તદા નરસ્ય યોગેષુ ચિત્તં તન્નવધા ભવેત્ ॥ ૧૭૬॥

યોગી ભૂત્વા નરો યસ્તુ ભજતે ગણનાયકમ્ ।
તસ્યૈવ નવધા ચિત્તં ગણેશે સર્વદા ભવેત્ ॥ ૧૭૭॥

યોગિનાં હૃદિ વિઘ્નેશઃ પૂર્ણરૂપધરો વસેત્ ।
અયોગિનાં કલાંશશ્ચ તસ્માદ્યોગી ભવેન્નરઃ ॥ ૧૭૮॥

તતો ગણેશરૂપસ્ય ભજનં પૂર્ણભાવતઃ ।
ભવત્યત્ર ન સન્દેહો રસયુક્તં વિશેષતઃ ॥ ૧૭૯॥

ગણેશગુણવાદાનાં પ્રીત્યા સમ્પૂર્ણભાવતઃ ।
પ્રકુર્યાત્ સ નરો નિત્યં શ્રવણં રસસંયુતઃ ॥ ૧૮૦॥

સર્વશ્રવણજાતીનાં રસં જ્વાલ્ય મહામતિઃ ।
ગણેશગુણવાદેષુ રસં પૂર્ણં સ પશ્યતિ ॥ ૧૮૧॥

એવં શ્રવણભક્તિં ત્વં પ્રાપ્તાં જાનીહિ ભૂમિપ ।
સમતો યોગિષુ શ્રેષ્ઠો બુધૈર્નૃપ ન સંશયઃ ॥ ૧૮૨॥

તથા કીર્તનભાવશ્ચ ઉત્પદ્યેત નરાધિપ ।
ગાણેશકીર્તને ભક્તિઃ પ્રાપ્તા તેન વિનિશ્ચિતમ્ ॥ ૧૮૩॥

ગણેશાર્થં ચ યા કિઞ્ચિદ્વિસ્મૃતિસ્તત્ર નો ભવેત્ ।
તદા સ્મરણભક્તિઃ સા પ્રાપ્તા સમ્પૂર્ણભાવતઃ ॥ ૧૮૪॥

ગણેશપાદપદ્મં યો મત્વા શાશ્વતકં પરમ્ ।
તત્રૈવ સકલો યત્નો ભવેત્તત્ પાદસેવનમ્ ॥ ૧૮૫॥

(Page ખં. ૫ અ. ૩૦ પાન ૭૪)
સાઙ્ગં ગાણેશ્વરં સર્વં કુરુતે નિત્યમાદરાત્ ।
અર્ચનાત્મકરૂપાં તાં ભક્તિં પ્રાપ્તો મહામતિઃ ॥ ૧૮૬॥

ગણેશાન્ન પરં શ્રેષ્ઠં વેદશાસ્ત્રવિચારતઃ ।
ન ચલેત્ ક્વાપિ જાનીહિ તદા વન્દનવાન્ ભવેત્ ॥ ૧૮૭॥

ગાણપત્યાનિ ચિહ્નાનિ ધૃત્વા તત્પરચેતસા ।
તદા દાસ્યાત્મિકા ભક્તિઃ પ્રાપ્તા તેન નરાધિપ ॥ ૧૮૮॥

અન્તર્બાહ્યકૃતં યદ્વૈ તત્ર સાક્ષી ગણેશ્વરઃ ।
અન્તર્ભયેન ભક્તિર્યા સા પ્રોક્તા સખ્યરૂપિણી ॥ ૧૮૯॥

પઞ્ચધા મોહયુક્તં સ ચિત્તમુત્સૃજ્ય યોગતઃ ।
ન ભિન્નોઽહં ગણેશાનાન્ મત આત્મનિવેદકઃ ॥ ૧૯૦॥

મનોગતિઃ પ્રાજ્ઞ યત્ર તત્ર વિઘ્નેશ્વરં સદા ।
ભજતે રસસંયુક્તઃ સ વૈ ભક્તઃ પ્રકીર્તિતઃ ॥ ૧૯૧॥

રસરૂપા સ્વયં ભક્તિર્યત્ર પૂર્ણસ્વભાવતઃ ।
યસ્ય તિષ્ઠતિ જન્તુઃ સ તદ્ભક્તઃ સમ્મતો નૃપ ॥ ૧૯૨॥

ભોગેષુ ન રસોત્પત્તિર્મુક્તૌ ચ બ્રહ્મભૂયકે ।
ગણેશભક્તિભાવેન ભક્તસ્યૈવાવતિષ્ઠતિ ॥ ૧૯૩॥

આદૌ તે કથિતં રાજન્ ગણેશસ્ય સ્વરૂપકમ્ ।
બ્રહ્માકારૈર્મહાચિહ્નૈઃ સંયુક્તં યોગદાયકમ્ ॥ ૧૯૪॥

તત્ર વિશ્વાસભાવેન તાદૃગુત્પદ્યતે રસઃ ।
તદા ભક્તો મહારાજ ભવતે યોગિવન્દ્યકઃ ॥ ૧૯૫॥

નારદેનૈવ રાજેન્દ્ર બોધિતસ્ત્વં ન બુદ્ધ્યસે ।
તવ ભાવપરીક્ષાર્થં ભક્તિદાનાર્થમઞ્જસા ॥ ૧૯૬॥

પ્રેષિતસ્તેન વિઘ્નેશો વૃદ્ધઃ કુષ્ઠયુતો દ્વિજઃ ।
સમાયાતઃ સર્વભક્ષી છલયામાસ સાધુપમ્ ॥ ૧૯૭॥

નરદેહં સમાસાદ્ય ગણેશં ભજેત ન યઃ ।
પશુતુલ્યઃ સ રાજેન્દ્ર તસ્ય ધિક્ જન્મ નિશ્ચિતમ્ ॥ ૧૯૮॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા વિદેહં તં જનકં યોગિનો નવ ।
અનુજ્ઞાપ્ય યયુસ્તસ્માત્ સ્વેચ્છયા ગણપે રતાઃ ॥ ૧૯૯॥

જનકસ્તાન્નમસ્કૃત્ય સ્વગૃહે ગણનાયકે ।
યોગી નવવિધાં ભક્તિમકરોદ્ભાવસંયુતઃ ॥ ૨૦૦॥

અહર્નિશં ગણેશાનમભજન્નાન્યચેતસા ।
જનકઃ સર્વભાવેન યોગિવન્દ્યો બભૂવ હ ॥ ૨૦૧॥

તિષ્ઠન્ સ્વપન્ પિબન્ વાઽદન્ ગચ્છન્ વિઘ્નેશ્વરે રતઃ ।
અતો ગણેશસન્તુષ્ટ્યા તદ્વંશે જનકા બભુઃ ॥ ૨૦૨॥

સર્વજ્ઞાનસમાયુક્તાઃ સર્વે સાધુગુણાન્વિતાઃ ।
ગણેશભજને સક્તા બભૂવુશ્ચ પ્રજાપતે ॥ ૨૦૩॥

નવયોગિષુ યાતેષુ જનકસ્ત્રિશિરોભવમ્ ।
વૃત્તાન્તં પરિશુશ્રાવ ગણેશગમનાત્મકમ્ ॥ ૨૦૪॥

સ્વયં તસ્ય ગૃહં ગત્વા નનામ મુનિપુઙ્ગવમ્ ।
દૈવીસમૃદ્ધિસંયુક્તં યોગપારઙ્ગતં પરમ્ ॥ ૨૦૫॥

તેન સમ્બોધિતો રાજા નિત્યં દૂર્વાપરાયણઃ ।
પુપૂજ ગણનાથં તં સદા ભક્તિસમન્વિતઃ ॥ ૨૦૬॥

દૂર્વાહીનાં ન પૂજાં સ ચકાર મરણાવધિ ।
અન્તે સ્વાનન્દગો ભૂત્વા ભજતે ગણનાયકમ્ ॥ ૨૦૭॥

ઇદં જનકમાહાત્મ્યં કથિતં તે પ્રજાપતે ।
ભુક્તિમુક્તિપ્રદં નૃભ્યઃ શ્રવણાત્ પઠનાદ્ભવેત્ ॥ ૨૦૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે દૂર્વામાહાત્મ્યવર્ણનં નામ ત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૦
(Page ખં. ૫ અ. ૩૧ પાન ૭૫)

## ૫.૩૧ તુલસીવર્જનકારણં નામૈકત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
તુલસીવર્જિતા પૂજા કર્તવ્યા કથિતં ત્વયા ।
કિમર્થં પાવની સા તુ દોષયુક્તા બભૂવ હ ॥ ૧॥

તુલસ્યા કિં કૃતં વિપ્ર ગણેશાનસ્ય વિપ્રિયમ્ ।

યેન રુષ્ટોઽમરેશાનસ્તાં તત્યાજ યશસ્વિનીમ્ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
ધર્મધ્વજો મહીપાલો બભૂવે ધર્મસંયુતઃ ।
દાતા માન્યો વિશેષેણ સુજ્ઞૈઃ સર્વગુણાન્વિતઃ ॥ ૩॥

તસ્ય પુત્રી બભૂવાઽસૌ રૂપલાવણ્યસંયુતા ।
ન તયા સદૃશી કુત્ર વર્તતે કામિની વિધે ॥ ૪॥

વૃન્દા નામ્ની ચ વિખ્યાતા પ્રણમ્ય પિતરં કદા ।
જગાદ ભાવગમ્ભીરા ચતુરા સુવયોયુતા ॥ ૫॥

વૃન્દોવાચ ।
તાત વિષ્ણું પરિત્યજ્ય વૃણોમ્યન્યં ન નિશ્ચિતમ્ ।
વરં તદર્થમેવં માં દેહિ તસ્મૈ મહામતે ॥ ૬॥

ધર્મધ્વજ ઉવાચ ।
વિષ્ણુર્દેવવરઃ સાક્ષાદ્ ભગવાન્ વિશ્વભાવનઃ ।
સ કથં ચ ત્વયા લભ્યો વરો લક્ષ્મીપતિઃ સુતે ॥ ૭॥

માનુષેષુ વરં પુત્રિ વરયસ્વ હૃદિ સ્થિતમ્ ।
નરા વયં સ વૈ સાક્ષાદ્ ભગવાન્ ભગધારકઃ ॥ ૮॥

એવં નાનાવિધૈર્ભાવૈર્બોધિતા ન બુબોધ સા ।
તદર્થં મન્ત્રરાજં સઙ્ગૃહ્ય વિષ્ણોર્વનં યયૌ ॥ ૯॥

ધ્યાત્વા ચતુર્ભુજં વિષ્ણું નિરાહારપરાયણા ।
તતાપ તપ ઉગ્રં સા પતિં વિષ્ણુમભીપ્સિતમ્ ॥ ૧૦॥

તીર્થેષુ માધવં દૃષ્ટ્વા તેષુ ક્ષેત્રેષુ માનદ ।
તપસ્તતાપ વૃન્દોગ્રં નાનામાર્ગપરાયણા ॥ ૧૧॥

શુષ્કપત્રાણિ વાયું સા જલં મૂલં ફલં તથા ।
ભુક્ત્વા સન્તોષયામાસ વિષ્ણું દેવવરં વિધે ॥ ૧૨॥

વર્ષાણિ લક્ષસઙ્ખ્યાનિ ગતાનિ તપસો બલાત્ ।
રાજપુત્ર્યાશ્ચ વૃન્દાયા ન તુતોષ જનાર્દનઃ ॥ ૧૩॥

અતીવ તપસા તસ્યા અન્તર્જ્ઞાનં બભૂવ હ ।
આત્માકારં જગત્ સર્વમપશ્યદ્ બોધસંયુતા ॥ ૧૪॥

કદા વિઘ્નેશ્વરં વૃન્દા દદર્શ નિયમે રતમ્ ।
સમ્પૂજ્ય ગણનાથં વૈ હૃદિ ધ્યાનપરાયણમ્ ॥ ૧૫॥

તં દૃષ્ટ્વા કુઞ્જરાસ્યં સા શિવપુત્રં નૃપાત્મજા ।
ભાગીરથીસન્નિધિસ્થં વિસ્મિતાઽભૂત્ પ્રજાપતે ॥ ૧૬॥

ગણેશાર્થં સમાલોક્ય મોહિતાઽભૂત્ સ્વચેતસિ ।
અહો ગણેશ્વરઃ સાક્ષાદ્ બ્રહ્મણાં નાયકઃ સ્મૃતઃ ॥ ૧૭॥

અસ્ય કલાંશસમ્ભૂતાઃ શિવવિષ્ણ્વાદયોઽપરે ।
પૂર્ણભાવાત્મકઃ સાક્ષાદ્ ગણેશો નાત્ર સંશયઃ ॥ ૧૮॥

શિવેન તપસોગ્રેણારાધિતો ગણનાયકઃ ।
પુત્રોઽભૂદ્યોગશાન્તિસ્થો ભક્તભક્તિપદપ્રદઃ ॥ ૧૯॥

ખેલત્યાત્માનમાભજ્ય ચતુર્ધાઽનન્યભાવતઃ ।
અયં વિષ્ણુસ્તથા શમ્ભુઃ શક્તિઃ સૂર્યો ન સંશયઃ ॥ ૨૦॥

પૂર્ણભાવમવિજ્ઞાયાઽહં વિષ્ણુપરમાઽભવમ્ ।
અધુના તં સમાલોક્ય બોધયુક્તા ન સંશયઃ ॥ ૨૧॥

તપઃપ્રભાવસામર્થ્યાદ્ વૃણોમિ ગણનાયકમ્ ।
વ્યભિચારો ન મે ભાવી વિષ્ણુરૂપોઽયમઞ્જસા ॥ ૨૨॥

એવં વિચાર્ય વિઘ્નેશમાયયૌ ધ્યાનસંસ્થિતમ્ ।
ધ્યાનભઙ્ગાર્થમુદ્યુક્તા વૃન્દા તં પ્રત્યુવાચ હ ॥ ૨૩॥

વૃન્દોવાચ ।
ત્વં સાક્ષાદ્ ગણરાજશ્ચ તપસાઽઽરાધિતો ભવાન્ ।
શિવપુત્રત્વમાપન્નઃ કિં ધ્યાયસિ વદસ્વ મામ્ ॥ ૨૪॥

શિવવિષ્ણ્વાદયો દેવાસ્ત્વાં ભજન્તિ નિરન્તરમ્ ।
(Page ખં. ૫ અ. ૩૧ પાન ૭૬)
કુલદૈવતરૂપસ્થં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૫॥

ગણેશ્વરં સમાસ્થાપ્ય કથં પૂજયસેઽપ્યહો ।
ગણેશ્વરો વિશેષેણ સ્વયં ધ્યાયસિ તં પ્રભો ॥ ૨૬॥

અહો ચિત્રં મયા દૃષ્ટં ગણેશો ગણનાયકમ્ ।
ભજતેઽનન્યભાવસ્થઃ શિવપુત્રત્વકારણાત્ ॥ ૨૭॥

ન ત્વં શિવસુતઃ સ્વામિન્ ન તે વિઘ્નેશ્વરઃ કદા ।
કુલદેવસ્તથાઽપિ ધ્યાયસિ કિં ગણપં પ્રભો ॥ ૨૮॥

તવ સ્મરણમાત્રેણ બ્રહ્મભૂતા ભવન્તિ તે ।
નરા દેવેન્દ્રમુખ્યાશ્ચ યોગિનો વેદકાદયઃ ॥ ૨૯॥

સ્વયં શાન્તિપ્રદાતા ત્વં કિં ધ્યાયસિ ગણેશ્વરમ્ ।
ગણેશ્વરાશુ વદ માં વાક્યં સગુણનિર્ગુણ ॥ ૩૦॥

કામબાણાર્દિતા સા તં વૃન્દા નાનાપ્રકારતઃ ।
બોધયામાસ વિઘ્નેશો ધ્યાનસ્થો ન બુબોધ તામ્ ॥ ૩૧॥

તતઃ સા જલબિન્દું વૈ ચિક્ષેપ ગણપોપરિ ।
તથાપિ ધ્યાનસંસ્થો નાલોકયત્તાં ગજાનનઃ ॥ ૩૨॥

જઘાન મોહસંયુક્તાંઽગુલ્યા તં સા તતોઽસકૃત્ ।
ધ્યાનં ત્યક્ત્વા ગણાધીશસ્તામપશ્યત્ પુરઃ સ્થિતામ્ ॥ ૩૩॥

ગણેશાય નમ ઇતિ મન્ત્રમુચ્ચાર્ય વિઘ્નપઃ ।
જગાદ તાં સકામાં સ નિષ્કામો ગણપે રતઃ ॥ ૩૪॥

શ્રીમહાગણપતિરુવાચ ।
કાઽસિ ત્વં વદ માતર્માં ચાપલ્યગુણસંયુતે ।
ધ્યાનભઙ્ગો ન કર્તવ્યઃ સાધુભિશ્ચ કદાચન ॥ ૩૫॥

ગણેશકર્મસંસ્થં તં નરં યશ્ચ નરાધમઃ ।
પૃચ્છતે બોધયતિ વા સ વૈ નરકગો ભવેત્ ॥ ૩૬॥

ધ્યાનભઙ્ગસ્ય દોષસ્તે માઽસ્તુ બાલે સુલક્ષણે ।
મા કુરુષ્વ પુનસ્ત્વં ચ કર્મ ચાપલ્યસંયુતા ॥ ૩૭॥

કિમર્થમાગતા બાલે વદ માં કામમોહિતે ।
નિષ્કામં ગણપે સંસ્થં ગચ્છ વા યત્ર તે રુચિઃ ॥ ૩૮॥

વૃન્દોવાચ ।
ધર્મધ્વજસ્ય પુત્રીં માં વિદ્ધિ નાનાતપોયુતામ્ ।
વરો મમ ભવ સ્વામિન્ ભર્તા ત્વં સર્વનાયક ॥ ૩૯॥

સર્વાસાં ત્વં વિશેષેણ ભર્તાઽસ્યત્ર ન સંશયઃ ।
તથાપિ માં ભજસ્વ ત્વં ભજમાનાં ગજાનન ॥ ૪૦॥

તસ્યાસ્તદ્વચનં શ્રુત્વા પ્રહસ્ય ગણનાયકઃ ।
ઉવાચ કામબાણૈસ્તામર્દિતાં શાન્તિધારકઃ ॥ ૪૧॥

શ્રીમહાગણપતિરુવાચ ।
નાહં વૃણોમિ ધર્મજ્ઞે સ્ત્રિયં મોહયુતાં કદા ।
તપસા ત્વં વરં તુલ્યં સુતુષ્ટં વરયસ્વ ચ ॥ ૪૨॥

સકામં પુરુષં પશ્ય સકામા ત્વં નૃપાત્મજે ।
અહં ગણેશ્વરસ્યૈવ દાસો દેવં ભજામિ તમ્ ॥ ૪૩॥

વૃણોમિ નૈવ નિષ્કામઃ સકામાં દેવિ નિશ્ચિતમ્ ।
શાન્તિસ્થા મે ભવેત્ પત્ની ગચ્છાતો યત્ર તે સમઃ ॥ ૪૪॥

તસ્ય તદ્વચનં શ્રુત્વા પુનઃ સા તમુવાચ હ ।
અહં શાન્તિસમાયુક્તા માં ભજસ્વ દયાનિધે ॥ ૪૫॥

તિરસ્કૃતા ગણેશેન નિર્લજ્જે ગચ્છ પુંશ્ચલિ ।
તથાઽપિ તં હઠાદ્દેવી ચાલિલિઙ્ગ સુવિહ્વલા ॥ ૪૬॥

અઙ્કુશં ગણનાથસ્યાકૃષ્ય તં કામમોહિતા ।
નગ્નં કર્તું સમુદ્યુક્તા ક્રુદ્ધસ્તાં સ શશાપ હ ॥ ૪૭॥

દૈત્યગ્રસ્તા સુદુર્બુદ્ધે ભવિષ્યસિ ન સંશયઃ ।
અસુરીવ સ્પૃશસિ ચ માં દુષ્ટે હઠસંયુતા ॥ ૪૮॥

મૂઢેવ માં સમાકૃષ્ય નગ્નં કર્તું સમુદ્યતા ।
અતો વૃક્ષસ્વરૂપા ત્વં મૂઢયોનૌ પતિષ્યસિ ॥ ૪૯॥

(Page ખં. ૫ અ. ૩૨ પાન ૭૭)
ગણેશવચનં શ્રુત્વા દારુણં ભયસંયુતા ।
ત્યક્ત્વા તં કમ્પમાનાઙ્ગી નનામ રુદતી ભૃશમ્ ॥ ૫૦॥

ઉવાચ તં ગણાધીશં માં ક્ષમસ્વ મહાગસામ્ ।
ન યોગ્યાઽહં ગણાધીશ તવ વામાઙ્ગકે કદા ॥ ૫૧॥

કમ્પન્તીં રુદતીં વીક્ષ્ય દયાયુક્તો ગજાનનઃ ।
જગાદ તાં પ્રજાનાથ પરાં જ્ઞાત્વા તપોયુતામ્ ॥ ૫૨॥

શ્રીમહાગણપતિરુવાચ ।
ગચ્છ દેવિ ન તે દુઃખં ભવિષ્યતિ કદાચન ।

અસુરેણ વને દૃષ્ટા તત્ર સક્તા ભવિષ્યસિ ॥ ૫૩॥

તત્ર ત્વાં કેશવઃ ક્વાપિ શઙ્ખચૂડસ્વરૂપધૃક્ ।
યપ્સ્યતે સ તદા દૈત્યઃ શમ્ભુહસ્તાન્ મરિષ્યતિ ॥ ૫૪॥

જ્ઞાત્વા તં દેહસન્ત્યાગં કરિષ્યસિ હુતાશને ।
પુનર્વૃક્ષસ્વરૂપસ્થા ભવિષ્યસિ ન સંશયઃ ॥ ૫૫॥

ત્વયા શપ્તો મહાવિષ્ણુઃ શિલારૂપધરો ભવેત્ ।
તેન સાર્ધં સદા દેવિ રંસ્યસે ત્વં નિરન્તરમ્ ॥ ૫૬॥

પતિસ્તે ભવિતા વિષ્ણુઃ સદા સુખપ્રદાયકઃ ।
મદીયકૃપયા દેવિ સર્વમાન્યા ભવિષ્યસિ ॥ ૫૭॥

દેવાનાં પત્રપુષ્પૈસ્ત્વં પ્રિયાઽત્યન્તં ભવિષ્યસિ ।
ત્વત્કાષ્ઠસમ્ભવાં માલાં ધરિષ્યન્તિ ગલે જનાઃ ॥ ૫૮॥

ત્વામન્યકાષ્ઠવત્ સર્વે માનયિષ્યન્તિ નિશ્ચિતમ્ ।
ત્રિલોકસ્થા જના નૈવ મા ચિન્તાં કુરુ ભામિનિ ॥ ૫૯॥

દેવાનાં ત્વં પ્રિયા ભૂયા વિષ્ણોરત્યન્તભાવતઃ ।
પત્રૈઃ પુષ્પૈશ્ચ વૃન્દે ત્વાં પૂજયિષ્યન્તિ માનવાઃ ॥ ૬૦॥

મમ વર્જ્યા સદા દેવિ ભવિષ્યસિ ન સંશયઃ ।
ગચ્છ ત્વં યત્ર ભાવસ્તે ચિન્તાં ત્યક્ત્વા વિશેષતઃ ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે તુલસીવર્જનકારણં નામૈકત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૧

## ૫.૩૨ તુલસીવરપ્રદાનં નામ દ્વાત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
યથા ગજાનનઃ પ્રાહ તથા જાતં પ્રજાપતે ।
વૃન્દા તં પ્રણિપત્યૈવ તપસે વનમાયયૌ ॥ ૧॥

ચિન્તાક્રાન્તા સ્વયં દેવી ગણેશે ભાવલાલસા ।
ગણેશં મનસિ ધ્યાત્વા તતાપ તપ ઉત્તમમ્ ॥ ૨॥

નામમન્ત્રં જજાપૈવ પૂજયામાસ સાદરમ્ ।

એવં લક્ષં ચ લક્ષાર્ધં વર્ષાણિ પ્રગતાનિ ચ ॥ ૩॥

તતસ્તાં ગણરાજસ્તુ વરદઃ સહસાઽઽયયૌ ।
પ્રણમ્ય તં પ્રપૂજ્યૈવ વૃન્દા તુષ્ટાવ હર્ષિતા ॥ ૪॥

વૃન્દોવાચ ।
નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નહરાય ચ ।
અભક્તેભ્યો વિશેષેણ વિઘ્નદાય નમો નમઃ ॥ ૫॥

પરેશાય પરાણાં તે પરાત્પરતરાય ચ ।
ભક્તેશાય સદા ભક્તિપ્રિયાય તે નમો નમઃ ॥ ૬॥

બ્રહ્મેશાય ગણાધીશ બ્રહ્મણાં બ્રહ્મરૂપિણે ।
બ્રહ્મણાં પતયે તુભ્યં ગણાધિપતયે નમઃ ॥ ૭॥

અમેયાયાપ્રતર્ક્યાય સદા સ્વાનન્દવાસિને ।
(Page ખં. ૫ અ. ૩૨ પાન ૭૮)
શિવવિષ્ણુમુખેભ્યશ્ચ પદદાત્રે નમો નમઃ ॥ ૮॥

અનાથાય ચ સર્વેષાં નાથાય પરમાત્મને ।
વક્રતુણ્ડાય સર્વેષામાદિપૂજ્યાય તે નમઃ ॥ ૯॥

વિનાયકાય વીરાય શૂર્પકર્ણાય ઢુણ્ઢયે ।
ગજાનનાય ચિન્તામણયે હેરમ્બ તે નમઃ ॥ ૧૦॥

અનન્તગુણધારાય નાનાખેલકરાય તે ।
પરેષાં તુ પરેશાય મૂષકધ્વજિને નમઃ ॥ ૧૧॥

પૂર્ણાનન્દાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
જ્યેષ્ઠેભ્યો જ્યેષ્ઠરાજાય જ્યેષ્ઠપદપ્રદાયિને ॥ ૧૨॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારં પરાત્પરમ્ ।
અતસ્ત્વાં પ્રણમામ્યેવં તેન તુષ્ટો ભવ પ્રભો ॥ ૧૩॥

ગાણેશં દેહિ મે યોગં ગાણપત્યાં ચ માં કુરુ ।
ક્ષમસ્વ મેઽપરાધં ત્વં ત્વદુલ્લઙ્ઘનભાવજમ્ ॥ ૧૪॥

અન્યત્ત્વં માં ગણાધીશ માન્યાં કુરુ ત્વદીયકે ।
પૂજને કિઞ્ચિદલ્પેન ભાવેન વરદાયક ॥ ૧૫॥

ક્વાઽહં તે સમતાં નાથ સમ્પ્રાપ્નોમિ કદાપિ ન ।

તથા તપોમદેનૈતત્ કૃતં ક્ષન્તું ત્વમર્હસિ ॥ ૧૬॥

એવં સ્તુત્વા ગણાધીશં પ્રણનામ પ્રજાપતે ।
વૃન્દા તાં પ્રત્યુવાચેદં વાક્યં વાક્યવિશારદઃ ॥ ૧૭॥

શ્રીગણેશ ઉવાચ ।
મદીયં યોગમાદ્યં ત્વં પ્રાપ્સ્યસે નાત્ર સંશયઃ ।
ગાણપત્યા મહાભાગે ભવિષ્યસિ સદા સુતે ॥ ૧૮॥

ભાદ્રશુક્લચતુર્થ્યાં યે મહોત્સવપરાયણાઃ ।
પૂજયિષ્યન્તિ માં ભક્ત્યા તત્ર ત્વાં ધારયામ્યહમ્ ॥ ૧૯॥

એકવિંશતિપત્રાણિ હ્યર્પયિષ્યન્તિ માનવાઃ ।
તત્ર તે પત્રમેકં મે માન્યં દેવિ ભવિષ્યતિ ॥ ૨૦॥

ઉલ્લઙ્ઘનસમં પાપં ન ભૂતં ન ભવિષ્યતિ ।
સ્વલ્પોલ્લઙ્ઘનમાત્રેણ ત્વં ત્યક્તા ચ મયા સદા ॥ ૨૧॥

યે મામુલ્લઙ્ઘયિષ્યન્તિ તાંસ્ત્યજામિ નિરન્તરમ્ ।
તત્રાપિ તપસા બદ્ધો વૃન્દે ત્વાં માનયામ્યહમ્ ॥ ૨૨॥

ત્વયા કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
બ્રહ્મભૂયપ્રદં પૂર્ણં પઠતે શ‍ૃણ્વતે સદા ॥ ૨૩॥

તુલસીં યે નરા મહ્યમર્પયન્તિ કદા સુતે ।
તત્પાપહરણં સ્તોત્રં ભવિષ્યતિ કૃતં ત્વયા ॥ ૨૪॥

ઉલ્લઙ્ઘનાઘહં નિત્યં ભવિષ્યતિ વિશેષતઃ ।
અનેન સ્તુવતાં નિત્યં ન સર્વં દુર્લભં ભવેત્ ॥ ૨૫॥

એવમુક્ત્વા ગણાધીશોંઽતર્ધાનમગમત્ સ્વયમ્ ।
તુલસી હર્ષસંયુક્તા બભૂવે ચ પ્રજાપતે ॥ ૨૬॥

તદાદિ સા મહાભાગા બભૂવ વિગતજ્વરા ।
ક્રમેણ તુલસી જાતા વિષ્ણુપત્ની સુપૂતિતા ॥ ૨૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે તુલસીવરપ્રદાનં નામ દ્વાત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૨

(Page ખં. ૫ અ. ૩૩ પાન ૭૯)

## ૫.૩૩ તુલસીસમર્પણવર્જનવર્ણનં નામ ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
અજ્ઞાનેન મહાયોગિન્ જ્ઞાનેન તુલસીયુતમ્ ।
પૂજનં ગણનાથસ્ય કૃતં તસ્ય ફલં વદ ॥ ૧॥

શ્રુત્વા કથામૃતં ત્વત્તો ન તૃપ્તોઽહં ભવામિ ભોઃ ।
અહો ગણેશભક્તિર્વૈ દુર્લભા નાત્ર સંશયઃ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ઇતિહાસં પુરા ભવમ્ ।
શ્રવણાત્ સંશયઃ સર્વો નાશં યાસ્યતિ તત્ત્વતઃ ॥ ૩॥

બ્રાહ્મણઃ કોઽપિ દુર્બુદ્ધિર્બભૂવે કાશ્યપે કુલે ।
સ તુ નિત્યં ગણપતિં તુલસ્યાઽપૂજયદ્ધઠાત્ ॥ ૪॥

અન્યે તત્ર દ્વિજાસ્તં વૈ વારયન્તો વિશેષતઃ ।
ન વાક્યં જગૃહે તેષાં જ્ઞાનં બૌદ્ધં ખલોઽબ્રવીત્ ॥ ૫॥

ગણેશઃ સર્વરૂપશ્ચેત્ કુતસ્તત્ર પ્રવર્તતે ।
વિધિનિષેધકાદ્યં હિ મા વદેત ક્રિયાત્મકાઃ ॥ ૬॥

તતઃ સર્વે ભયોદ્વિગ્ના બભૂવુસ્તે દ્વિજોત્તમાઃ ।
પરસ્પરં સમૂચુર્વૈ ગાણપત્યાઃ પ્રજાપતે ॥ ૭॥

અહો ગાણેશ્વરે દેહે તુલસી મસ્તકેઽથવા ।
દૃષ્ટા સદ્યશ્ચ નિષ્કાસ્યા ગાણપત્યૈર્વિશેષતઃ ॥ ૮॥

અન્યૈરપિ ન સન્દેહો નો ચેન્નરકગામિનઃ ।
ઉપાનદાદિસંયુક્તૈરશુચિભિસ્તદપ્યહો ॥ ૯॥

તત્ર વિલમ્બભાવેન પાપભાગી નરો ભવેત્ ।
કિં કર્તવ્યં દ્વિજૈરન્યૈર્દુષ્ટોઽયં કથ્યતાં દ્વિજાઃ ॥ ૧૦॥

યથા વજ્રેણ પીડાં તુ બુભુજુઃ પર્વતાદયઃ ।
તથા વિઘ્નેશ્વરઃ સાક્ષાત્તુલસ્યા પીડિતો ભવેત્ ॥ ૧૧॥

તતઃ સર્વૈર્વિનિશ્ચિત્ય સ ગાણેશાલયાત્તદા ।
બહિષ્કૃતો મહાપાપી સ્વગૃહે તાદૃશે રતઃ ॥ ૧૨॥

તતઃ સ્વલ્પેન કાલેન મમાર કાશ્યપાધમઃ ।
નરકેષુ ચ તં યામાઃ પાતયામાસુરઞ્જસા ॥ ૧૩॥

એકકલ્પસમં કાલં નરકેષુ સ્થિતોઽભવત્ ।
ક્રમેણ સકલાન્ ભુક્ત્વા રાક્ષસોઽભૂત્ સુદારુણઃ ॥ ૧૪॥

સદા ક્ષુધા સમાવિષ્ટો દાહરોગાદિસંયુતઃ ।
અશક્તઃ સર્વકાર્યેષુ વનેષુ વિચચાર હ ॥ ૧૫॥

એકદા તત્ર ગાર્ગ્યશ્ચ સમાયાતો નિજેચ્છયા ।
ગણેશભક્તમુખ્યઃ સ મહાયોગી પ્રજાપતે ॥ ૧૬॥

તં દૃષ્ટ્વા રાક્ષસો દુષ્ટો ભક્ષિતું ચ સમાયયૌ ।
ગાર્ગ્યો ગણેશમન્ત્રેણ મન્ત્રિતં જલમાક્ષિપત્ ॥ ૧૭॥

જલસ્પર્શજપુણ્યેન ગાર્ગ્યદર્શનજેન સઃ ।
ધર્મધ્રુક્ રાક્ષસો જાતિસ્મરસ્તત્ર બભૂવ હ ॥ ૧૮॥

તતોઽતિખેદસંયુક્તઃ સ રુરોદ પ્રણમ્ય તમ્ ।
જગાદ પ્રાઞ્જલિં બદ્ધ્વા હાહાકારરવાઽઽકુલઃ ॥ ૧૯॥

ધર્મધ્રુગુવાચ ।
રક્ષ માં મુનિશાર્દૂલ ગાણપત્ય મહાયશાઃ ।
ત્વત્પાદપ્રવણં ગાર્ગ્ય મોચયાશુ ભવાર્ણવાત્ ॥ ૨૦॥

તતઃ સ સર્વવૃત્તાન્તં કથયામાસ રાક્ષસઃ ।
પૂર્વજન્મભવં તસ્મૈ ગાર્ગ્યાય ભયસઙ્કુલઃ ॥ ૨૧॥

ત્વદીયદર્શનેનૈવ મન્ત્રિતેન જલેન ચ ।
જાતિસ્મરત્વમાપન્નો દુઃખં તે કથયામ્યહમ્ ॥ ૨૨॥

શ્રુત્વા શરણગં વીક્ષ્ય દયાયુક્તો મહામુનિઃ ।
ગણેશનામમન્ત્રં સ દદૌ તસ્મૈ હિતાવહમ્ ॥ ૨૩॥

જગાદ તં મહાયોગી જપ ત્વં નામમન્ત્રકમ્ ।
નિત્યં તથા તુલસ્યા વૈ કૃતં સ્તોત્રં પઠસ્વ ચ ॥ ૨૪॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગાર્ગ્યઃ પરમપાવનઃ ।
દુષ્ટો નિત્યં તથા ચક્રે દુઃખં દૃષ્ટ્વા ભયાકુલઃ ॥ ૨૫॥

(Page  ખં. ૫ અ. ૩૪ પાન ૮૦)
તતઃ ક્ષુધા સુશાન્તા વૈ બભૂવે તસ્ય દુર્મતેઃ ।
રોગહીનઃ સશક્તશ્ચ ગાણપત્યપ્રિયોઽભવત્ ॥ ૨૬॥

અન્તે ગણેશ્વરં સોઽપિ જગામ દુઃખવર્જિતઃ ।
તત્ર યોગસ્વભાવેનાઽભજદ્વિઘ્નેશ્વરં વિધે ॥ ૨૭॥

એતત્તે કથિતં સર્વં સઙ્ક્ષેપેણ ચરિત્રકમ્ ।
તુલસીવર્જને ભૂતં સર્વસંશયનાશનમ્ ॥ ૨૮॥

તુલસીં ગણનાથાય સમર્પયતિ યો નરઃ ।
સ ચાણ્ડાલો ન સન્દેહો નારકીભૂમિસંસ્થિતઃ ॥ ૨૯॥

વંશહાનિર્ભવેત્તસ્ય લક્ષ્મીનાશસ્તથા વિધે ।
રોગાદ્યૈઃ પીડિતોઽત્યન્તમન્તે નરકગો ભવેત્ ॥ ૩૦॥

તસ્ય સ્પર્શં ન કુર્યાત્ કઃ કૃત્વા સ્નાનં સમાચરેત્ ।
સચૈલસ્નાનહીનશ્ચેત્ જ્ઞાત્વા પાપી સદા ભવેત્ ॥ ૩૧॥

નામ તસ્ય પ્રજાનાથ ન ગ્રાહ્યં પાપદાયકમ્ ।
બહુનાઽત્ર કિમુક્તેન પાપરૂપઃ સ વૈ સ્મૃતઃ ॥ ૩૨॥

ઇદં તે કથિતં સર્વં પૃચ્છતે ચ યથાતથમ્ ।
શ્રોતુમિચ્છસિ કિં ભૂયશ્ચરિત્રં વદ સામ્પ્રતમ્ ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે તુલસીસમર્પણવર્જનવર્ણનં નામ ત્રયસ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૩

## ૫.૩૪ રુક્માઙ્ગદચરિતં નામ ચતુસ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
વદ પૂજાં વિધિયુતાં ગણેશસ્ય સવિસ્તરામ્ ।
માનસીં બાહ્યરૂપાં ચ સર્વસિદ્ધિપ્રદાયિનીમ્ ॥ ૧॥

ગણેશલોકગં સર્વં માહાત્મ્યં કથયસ્વ મે ।
કીદૃશોઽયં નિજો લોકો મુને કેનૈવ લભ્યતે ॥ ૨॥

મુદ્ગલ ઉવાચ ।

અત્ર તે કથયિષ્યામિ પુરાતનભવં શુભમ્ ।
ઇતિહાસં મહાભાગ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩॥

પુરા તે કથિતં સ્થાનં ગણેશસ્ય મહાત્મનઃ ।
કાર્તિકેયવરાજ્જાતં લક્ષવૈનાયકાત્મકમ્ ॥ ૪॥

તત્ર રાજા બભૂવાઽપિ સર્વશાસ્ત્રવિશારદઃ ।
ઐલઃ શસ્ત્રાસ્ત્રતત્ત્વજ્ઞો ધર્મશીલશ્ચ સત્યવાક્ ॥ ૫॥

સદા ગણેશભક્તશ્ચાભજદ્વિઘ્નેશ્વરં સદા ।
સાર્વભૌમઃ સુવિખ્યાતો ગાણપત્યપ્રિયોઽભવત્ ॥ ૬॥

તત્રાઽઽજગામ ગાણેશો ગાર્ગ્યઃ સર્વાર્થકોવિદઃ ।
તં પ્રણમ્ય પ્રપૂજ્યૈવ પપ્રચ્છૈલો મહાયશાઃ ॥ ૭॥

ઐલ ઉવાચ ।
સ્વામિંસ્ત્વં ગણરાજસ્ય ભક્તસ્તાદૃશયોગધૃક્ ।
સાક્ષાદ્ગણપતિઃ કિં વા ત્વમેવાત્ર ન સંશયઃ ॥ ૮॥

મયૂરેશાવતારે ત્વં મયૂરેશસમન્વિતઃ ।
સ્થિતસ્તત્ર ત્વયા વિપ્ર મયૂરેશો નિરીક્ષિતઃ ॥ ૯॥

ધન્યસ્ત્વં યોગિનાં મધ્યે પ્રત્યક્ષં ગણનાયકમ્ ।
મિત્રં કૃત્વા સુહર્ષેણાઽહો તિષ્ઠસિ વિશેષતઃ ॥ ૧૦॥

મયૂરેશસ્ય વિપ્રેશાજ્ઞયા યોગવિદાંવર ।
ભાષ્યં કૃતં ગણેશસ્ય ગીતાયાઃ શાન્તિદં પરમ્ ॥ ૧૧॥

(Page ખં. ૫ અ. ૩૪ પાન ૮૧)
ત્વદીયભાષ્યયોગેન ગીતાજ્ઞા બ્રાહ્મણાદયઃ ।
બભૂવુર્ગાણપત્યાશ્ચ ત્વચ્છિષ્યાસ્તે મતા મુને ॥ ૧૨॥

યાદૃશં ગણનાથેન કથિતં તાદૃશં પ્રભો ।
ત્વયા જ્ઞાતં ન સન્દેહો ગણેશસ્ત્વમતો મતઃ ॥ ૧૩॥

ગણેશગીતાહાર્દં યદ્ગણેશશ્ચ વરેણ્યકઃ ।
ત્વં ત્રયઃ સમ્મતાઃ શાસ્ત્રે જાનતે પૂર્ણયોગતઃ ॥ ૧૪॥

ધન્યેન યેન ભાગ્યેન દૃષ્ટં તે પાદપઙ્કજમ્ ।
વિદ્યાવ્રતતપોદાનં પિતરૌ કુલમેવ મે ॥ ૧૫॥

યશો રાજ્યાદિકં સર્વં ધન્યં તે પાદદર્શનાત્ ।
ન હ્યલ્પપુણ્યયોગેન દર્શનં યોગિનાં ભવેત્ ॥ ૧૬॥

અધુના વદ મે બ્રહ્મન્ ગણેશસ્ય યથાવિધિ ।
પૂજાં બાહ્યાં તથાऽऽન્તર્યાં ગાણપત્યપ્રકારતઃ ॥ ૧૭॥

એવં પૃષ્ટો મહાયોગી ગાર્ગ્યઃ સર્વાર્થકોવિદઃ ।
તં જગાદ સુહર્ષેણ ગાણપત્યો મહાયશાઃ ॥ ૧૮॥

ગાર્ગ્ય ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
ગૃત્સમદસ્ય વિપ્રસ્ય ચરિત્રસંયુતં નૃપ ॥ ૧૯॥

વાચક્નવિસ્તપોનિષ્ઠો બભૂવ પરમાર્થવિત્ ।
તસ્ય પત્ની મુકુન્દા વૈ રૂપયૌવનશાલિની ॥ ૨૦॥

વનમધ્યે સ્થિતૌ ચોભૌ તત્રાકસ્માત્ સમાગતઃ ।
રુક્માઙ્ગદો નૃપો ભૂપ મૃગયાસક્તચેતસા ॥ ૨૧॥

ક્ષુધાતૃષાયુતો રાજા ભ્રષ્ટસાર્થો દ્વિજાશ્રમમ્ ।
પ્રવિશ્ય તં પ્રણમ્યૈવ સસ્ત્રીકં સંસ્થિતોऽભવત્ ॥ ૨૨॥

તસ્મિન્ કાલે દ્વિજઃ સોऽપિ મધ્યાહ્ને કર્મકારણાત્ ।
નિર્જગામાશ્રમાદ્વાચક્નવિસ્તસ્માન્ મહાયશાઃ ॥ ૨૩॥

ગતે મુનૌ નૃપસ્તત્ર જગાદ દેહિ મે જલમ્ ।
માતર્મુકુન્દે શ્રાન્તાય ચાકુલાય ક્ષુધાતૃષા ॥ ૨૪॥

તસ્ય તદ્વચનં શ્રુત્વા મુનિપત્ની સુવિહ્વલા ।
દૃષ્ટ્વા નૃપવરં તં ચ કામબાણાર્દિતાऽવદત્ ॥ ૨૫॥

મુકુન્દોવાચ ।
ત્વત્સમં પુરુષં ક્વાપિ ન પશ્યામિ નૃપાત્મજ ।
ત્રૈલોક્યેऽતો મહાભાગ માં ભજસ્વ સુવિહ્વલામ્ ॥ ૨૬॥

નો ચેત્ પ્રાણા ગમિષ્યન્તિ કામબાણૈર્હતા મમ ।
ઇત્યુક્ત્વા તં નૃપં સા તુ ચુચુમ્બે હઠતત્પરા ॥ ૨૭॥

તતોऽતિક્ષોભિતો રાજા ધૃત્વા દૂરે સમાક્ષિપત્ ।
જગાદ તાં મુનેઃ પત્નીં વ્યભિચારરતાં વચઃ ॥ ૨૮॥

રુક્માઙ્ગદ ઉવાચ ।
સર્વેષાં ગુરવો દેવિ બ્રાહ્મણા નાત્ર સંશયઃ ।
પુત્રતુલ્યા વયં સર્વે ત્વદીયાઃ પાપકારિણિ ॥ ૨૯॥

તત્ર વિઘ્નેશ્વરે સક્તા ન ચલન્તિ કદાચન ।
પરસ્ત્રિયં સમાલોક્ય માતૃબુદ્ધિકરા મતાઃ ॥ ૩૦॥

એવં નિર્ભર્ત્સ્ય તાં રાજા નિઃસૃતઃ શોકસઙ્કુલઃ ।
આશ્રમાત્ સા શશાપૈવ તં નૃપં કામમોહિતા ॥ ૩૧॥

કુષ્ઠી ભવ મહાદુષ્ટ સકામાં ત્યજસિ સ્ત્રિયમ્ ।
મોહિતાં પાપકર્મા ત્વં કઠિનોઽસિ સુદુર્મતે ॥ ૩૨॥

તસ્યાઃ શાપસ્ય યોગેન શ્વેતકુષ્ઠી બભૂવ હ ।
રુક્માઙ્ગદો વને ગત્વા સસ્માર દ્વિરદાનનમ્ ॥ ૩૩॥

તતો રાત્રૌ મહાયોગી નારદસ્તત્ર ચાગતઃ ।
તં દૃષ્ટ્વા પ્રણનામાદૌ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૩૪॥

રુક્માઙ્ગદ ઉવાચ ।
કુષ્ઠનાશકરં તીર્થં ક્ષેત્રમૌષધમેવ ચ ।
વદ મે સર્વધર્મજ્ઞ ગાણપત્યપ્રિય પ્રભો ॥ ૩૫॥

નારદ ઉવાચ ।
ઇન્દ્રેણ તપસા દેવો ગણેશઃ પૂજિતોઽભવત્ ।
(Page ખં. ૫ અ. ૩૪ પાન ૮૨)
સહસ્રભગનાશાર્થં સ દેવો વરદોઽભવત્ ॥ ૩૬॥

ગણેશવરદાનેન મહેન્દ્રસ્તેજસા યુતઃ ।
યોગયુક્તોઽપાલયત ત્રૈલોક્યં સચરાચરમ્ ॥ ૩૭॥

તત્ર તીર્થં સુવિખ્યાતં ગણેશપદલાઞ્છિતમ્ ।
ચિન્તામણિર્ગણેશશ્ચ તેન સંસ્થાપિતોઽભવત્ ॥ ૩૮॥

તત્ર ગત્વા મહીપાલ કુરુ સ્નાનં ચ તત્ક્ષણાત્ ।
કુષ્ઠહીનઃ સુવર્ણસ્ત્વં ભવિષ્યસિ ન સંશયઃ ॥ ૩૯॥

તત્ર તીર્થપ્રભાવેણ કુષ્ઠરોગવિવર્જિતાઃ ।
ભવન્તિ સ્વાનન્દગાસ્તુ નૃપ નાસ્ત્યત્ર સંશયઃ ॥ ૪૦॥

એવમુક્ત્વા મહાયોગી નારદો ગણપં સ્મરન્ ।
ગતઃ સોઽપિ મહાબુદ્ધિર્હર્ષયુક્તો બભૂવ હ ॥ ૪૧॥

તતઃ પ્રાતઃ સમાયાતા સેના તસ્ય મહાત્મનઃ ।
તયા સાર્દ્ધં જગામાઽસૌ વિદર્ભે તીર્થસેવકઃ ॥ ૪૨॥

ચિન્તામણિભવં તીર્થં દૃષ્ટ્વા રાજા પ્રજાપતે ।
કુષ્ઠહીનો બભૂવાઽથ સર્વૈઃ સંહર્ષિતોઽભવત્ ॥ ૪૩॥

તતઃ સ્નાત્વા સસૈન્યેન યથાવિધિયુતઃ સ્વયમ્ ।
પૂજયામાસ હર્ષેણ ચિન્તામણિં નૃપાત્મજઃ ॥ ૪૪॥

પૂજયિત્વા યથાન્યાયં દત્ત્વા દાનાનિ કૃત્સ્નશઃ ।
સંસ્થિતો મણ્ડપે રાજા ગણેશે ભક્તિસંયુતઃ ॥ ૪૫॥

તત્રાકસ્માદ્વિમાનં તુ સમાયાતં સુખપ્રદમ્ ।
તત્ર દૂતા ગણેશસ્ય જગુસ્તં નૃપસત્તમમ્ ॥ ૪૬॥

ગાણપત્યા ઊચુઃ ।
ઇદં વિમાનમારુહ્ય સસૈન્યો નૃપસત્તમ ।
ચલ સ્વાનન્દલોકે ત્વં તીર્થસ્નાનપ્રભાવતઃ ॥ ૪૭॥

તતોઽતિહર્ષસંયુક્તસ્તાન્ પ્રણમ્ય મહાયશાઃ ।
પૂજ્યોવાચ વિચારજ્ઞો ગાણપત્યો નૃપાત્મજઃ ॥ ૪૮॥

રુક્માઙ્ગદ ઉવાચ ।
ભીમં મે ગાણપત્યાસ્તુ પિતરં ચારુહાસિનીમ્ ।
માતરં ત્યજ્ય વિઘ્નેશં કથં યામિ ત્વરાન્વિતઃ ॥ ૪૯॥

ગાણેશાનૌ વિશેષેણ તથા તં તે સમબ્રુવન્ ।
તયોઃ સ્નાનં નૃપાધ્યક્ષ કુરુ તીર્થેઽધુના કિલ ॥ ૫૦॥

તતસ્તાવપિ નેષ્યામો મા ચિન્તાં કુરુ સત્તમ ।
સ્નાનમાત્રેણ સ્વાનન્દદાયકં તીર્થમુચ્યતે ॥ ૫૧॥

તતોઽતિહર્ષિતો રાજા કુશાન્ ગૃહ્ય તયોઃ પુનઃ ।
નામ્ના ગ્રન્થિં સમાબધ્ય ચક્રે સ્નાનં યથાવિધિ ॥ ૫૨॥

તતોઽતિહર્ષિતા લોકા નગરસ્થાસ્તથા પુનઃ ।
સ્નાનં ચક્રુર્જનાનાં તે આબાલં શ્વપચાવધિ ॥ ૫૩॥

તતસ્તે યાનમારુહ્ય કૌણ્ડિન્યનગરં યયુઃ ।
પુણ્યં દત્વા ચ તાન્ સર્વાન્ ગૃહ્ય સ્વાનન્દમાયયુઃ ॥ ૫૪॥

એવં તીર્થપ્રભાવેણ નગરસ્થજના નૃપ ।
ગત્વા વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતા બભૂવિરે ॥ ૫૫॥

ધર્મયુક્તો ગણેશસ્ય ભક્તો રુક્માઙ્ગદઃ સ્વયમ્ ।
સ્વલ્પકાલેન નિર્વિઘ્નો બભૂવ છલિતોઽપિ સઃ ॥ ૫૬॥

ગણેશભક્તમત્યુગ્રં યે છલન્તિ નરાધમાઃ ।
તેષાં તુ નિષ્કૃતિર્નાસ્તિ દુઃખં ભુઞ્જન્તિ દારુણમ્ ॥ ૫૭॥

રુક્માઙ્ગદં મુકુન્દા સા છલયિત્વા વિશેષતઃ ।
યા ગતિશ્ચ તયા પ્રાપ્તા તાં શ‍ૃણુષ્વ મહીપતે ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે રુક્માઙ્ગદચરિતં નામ ચતુસ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૪
(Page ખં. ૫ અ. ૩૫ પાન ૮૩)

## ૫.૩૫ ગૃત્સમદગણેશસમાગમો નામ પઞ્ચત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગાર્ગ્ય ઉવાચ ।
મુકુન્દા કામદગ્ધા સા પપાત ધરણીતલે ।
ન કિઞ્ચિત્ સુખદં તસ્યા બભૂવ પૃથિવીતલે ॥ ૧॥

તતોઽતિશોકસંયુક્તા તમેવાચિન્ત્ય સંસ્થિતા ।
નિદ્રાં લેભે તતસ્તાં સોઽબોધયદ્દેવનાયકઃ ॥ ૨॥

તસ્યાઃ શાન્તિપ્રદાનાર્થં સ્વયં તત્રાજગામ હ ।
રુક્માઙ્ગદસ્વરૂપી સ બુભુજે તાં સુરાધિપઃ ॥ ૩॥

સા હર્ષિતા જગામૈવ સ્વગૃહં ગર્ભસંસ્થિતા ।
ઇન્દ્રઃ સ્વર્ગં યયૌ ભૂપ હર્ષયુક્તો વિહાયસા ॥ ૪॥

વાચક્નવિઃ સમાયાતઃ કૃત્વા નિત્યક્રિયાં મુનિઃ ।
ન બુબોધ મુકુન્દાયાશ્ચરિતં સ તપોરતઃ ॥ ૫॥

તતઃ પૂર્ણે ચ ગર્ભે સા સુષુવે પુત્રમુત્તમમ્ ।

જાતકર્માદિકં સર્વં ચકાર મુનિસત્તમઃ ॥ ૬॥

ગૃત્સમદેતિ પુત્રસ્ય નામ ચક્રે સુખપ્રદમ્ ।
ચકાર વ્રતબન્ધં તુ પઞ્ચમે હર્ષસંયુતઃ ॥ ૭॥

વેદાનધ્યાપયામાસ શ્રવણગ્રાહકાય વૈ ।
સ્વયં તસ્મૈ દદૌ મન્ત્રં ગણાનાં ત્વેતિ ઋગ્ભવમ્ ॥ ૮॥

તેન મન્ત્રેણ વિઘ્નેશં ધ્યાત્વા ગૃત્સમદો મુનિઃ ।
તોષયામાસ ભાવેન નિત્યં જપપરાયણઃ ॥ ૯॥

કદાચિત્તત્ર રાજા સ મગધસ્તં જુહાવ ચ ।
પિતુઃ શ્રાદ્ધે સુદાન્તં વૈ તપોયુક્તં યશસ્વિનમ્ ॥ ૧૦॥

તત્ર વસિષ્ઠમુખ્યાશ્ચ મુનયો યોગપારગાઃ ।
સમાગતાઃ સભાયાં તે વિવિશુઃ પૂજિતા નૃપ ॥ ૧૧॥

તત્ર શાસ્ત્રપ્રસઙ્ગે સ ગૃત્સમદ ઉવાચ હ ।
યોગમયોગિભાવસ્થઃ શ્રુત્વાઽત્રિસ્તં વચોઽબ્રવીત્ ॥ ૧૨॥

અયોગી યોગિનાં મધ્યે રુક્માઙ્ગદસુતસ્તથા ।
વદસિ ત્વં ન યોગ્યોઽસિ પઙ્ક્તૌ ગચ્છ નિજાશ્રમમ્ ॥ ૧૩॥

તતોઽતિકોપસંયુક્તઃ સ્વં ગૃત્સમદ આશ્રમમ્ ।
જગામ સોઽપિ જનનીમપૃચ્છદ્રક્તલોચનઃ ॥ ૧૪॥

વદ તાતં મદીયં ત્વં કામુકે નિરપત્રપે ।
કથં રુક્માઙ્ગદાજ્જાતોઽહં નોચેત્ત્વાં શપામિ તુ ॥ ૧૫॥

જગાદ શાપભીતા તં તતઃ સા કમ્પસંયુતા ।
વૃત્તાન્તં પૂર્વસમ્ભૂતં રુક્માઙ્ગદવિહારજમ્ ॥ ૧૬॥

તચ્છ્રુત્વા કોપસંયુક્તઃ શશાપ જનનીં સુતઃ ।
કણ્ટકી ભવ માતસ્ત્વં દુષ્ટકર્મપરાયણા ॥ ૧૭॥

અતિતિક્તફલાં તત્ર ભક્ષિષ્યન્તિ નરા ન તામ્ ।
અરણ્યે નિન્દિતા નિત્યં ભુઙ્ક્ષ્વ પાપં પુરા કૃતમ્ ॥ ૧૮॥

તતઃ સાપિ સ્વપુત્રં તં શશાપ ક્રોધપૂરિતા ।
ત્વત્તઃ પુત્રો મહાદૈત્યો ભવિષ્યતિ સુદારુણઃ ॥ ૧૯॥

તતો દેહં સમુત્સૃજ્ય મુકુન્દા સાઽભવન્નૃપ ।
કણ્ટકી શ્યામસંજ્ઞા સા પાપકર્મપરાયણા ॥ ૨૦॥

ગણેશભક્તવિક્ષેપદાતૃત્વાદઘમુત્તમમ્ ।
તયા પ્રાપ્તં ચિરં પૂર્ણં તેન શાપયુતાઽભવત્ ॥ ૨૧॥

કલ્પે કલ્પે ચ શાપાત્ સા સદા વૃક્ષત્વમાગતા ।
પશ્ય વિઘ્નસ્વરૂપં ત્વં મહાભયકરં નૃપ ॥ ૨૨॥

તતો ગૃત્સમદઃ ક્ષુબ્ધો દેહત્યાગે સમુદ્યતઃ ।
તત આકાશવાણી તં જગાદ પ્રેમસંયુતા ॥ ૨૩॥

ઇન્દ્રો રુક્માઙ્ગદીભૂતસ્તસ્માજ્જાતોઽસિ માનદ ।
ભજ લમ્બોદરં નિત્યં તતઃ સૌખ્યમવાપ્સ્યસિ ॥ ૨૪॥

શ્રુત્વા સોઽપિ વને ગત્વા તતાપ તપ ઉત્તમમ્ ।
નિરાહારેણ સંસ્થશ્ચ ગણેશમભજત્ સદા ॥ ૨૫॥

બ્રહ્મણસ્પતિસૂક્તૈશ્ચાભિષિઞ્ચન્ મણ્ડલે સ્થિતમ્ ।
(Page  ખં. ૫ અ. ૩૫ પાન ૮૪)
જપં ચકાર ભાવેન બ્રાહ્મણત્વસ્ય કારણાત્ ॥ ૨૬॥

ઐલ ઉવાચ ।
બ્રહ્મણસ્પતિસૂક્તાનાં મણ્ડલં કીદૃશં સ્મૃતમ્ ।
ફલં ચ કીદૃશં તત્ર લભતે માનવઃ પ્રભો ॥ ૨૭॥

કથયસ્વ વિધાનેન સર્વજ્ઞોઽસિ દયાનિધે ।
યેન વિઘ્નેશ્વરઃ પ્રીતો ભવેત્ સર્વાર્થદાયકઃ ॥ ૨૮॥

ગાર્ગ્ય ઉવાચ ।
બ્રહ્મણસ્પતિસૂક્તાનાં વિધિં શૃણુ મહામતે ।
યથા ગૃત્સમદઃ સિદ્ધો બભૂવે તસ્ય સેવનાત્ ॥ ૨૯॥

ગણાનાં ત્વેતિ મન્ત્રેણ ષોડશાઙ્ગેષુ ભૂમિપ ।
ન્યાસં કુર્યાત્તથા પૂજ્યાઽભિષેકં તુ સમાચરેત્ ॥ ૩૦॥

એકવિંશતિભિર્ભૂપા વૃત્તિભિરેકવિંશતિઃ ।
સમાખ્યાતા ચ સૂક્તાનામભિષેકે તથા જપે ॥ ૩૧॥

એતાદૃશાશ્ચ રાજેન્દ્ર ભવન્ત્યેકાધિકાસ્તતઃ ।

વિંશત્યો મણ્ડલં હ્યેકં જ્ઞાતવ્યં વિબુધૈઃ પરમ્ ॥ ૩૨॥

મણ્ડલાનિ મહાભાગ એકવિંશન્મિતાનિ ચ ।
ભવન્તિ ચેત્ સમાખ્યાતં મહામણ્ડલકં બુધૈઃ ॥ ૩૩॥

અભિષેકે સમાખ્યાતં જપે વા રાજસત્તમ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં મહામણ્ડલકં સુરૈઃ ॥ ૩૪॥

ધર્માર્થકામમોક્ષેષુ પ્રશસ્તં કર્મ સિદ્ધિદમ્ ।
ગણેશપ્રીતયે ભક્ત્યા બ્રહ્મભૂતકરં ભવેત્ ॥ ૩૫॥

બ્રાહ્મણત્વસ્ય કાર્યાર્થં કૃતં તેન મહાત્મના ।
ગૃત્સમદેન સૂક્તાનાં મહામણ્ડલકં નૃપ ॥ ૩૬॥

એતત્તે કથિતં ભૂપાધુના શ ૃણુ કથાનકમ્ ।
વિઘ્નેશપ્રાપકં ગૃત્સમદસ્ય દુરિતાપહમ્ ॥ ૩૭॥

સ્વયં ગૃત્સમદસ્તત્ર નિત્યં કૃત્વા યથાવિધિ ।
ગણાનાં ત્વેતિ મન્ત્રેણ પુપૂજ વિઘ્નનાયકમ્ ॥ ૩૮॥

એકવિંશતિમેકાં સ નિત્યં ચકાર ભૂમિપ ।
અભિષેકાર્થમેવં તુ તતો જપપરોઽભવત્ ॥ ૩૯॥

ગણાનાં ત્વેતિ મન્ત્રસ્ય જપં ચકાર નિત્યદા ।
શતાનિ ધ્યાનનિષ્ઠઃ સ સૈકવિંશતિકાનિ તુ ॥ ૪૦॥

નાસાગ્રન્યસ્તદૃષ્ટિશ્ચ સદા યત્નપરાયણઃ ।
મહોગ્રતપસા દેવં તોષયામાસ વિઘ્નપમ્ ॥ ૪૧॥

એવં વર્ષસહસ્રૈસ્તુ દિવ્યૈર્વિઘ્નેશ્વરો યયૌ ।
મુનિં તં ભક્તવાત્સલ્યાદુવાચ ધ્યાનસંસ્થિતમ્ ॥ ૪૨॥

શ્રીગણેશ ઉવાચ ।
પશ્ય માં મૂનિશાર્દૂલ બ્રહ્મણસ્પતિમાગતમ્ ।
વરયસ્વ વરાન્ મત્તો દાસ્યામિ તુભ્યમાદરાત્ ॥ ૪૩॥

ગણેશવચનં શ્રુત્વા ગૃત્સમદઃ સુહર્ષિતઃ ।
ઉન્મીલ્ય લોચને ઢુણ્ઢિમપશ્યન્નિકટે સ્થિતમ્ ॥ ૪૪॥

તતોઽતિહર્ષસંયુક્તઃ પ્રણનામ વિનાયકમ્ ।
ભક્ત્યા સમ્પૂજ્ય તુષ્ટાવ સાશ્રુનેત્રો નરાધિપ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગૃત્સમદગણેશસમાગમો નામ પઞ્ચત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૫
(Page ખં. ૫ અ. ૩૬ પાન ૮૫)

## ૫.૩૬ ગૃત્સમદવરપ્રદાનં નામ ષટ્ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
નમસ્તે બ્રહ્મણાં નાથ બ્રહ્મણાં બ્રહ્મરૂપિણે ।
બ્રહ્મણસ્પતયે તુભ્યં ગણેશાય નમો નમઃ ॥ ૧॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં જ્યેષ્ઠપદપ્રદાયિને ।
જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપાય સર્વપૂજ્યાય તે નમઃ ॥ ૨॥

કર્તૄણાં કતૃરૂપાય કવયે કવિનાયક ।
કર્તૃભ્યઃ કર્તૃદાત્રે વૈ કવિરાજાય તે નમઃ ॥ ૩॥

જગત્સુ બ્રહ્મસુ પ્રાજ્ઞ નાનાભોગકરાય તે ।
ઉપમાન્નપ્રભોક્ત્રે તુ બ્રહ્મભોક્ત્રે નમો નમઃ ॥ ૪॥

સદા મોહયુતાયૈવ મોહમોહકરાય તે ।
જીવાય બૃહતાં નાથાય બૃહસ્પતયે નમઃ ॥ ૫॥

સદા બ્રહ્મસુખસ્થાય પરમાત્મસ્વરૂપિણે ।
ગુહાહિતાય સાઙ્ખ્યાય બૃહસ્પતિસખાય તે ॥ ૬॥

સ્વસંવેદ્યમયાયૈવ સ્વાનન્દે યોગધારિણે ।
જીવાનાં બ્રહ્મણાં સંયોગાય તે વૈ નમો નમઃ ॥ ૭॥

સત્યાયાયોગરૂપાય મનોવાણીવિવર્જિત ।
ભદ્રાણાં ભદ્રકાયૈવ સત્યસત્યાય તે નમઃ ॥ ૮॥

સર્વેષાં પોષકાયૈવ સોમાયામૃતરૂપિણે ।
સોમાનાં સોમદાત્રે તે પુષ્ટિનાથાય તે નમઃ ॥ ૯॥

ઉત્તિષ્ઠત્સૃષ્ટિકર્ત્રે તે પાલકાય હરાય ચ ।
ત્રયીમયાય તૂર્યાય તૂર્યાતીતાય તે નમઃ ॥ ૧૦॥

ઇન્દ્રાદિદેવતાનાં વૈ સહાયાય નમો નમઃ ।
ધર્મપાલકભાવાય ધર્માધીશાય તે નમઃ ॥ ૧૧॥

સર્વેષાં રાજ્યદાત્રે વૈ રાજ્યરાજાય તે નમઃ ।
અરાજ્યાય પરેશાય સંસારાર્ણવતારિણે ॥ ૧૨॥

યોગેભ્યો યોગદાત્રે ચ યોગયોગાય તે નમઃ ।
શાન્તિદાય સદા શાન્તિસ્થાય તત્પતયે નમઃ ॥ ૧૩॥

ઇત્યાદિ ભેદા બહવો બ્રહ્મણો વેદવાદતઃ ।
તેષાં સ્વામિસ્વરૂપાય બ્રહ્મણે તે નમો નમઃ ॥ ૧૪॥

કિં સ્તૌમિ ગણનાથ ત્વાં બ્રહ્મણસ્પતિરૂપિણમ્ ।
ભવ પ્રસન્નો બ્રહ્મેશ કૃપયા તે નમો નમઃ ॥ ૧૫॥

એવં ગૃત્સમદઃ સ્તુત્વા ગણેશાનં મહીપતે ।
હર્ષેણોત્ફુલ્લનયનો નનર્ત પ્રેમવિહ્વલઃ ॥ ૧૬॥

દૃષ્ટ્વા તં ગણરાજસ્તુ જગાદ ઘનનિસ્વનઃ ।
વરં મત્તસ્ત્વં વરયાધુના સ્તોત્રેણ તોષિતઃ ॥ ૧૭॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ ન સન્દેહો મમ ભક્તિવિવર્ધનમ્ ॥ ૧૮॥

સદા શાન્તિમયો ભૂત્વા માં ભજિષ્યસિ માનદ ।
ત્વયા કૃતેન સ્તોત્રેણ બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૧૯॥

પુત્રપૌત્રાદિકં સર્વં ધનધાન્યાદિવર્ધનમ્ ।
પ્રભવિષ્યતિ પાઠેન શ્રવણેન મુનેઽસ્ય તુ ॥ ૨૦॥

તસ્ય તદ્વચનં શ્રુત્વા સાવધાનો બભૂવ હ ।
નિયમ્ય હર્ષમુગ્રં સ પ્રણનામ ગજાનનમ્ ॥ ૨૧॥

ઉવાચ વિસ્ખલદ્વાક્યો મુનિર્ગૃત્સમદો મહાન્ ।
ગણેશં ભક્તિસંયુક્તો ભક્તરાજેશ્વરઃ સ્વયમ્ ॥ ૨૨॥

ગૃત્સમદ ઉવાચ ।
ધન્યૌ મે જનકૌ નાથ જન્મ ધન્યં તપો વયઃ ।
વિદ્યા વ્રતાદિકં સર્વં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૨૩॥

અહો સાક્ષાદ્ગણેશાનો બ્રહ્મેન્દ્રો દૃષ્ટિમાગતઃ ।

મનોવાણીવિહીનો ન તાભ્યાં યુક્તો ન વૈ ભવાન્ ॥ ૨૪॥

એતાદૃશં ગણેશાનં દૃષ્ટ્વા ત્વાં કિં વૃણોમ્યહમ્ ।
તથાપિ વરયામિ ત્વાં ત્વદાજ્ઞાપાલનાર્થતઃ ॥ ૨૫॥

બ્રહ્મભૂતાશ્ચ વેદેષુ બ્રાહ્મણાઃ કથિતા બુધૈઃ ।
(Page ખં. ૫ અ. ૩૬ પાન ૮૬)
અતો માં બ્રાહ્મણં નાથ કુરુ યોગીન્દ્ર વન્દ્યકમ્ ॥ ૨૬॥

યથા ત્વં બ્રહ્મણાં નાથસ્તથાऽહં બ્રહ્મભૂયિનામ્ ।
નાથો ભવામિ વિઘ્નેશ યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૨૭॥

ત્વદીયપાદપદ્મે વૈ ભક્તિં દેહિ ગજાનન ।
સુદૃઢાં ગાણપત્યેષુ સઙ્ગં દેહિ સદા ચ મે ॥ ૨૮॥

ગાણપત્યેષુ વિખ્યાતં માં કુરુષ્વ વિશેષતઃ ।
ગૃત્સમદસમો નાસ્તિ ગાણપત્યસ્વભાવધૃક્ ॥ ૨૯॥

એવમુક્ત્વા ગણેશાનં પ્રણનામ મહામુનિઃ ।
તમુવાચ ગણેશાનો ભક્તિં દૃષ્ટ્વા મહાદ્ભુતામ્ ॥ ૩૦॥

શ્રીગણેશ ઉવાચ ।
ગણાનાં ત્વેતિ મન્ત્રસ્ય જપઃ ખલુ કૃતસ્ત્વયા ।
સૂક્તસ્યાપિ તથા મે વૈ તત્ર મુખ્યો ભવિષ્યસિ ॥ ૩૧॥

ઋષિર્ભવ મહાભાગ ગણાનાં ત્વાસ્ય મન્ત્રતઃ ।
સૂક્તસ્યાપિ વિશેષેણ બ્રાહ્મણેન્દ્રો ભવાપિ તુ ॥ ૩૨॥

આદાવૃષેશ્ચ યજ્ઞાદૌ સ્મરણં તે કરિષ્યતિ ।
પશ્ચાન્ મે દેવતાયાશ્ચ મુખ્યો ભવ મદીયકે ॥ ૩૩॥

ન ત્વત્સમો ભવેત્ કુત્ર મદ્ભક્તેષુ મહામુને ।
માનયિષ્યન્તિ વિપ્રાસ્ત્વામત્રિમુખ્યા ન સંશયઃ ॥ ૩૪॥

ત્વદીયસ્મરણં નાસ્તિ મન્ત્રે વૈદિકગે ચ મે ।
ગણાનાં ત્વા જપિષ્યન્તિ ફલહીના ભવન્તુ તે ॥ ૩૫॥

શિવવિષ્ણ્વાદયો દેવા બ્રહ્માદ્યા બ્રાહ્મણા નરાઃ ।
શેષાદ્યાશ્ચાસુરાદ્યાશ્ચ ત્વાં નમસ્યન્તિ નિત્યદા ॥ ૩૬॥

ત્વદીયાવજ્ઞયા ક્રુદ્ધો દહિષ્યામિ ચરાચરમ્ ।

ત્વદીયહૃદયે નિત્યં સ્થાસ્યામિ ભક્તિલોલુપઃ ॥ ૩૭॥

ત્વયા યત્ર તપસ્તપ્તં તદેવ ક્ષેત્રમુત્તમમ્ ।
ભવિષ્યતિ મદીયં વૈ પુષ્પકં સર્વસિદ્ધિદમ્ ॥ ૩૮॥

ભુક્તિં મુક્તિં બ્રહ્મભૂયં ભક્તિં પુષ્ણાતિ માનદ ।
તેન ક્ષેત્રં સમાખ્યાતં પુષ્પકં મત્સમાશ્રિતમ્ ॥ ૩૯॥

યદ્યચ્ચિન્તયસિ પ્રાજ્ઞ તત્તત્તે સફલં ભવેત્ ।
સ્મરણેન મહાકાર્યે પ્રત્યક્ષોઽહં ભવામિ ચ ॥ ૪૦॥

એવમુક્ત્વાંઽતર્દધેઽસૌ બ્રહ્મણસ્પતિરઞ્જસા ।
સ્વયં ગૃત્સમદઃ ખિન્નોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૪૧॥

તતઃ સ બ્રાહ્મણૈઃ સાર્ધં સ્થાપયામાસ વિઘ્નપમ્ ।
બ્રહ્મણસ્પતિનામાનં ચકાર ક્ષેત્રસંસ્થિતમ્ ॥ ૪૨॥

તતો ગૃત્સમદો યોગી સર્વમાન્યો બભૂવ હ ।
બ્રહ્મણસ્પતિભક્તશ્ચ બ્રાહ્મણૈઃ પૂજિતોઽભવત્ ॥ ૪૩॥

યથા ગજાનનઃ પ્રાહ તથા સર્વં બભૂવ હ ।
મુનિસ્તત્ર મહીપાલાઽભજત્તં સ વિનાયકમ્ ॥ ૪૪॥

નિત્યં ચ માનસીં પૂજાં બાહ્યાં ચકાર વિપ્રપઃ ।
ગણેશસ્યાઽતિભક્તો ગૃત્સમદઃ સર્વતો બભૌ ॥ ૪૫॥

ઇદં ગૃત્સમદાખ્યાનં કથિતં સર્વસિદ્ધિદમ્ ।
સર્વપાપહરં પુણ્યં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગૃત્સમદવરપ્રદાનં નામ ષટ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૬
(Page ખં. ૫ અ. ૩૭ પાન ૮૭)

## ૫.૩૭ ગૃત્સમદનિત્યકર્મવર્ણનં નામ સપ્તત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ઐલ ઉવાચ ।
કથં નિત્યં મહાયોગી ગાણપત્યાગ્ર્ય એવ ચ ।
મહાપૂજાં ગૃત્સમદો દ્વિવિધાં પ્રચકાર હ ॥ ૧॥

તન્મે વિસ્તરતો બ્રૂહિ ધન્યોઽયં બ્રાહ્મણેષુ વૈ ।
ગણેશેન કૃતો વિપ્રો ઋષિઃ સ્વસૂક્તકસ્ય ચ ॥ ૨॥

ગાર્ગ્ય ઉવાચ ।
શ‍ૃણુ તસ્ય મુનીન્દ્રસ્ય ચરિત્રં ભક્તિસંશ્રિતમ્ ।
યથા ગજાનનં સોપ્યભજત્તં નિત્યમાદરાત્ ॥ ૩॥

પ્રાતઃ કાલે સમુત્થાય ગુરું નત્વા સ્વમસ્તકે ।
માનસ્યા પૂજયા પૂજ્ય તથા હૃદિ ગણેશ્વરમ્ ॥ ૪॥

ગાણેશાંશ્ચ તથા સ્મૃત્વા વિભૂતિરૂપધારકાન્ ।
ક્ષમાપ્ય ધરણીં પશ્ચાત્ પાદં ચિક્ષેપ વિપ્રપઃ ॥ ૫॥

શૌચાચારમશેષં ચ ચકાર શાસ્ત્રમાર્ગતઃ ।
દન્તકાષ્ઠં તતો ભક્ષ્ય સ્નાનં ચક્રે યથાવિધિ ॥ ૬॥

આદાવાભ્યન્તરં સ્નાનં ચકાર શ‍ૃણુ તન્નૃપ ।
વક્ષ્યામિ સિદ્ધિદં પૂર્ણમજ્ઞાનમલનાશનમ્ ॥ ૭॥

સહસ્રારે સમાસીનં ગજાનનમનામયમ્ ।
અઙ્ગુષ્ઠપર્વમાત્રં તં પ્રભું ધ્યાયેચ્ચતુર્ભુજમ્ ॥ ૮॥

પાશાઙ્કુશધરં પૂર્ણં દન્તાભયસમન્વિતમ્ ।
ત્રિનેત્રં ભૂષણૈર્યુક્તમનર્ઘ્યવસ્ત્રરાજિતમ્ ॥ ૯॥

પાદાઙ્ગુષ્ઠાગ્રસમ્ભૂતાં તસ્ય તીર્થમયીં પરામ્ ।
સરિતં ચિન્તયેત્ પૂર્ણામાસમન્તાત્ પ્રસારિણીમ્ ॥ ૧૦॥

સર્વાન્તર્ગતજં પૂર્ણમજ્ઞાનં મલરૂપકમ્ ।
તયા સઙ્ક્ષાલયેચ્ચિત્તે નૃપ સર્વગયા સુધીઃ ॥ ૧૧॥

એવમાન્તરગં સ્નાનં યઃ કરોતિ નરોત્તમઃ ।
સ સર્વમલહીનશ્ચ ભુક્તિં મુક્તિં લભેત્ પરામ્ ॥ ૧૨॥

બાહ્યં તતઃ સમાખ્યાતં વૈદિકં તાન્ત્રિકં દ્વિધા ।
સ્વશાખોક્તવિધાનેનાદૌ વૈદિકં સમાચરેત્ ॥ ૧૩॥

તતઃ સ્વમૂલમન્ત્રેણ યુક્તં તાન્ત્રિકમાચરેત્ ।
સ શુદ્ધઃ સર્વકર્માર્હો ભવતે દેવતાસમઃ ॥ ૧૪॥

એવં ગૃત્સમદઃ સર્વં ચકાર રાજસત્તમ ।

ગણેશપ્રીતિકામાર્થં ભક્તિયુક્તો મહામુનિઃ ॥ ૧૫॥

શુચિવસ્ત્રે તથા ગૃહ્ય સન્ધ્યાં ચકાર વૈદિકીમ્ ।
તત આગમસમ્ભૂતાં ગાણેશીં સર્વસિદ્ધિદામ્ ॥ ૧૬॥

તત્રાચમનકં પ્રોક્તં ત્રિવિધં વિબુધોત્તમૈઃ ।
વૈદિકં તાન્ત્રિકં પૌરાણિકં ચૈવ સુસિદ્ધિદમ્ ॥ ૧૭॥

વ્યાહૃત્યા વૈદિકં પ્રોક્તં મૂલમન્ત્રેણ તાન્ત્રિકમ્ ।
પૌરાણિકં ચતુર્થ્યન્તં તં ગણેશનામસંયુતમ્ ॥ ૧૮॥

તત્ર પૌરાણિકં વક્ષ્યે મહત્ શુચિકરં શ◌ૃણુ ।
યથા ગૃત્સમદો વિપ્રેન્દ્રશ્ચકાર મહાયશાઃ ॥ ૧૯॥

ગણેશો ઢુણ્ઢિરાજશ્ચ હેરમ્બો વક્રતુણ્ડકઃ ।
શૂર્પકર્ણશ્ચ વિઘ્નેશશ્ચિન્તામણિર્ગજાનનઃ ॥ ૨૦॥

લમ્બોદરશ્ચૈકદન્તો બ્રહ્મણસ્પતિરેવ ચ ।
વિનાયકો જ્યેષ્ઠરાજો વિકટઃ કપિલસ્તથા ॥ ૨૧॥

ધરણીધર આશાપૂરકો મહોદરસ્તથા ।
ધૂમ્રકેતુર્મયૂરેશઃ સ્વાનન્દવાસકારકઃ ॥ ૨૨॥

ત્રિભિરાચમ્ય હસ્તૌ વૈ દ્વાભ્યાં સઙ્ક્ષાલયેન્નરઃ ।
દ્વાભ્યામોષ્ઠૌ સમ્પુટં ચૈકેન વૈ સંસ્પૃશંસ્તતઃ ॥ ૨૩॥

પાદૌ તથૈવ નામ્ના વૈ શિરશ્ચ ચિબુકં નૃપ ।
દ્વાભ્યાં દક્ષિણવામે તુ નાસિકે સંસ્પૃશેત્તતઃ ॥ ૨૪॥

દ્વાભ્યાં નેત્રે તથા કર્ણૌ નાભિં ચૈકેન હૃત્તથા ।
લલાટમેકનામ્ના તુ બાહૂ ચૈકેન સંસ્પૃશેત્ ॥ ૨૫॥

જલયુક્તેન નામ્ના યો નરશ્ચૈવં સમાચરેત્ ।
આચમનં ભવેત્ સાક્ષાદ્ગણેશો ભૂમિમણ્ડલે ॥ ૨૬॥

(Page ખં. ૫ અ. ૩૮ પાન ૮૮)
તતો ન્યાસાદિકં કુર્યાત્ કલશસ્થાપનં ચરેત્ ।
પીઠપૂજાં તતઃ કૃત્વા મન્ત્રન્યાસં સમાચરેત્ ॥ ૨૭॥

આગમોક્તેન માર્ગેણ મુનિર્ગૃત્સમદો મહાન્ ।
ચકાર સકલં રાજન્ દેવતુલ્યોઽપિ નિત્યશઃ ॥ ૨૮॥

ધ્યાત્વા ગજાનનં ચિત્તે પૂજાં ચક્રે સ માનસીમ્ ।
સ્થિરચિત્તેન યોગીશો ગણેશસ્ય વિધાનવિત્ ॥ ૨૯॥

માનસ્યાં સ્થિરચિત્તત્વં કારણં પરમં મતમ્ ।
ન વર્ણાશ્રમભાગશ્ચ વર્તતે નૃપસત્તમ ॥ ૩૦॥

વર્ણાશ્રમયુતાનાં ચાત્રાવર્ણાશ્રમરૂપિણામ્ ।
અધિકારઃ સદા શાસ્ત્રે વર્તતે સ્થિરચેતસામ્ ॥ ૩૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગૃત્સમદનિત્યકર્મવર્ણનં નામ સપ્તત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૭

## ૫.૩૮ ગૃત્સમદપ્રોક્તમાનસપૂજાકથનં નામાષ્ટત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
વિઘ્નેશ વીર્યાણિ વિચિત્રકાણિ સુમાગધૈર્બન્દિજનૈઃ સ્મૃતાનિ ।
શ્રુત્વા સમુત્તિષ્ઠ ગજાનન ત્વં બ્રાહ્મે જગન્મઙ્ગલગં કુરુષ્વ ॥ ૧॥

એવં મયા પ્રાર્થિતવિઘ્નરાજશ્ચિત્તેન ચોત્થાય બહિર્ગણેશઃ ।
તં નિર્ગતં વીક્ષ્ય નમન્તિ દેવાઃ શમ્ભ્વાદયો યોગિમુખાસ્તથાઽહમ્ ॥ ૨॥

શૌચાદિકં તે પરિકલ્પયામિ હેરમ્બ વૈ દન્તવિશુદ્ધિમેવમ્ ।
વસ્ત્રેણ સમ્પ્રોઞ્છ્ય મુખારવિન્દં દેવં સભાયાં વિનિવેશયામિ ॥ ૩॥

દ્વિજાદિસર્વૈરભિવન્દિતં ચ શુકાદિભિર્મોદસુમોદકાદ્યૈઃ ।
સમ્ભાષ્ય ચાલોક્ય સમુત્થિતં તં સુમણ્ડપં કલ્પ્ય નિવેશયામિ ॥ ૪॥

રત્નૈઃ સુદીપ્તૈઃ પ્રતિબિમ્બિતં તં પશ્યામિ ચિત્તેન વિનાયકં ચ ।
તત્રાસનં રત્નસુવર્ણયુક્તં સઙ્કલ્પ્ય દેવં વિનિવેશયામિ ॥ ૫॥

સિદ્ધ્યા ચ બુદ્ધ્યા સહ વિઘ્નરાજ પાદ્યં કુરુ પ્રેમભરેણ સર્વૈઃ ।
તોયં સુવાસૈ રચિતં ગૃહાણ ચિત્તેન દત્તં ચ સુખોષ્ણભાવમ્ ॥ ૬॥

શુદ્ધેન વસ્ત્રેણ ગણેશ પાદૌ સમ્પ્રોઞ્છ્ય દૂર્વાદિભિરર્ચયામિ ।
ચિત્તેન ભાવપ્રિય દીનબન્ધો ચિત્તં વિલીનં કુરુ તે પદાબ્જે ॥ ૭॥

કર્પૂરકૈલાદિસુવાસિતં તુ સુકલ્પિતં તોયમથો ગૃહાણ ।

આચમ્ય તેનૈવ ગજાનન ત્વં કૃપાકટાક્ષેણ વિલોકયાઽઽશુ ॥ ૮॥

પ્રવાલમુક્તાફલહારકાદ્યૈઃ સુસંસ્કૃતં હ્યન્તરભાવકેન ।
અનર્ઘ્યમર્ઘ્યં સફલં કુરુષ્વ મયા પ્રદત્તં ગણરાજ ઢુણ્ઢે ॥ ૯॥

શુદ્ધં ત્રિયુક્તં મધુપર્કમાદ્યં સઙ્કલ્પિતં ભાવયુતં ગૃહાણ ।
તોયેન ચાચમ્ય વિનાયક ત્વં ભક્તાંશ્ચ ભક્તેશ સુરક્ષયાશુ ॥ ૧૦॥

દ્રવ્યૈર્યુતં ચમ્પકજાતિકાદ્યૈઃ તૈલં મયા કલ્પિતમેવ ઢુણ્ઢે ।
દત્તં ગૃહાણાઽઽશુ વિમર્દયામિ સર્વાઙ્ગમાનન્દદ સેવનાય ॥ ૧૧॥

(Page ખં. ૫ અ. ૩૮ પાન ૮૯)
દેવં સુખોષ્ણેન જલેન ચાઽહં સર્વાદ્યતીર્થાહૃતકેન ઢુણ્ઢિમ્ ।
ચિત્તેન શુદ્ધેન ચ સ્નાપયામિ સ્નાનં મયા દત્તમથો ગૃહાણ ॥ ૧૨॥

તતઃ પયઃસ્નાનમચિન્ત્યભાવ ગૃહાણ તોયસ્ય તથા ગણેશ ।
પુનર્દધિસ્નાનમનામય ત્વં પ્રકલ્પિતં નાથ જલસ્ય ચાથ ॥ ૧૩॥

તતો ઘૃતસ્નાનમપારવન્દ્ય સુતીર્થજં વિઘ્નહર પ્રસીદ ।
ગૃહાણ ચિત્તેન સુકલ્પિતં તુ તતો મધુસ્નાનમથો જલસ્ય ॥ ૧૪॥

સુશર્કરાયુક્તમથો ગૃહાણ સ્નાનં મયા કલ્પિતમેવ ઢુણ્ઢે ।
તતો જલસ્નાનમઘાપહન્તર્ગણેશ માયાભ્રમવારણાશુ ॥ ૧૫॥

સુયક્ષપઙ્કસ્થમથો ગૃહાણ સ્નાનં પરેશાધિપતે તતશ્ચ ।
કમણ્ડલૌ સમ્ભવજં કુરુષ્વ સ્નાનં વિશુદ્ધં પરિકલ્પિતં તે ॥ ૧૬॥

દુગ્ધેન સૂક્તૈર્મનસા સુતીર્થૈઃ સમ્પૂજ્ય દૂર્વાદિભિરલ્પભાવૈઃ ।
સઙ્ખ્યાતિગૈર્મણ્ડલભૂતબ્રાહ્મણસ્પત્યકૈસ્ત્વામભિષેચયામિ ॥ ૧૭॥

તતઃ સુવસ્ત્રેણ તુ પ્રોઞ્છનં ત્વં ગૃહાણ ચિત્તેન મયા સુકલ્પિતમ્ ।
તતો વિશુદ્ધેન જલેન ચાચાન્તમેવ ઢુણ્ઢે કુરુ વિઘ્નરાજ ॥ ૧૮॥

અગ્નૌ વિશુદ્ધે પ્રગૃહાણ વસ્ત્રે મૌલ્યાતિગે તે મનસા મયા વૈ ।
દત્તે પરિચ્છાદ્ય નિજાત્મદેહં તાભ્યાં મયૂરેશ જનાંશ્ચ પાલય ॥ ૧૯॥

આચમ્ય વિઘ્નેશ પુનસ્ત્વમેવં ચિત્તેન દત્તં સુખમુત્તરીયમ્ ।
ભક્ત્યા ગૃહાણ પ્રતિપાલયાઽઽશુ નભો યથા તારકસંયુતં કિમ્ ॥ ૨૦॥

યજ્ઞોપવીતં ત્રિગુણસ્વરૂપં સૌવર્ણમેવં હ્યહિનાથભૂતમ્ ।
ભાવેન દત્તં ગણનાથ તત્ત્વં સૌત્રં ગૃહાણોદ્ધૃતિકારણાય ॥ ૨૧॥

આચાન્તમેવં મનસા કુરુષ્વ દત્તં મયા તીર્થજલેન ઢુણ્ઢે ।
ભાવેન કામણ્ડલવેન પાહિ વિશ્વં પ્રભો ખેલકૃતં સદા તે ॥ ૨૨॥

ઉદ્યદ્દિનેશાભમથો ગૃહાણ સિન્દૂરકં તે મનસા પ્રદત્તમ્ ।
સર્વાઙ્ગસંલેપનમાદરાત્ત્વં હેરમ્બ ચિત્તેન કુરુષ્વ પૂર્ણમ્ ॥ ૨૩॥

સાહસ્રશીર્ષં મનસા મયા ત્વં દત્તં કિરીટં તુ સુવર્ણજં વૈ ।
અનન્તરત્નૈઃ ખચિતં ગૃહાણ બ્રહ્મેશ તે મસ્તકશોભનાય ॥ ૨૪॥

વિચિત્રરત્નૈઃ કનકેન ઢુણ્ઢે યુતાનિ ચિત્તેન મયા પરેશ ।
દત્તાનિ નાનાપદકુણ્ડલાનિ ગૃહાણ શૂર્પશ્રુતિભૂષણાય ॥ ૨૫॥

શુણ્ડાવિભૂષાર્થમનન્તખેલિન્ સુવર્ણજં કઞ્ચુકમાગૃહાણ ।
રત્નૈશ્ચ યુક્તં મનસા મયા યદ્દત્તં પ્રભો તત્ સફલં કુરુષ્વ ॥ ૨૬॥

સુવર્ણરત્નૈશ્ચ યુતાનિ સમ્પ્રકલ્પ્યૈકદન્તાભરણાનિ ઢુણ્ઢે ।
ગૃહાણ ચૂડાકૃતિની પરેશ સમર્પિતે તે રદશોભનાર્થમ્ ॥ ૨૭॥

રત્નૈઃ સુવર્ણેન કૃતાનિ યાનિ ચત્વારિસઙ્કલ્પ્ય ગૃહાણ તાનિ ।
સમ્ભૂષય ત્વં કટકાનિ નાથ ચતુર્ભુજેષુ હ્યજ વિઘ્નહારિન્ ॥ ૨૮॥

વિચિત્રરત્નૈઃ ખચિતં સુવર્ણસમ્ભૂતકં ગૃહ્ય મયા પ્રદત્તમ્ ।
તથાઙ્ગુલિષ્વેવ યદઙ્ગુલીયં ગણેશ સંશોભય તત્પરેશ ॥ ૨૯॥

રત્નૈર્વિચિત્રૈઃ ખચિતાનિ ઢુણ્ઢે કેયૂરકાણિ હ્યથ કલ્પિતાનિ ।
સુવર્ણજાનિ પ્રમથાધિનાથ ગૃહાણ દત્તાનિ તુ બાહુષુ ત્વમ્ ॥ ૩૦॥

પ્રવાલમુક્તાફલરત્નજાસ્ત્વં સૌવર્ણસૂત્રૈશ્ચ ગૃહાણ કણ્ઠે ।
ચિત્તેન દત્તા વિવિધાશ્ચ માલા હૃદ્યોદરે શોભય વિઘ્નરાજ ॥ ૩૧॥

(Page ખં. ૫ અ. ૩૮ પાન ૯૦)
ચન્દ્રં લલાટે ગણનાથ પૂર્ણં વૃદ્ધિક્ષયાભ્યાં તુ વિહીનમાદ્યમ્ ।
સંશોભય ત્વં વરસંયુતં તે ભક્તિપ્રિયત્વં પ્રકટીકુરુષ્વ ॥ ૩૨॥

ચિન્તામણિં ચિન્તિતદં પરેશ હૃદ્દેશગં કાન્તિમયં કુરુષ્વ ।
મણિં સદાનન્દસુખપ્રદં ચ વિઘ્નેશ દીનાનથ પાલયસ્વ ॥ ૩૩॥

નાભૌ ફણીશં ચ સહસ્રશીર્ષં સંવેષ્ટનૈવ ગણાધિનાથ ।
ભક્તં સુભૂષં કુરુ ભૂષણેન દત્તં વરં તં સફલં પરેશ ॥ ૩૪॥

દેશે કટૌ રત્નસુવર્ણયુક્તાં કાઞ્ચીં સુચિત્તેન ચ ધારયામિ ।
વિઘ્નેશ જ્યોતિર્ગણદીપિનીં તે પાહિ પ્રભક્તં કુરુ માં દયાબ્ધે ॥ ૩૫॥

ગણેશ તે રત્નસુવર્ણયુક્તે મઞ્જીરકે નૂપુરકે તથૈવ ।
સુકિઙ્કિણીનાદયુતે સુબુદ્ધ્યા સુપાદયોઃ શોભય મે પ્રદત્તે ॥ ૩૬॥

ઇત્યાદિ નાનાવિધભૂષણાનિ ભક્તેચ્છયા માનસકલ્પિતાનિ ।
સુભૂષયામ્યેવ તવાઙ્ગકેષુ રત્નાદિધાતુપ્રભવાણિ ઢુણ્ઢે ॥ ૩૭॥

સુચન્દનં રક્તમમોઘવીર્યં સુઘર્ષિતં હ્યષ્ટસુગન્ધમુખ્યૈઃ ।
મયા યુતં કલ્પિતમેકદન્ત ગૃહાણ તે ત્વઙ્ગવિલેપનાર્થમ્ ॥ ૩૮॥

લિપ્તેષુ વૈચિત્ર્યમથાષ્ટગન્ધૈરઙ્ગેષુ તેઽહં પ્રકરોમિ ચિત્રમ્ ।
માં પાહિ ચિત્તેન વિનાયક ત્વં રક્તં તતો વર્તુલમેવ ભાલે ॥ ૩૯॥

આજ્યેન વૈ કુઙ્કુમકેન રક્તાન્ સૂક્ષ્માક્ષતાંસ્તે પરિકલ્પયામિ ।
ભાલે ગણાધ્યક્ષ ગૃહાણ પાહિ ભક્તાન્ સુભક્તિપ્રિય દીનબન્ધો ॥ ૪૦॥

ગૃહાણ ભોશ્ચમ્પકમાલતીસ્થલપઙ્કજાન્યમ્બુજપઙ્કજાનિ ।
મયા પ્રદત્તાનિ ચ મલ્લિકાશ્ચ ગણેશ પુષ્પાણિ ચ રક્તકાનિ ॥ ૪૧॥

પુષ્પોપરિ ત્વં મનસા ગૃહાણ હેરમ્બ મન્દારશમીદલાનિ ।
દત્તાનિ ચિત્તેન સુકલ્પિતાનિ સઙ્ખ્યાતિગાનિ પ્રણવાકૃતે તે ॥ ૪૨॥

દૂર્વાઙ્કુરાન્ વૈ મનસા પ્રદત્તાન્ પઞ્ચત્રિપત્રાન્વિતકાર્દ્રભૂતાન્ ।
શ્વેતાંશ્ચ વિઘ્નેશ્વર સઙ્ખ્યયા ત્વં હીનાંશ્ચ સર્વોપરિ સઙ્ગૃહાણ ॥ ૪૩॥

દશાઙ્ગભૂતં મનસા મયા તે ધૂપં પ્રદત્તં ગણરાજ ચાગ્નૌ ।
માં પાહિ સૌરભ્યકરં પરેશ સિદ્ધ્યા ચ બુદ્ધ્યા સહ સઙ્ગૃહાણ ॥ ૪૪॥

દીપં સુવર્ત્યાયુતમાદરાત્તે દત્તં મયા માનસકં ગૃહાણ ।
વિઘ્નેશ કર્પૂરભવં ગૃહાણ તૈલાદિસમ્ભૂતમમોઘદૃષ્ટે ॥ ૪૫॥

ભોજ્યં તુ લેહ્યં ગણરાજ પેયં ચોષ્યં ચ નાનાવિધષડ્રસાઢ્યમ્ ।
હેરમ્બ નૈવેદ્યમથો ગૃહાણ સઙ્કલ્પિતં પુષ્ટિપતે હ્યપારમ્ ॥ ૪૬॥

સુવાસિતં ભોજનમધ્યભાગે જલં મયા દત્તમથો ગૃહાણ ।
સદાત્મતીર્થં મનસા ગણેશ પિબસ્વ વિશ્વાદિકતૃપ્તિકારિન્ ॥ ૪૭॥

તતઃ કરોદ્વર્તનકં ગૃહાણ સુગન્ધયુક્તં મુખમાર્જનાય ।
સુવાસિતેનૈવ સુતીર્થજેન સુકલ્પિતં ભક્તિયુતં ચ ઢુણ્ઢે ॥ ૪૮॥

આચમ્ય સર્વેશ સુવાસિતં ચ દત્તં મયા તીર્થજલં પિબસ્વ ।
સઙ્કુલ્પ્ય વિઘ્નેશ તતઃ પરં તે સમ્પ્રોઞ્છનં હસ્તમુખે કરોમિ ॥ ૪૯॥

દ્રાક્ષાદિરમ્ભાફલચૂતકાનિ ખર્જૂરકર્કન્ધુકદાડિમાનિ ।
સ્વાદેન યુક્તાનિ મયા ગૃહાણ સઙ્કુલ્પ્ય દત્તાનિ ફલાનિ ઢુણ્ઢે ॥ ૫૦॥

પુનર્જલેનૈવ કરાદિકં ક્ષાલયામિ તેઽહં મનસા ગણેશ ।
સુવાસિતં તોયમથો પિબસ્વ મયા પ્રદત્તં મનસા પરેશ ॥ ૫૧॥

અષ્ટાઙ્ગયુક્તં ગણનાથ દત્તં તામ્બૂલકં તે મનસા મયા વૈ ।
(Page ખં. ૫ અ. ૩૮ પાન ૯૧)
સુકલ્પ્ય વિઘ્નેશ્વર સઙ્ગૃહાણ નાથાસકૃત્તુણ્ડવિશોધનાર્થમ્ ॥ ૫૨॥

તતો મયા કલ્પિતકે ગણેશ મહાસને રત્નસુવર્ણયુક્તે ।
શમીશકાર્પાસકયુક્તવસ્ત્રૈરનર્ઘ્યસઞ્છાદિતકે પ્રસીદ ॥ ૫૩॥

ભક્ત્યા ત્વદીયાવરણં પરેશ સમ્પૂજયામિ મનસા યથાવત્ ।
નાનોપચારૈઃ પરમપ્રિયૈસ્તુ ત્વત્પ્રીતિકામાર્થમનાથબન્ધો ॥ ૫૪॥

ગૃહાણ લમ્બોદર દક્ષિણાં તામસઙ્ખ્યભૂતાં મનસા પ્રદત્તામ્ ।
સુવર્ણરત્નાદિકમુખ્યભૂતાં પ્રભો જગત્કૃસ્નમિદં સુપાહિ ॥ ૫૫॥

રાજોપચારાન્વિવિધાન્ ગૃહાણ છત્રાશ્વહસ્ત્યાદિકમાદરાદ્વૈ ।
ચિત્તેન દત્તાન્ ગણનાથ ઢુણ્ઢે હ્યપારસઙ્ખ્યાન્ સ્થિરજઙ્ગમાંસ્તે ॥ ૫૬॥

દાનસ્ય નાનાવિધરૂપકાંસ્તે દત્તાન્ મયા વૈ મનસા ગૃહાણ ।
ગોભૂમિકાદ્યાન્ સ્થિરજઙ્ગમાંશ્ચ હેરમ્બ માં તારય મોહભાવાત્ ॥ ૫૭॥

મન્દારપુષ્પાણિ શમીદલાનિ દૂર્વાઙ્કુરાંસ્તે મનસા દદામિ ।
હેરમ્બ લમ્બોદર દીનપાલ સઙ્ગૃહ્ય ભક્તં કુરુ માં પદસ્તે ॥ ૫૮॥

તતો હરિદ્રામબિરં ગુલાલં સિન્દૂરકં તે પરિકલ્પયામિ ।
સુવાસિતં વસ્તુ સુવાસભૂતૈર્ગૃહાણ બ્રહ્મેશ્વર શોભનાર્થમ્ ॥ ૫૯॥

તતઃ શુકાદ્યાઃ શિવવિષ્ણુમુખ્યામરાધિપાઃ શેષમુખાસ્તથાન્યે ।
મુનીન્દ્રકાઃ સેવકભાવયુક્તાઃ સભાસનસ્થં પ્રણમન્તિ ઢુણ્ઢિમ્ ॥ ૬૦॥

વામાઙ્ગકે ભક્તિયુતા ગણેશં સિદ્ધિશ્ચ નાનાવિધસિદ્ધિભિસ્તમ્ ।
અત્યન્તભાવેન સુસેવતે તુ માયાસ્વરૂપા પરમાર્થભૂતા ॥ ૬૧॥

બ્રહ્મેશ્વરં દક્ષિણભાગસંસ્થા બુદ્ધિઃ કલાભિશ્ચ સુબોધિકાભિઃ ।
વિદ્યાભિરેવં ભજતે પરેશા માયા સુસાઙ્ખ્યપ્રદચિત્તરૂપા ॥ ૬૨॥

પ્રમોદમુખ્યાઃ પ્રભુપૃષ્ઠભાગે ગણેશ્વરં ભાવયુતા ભજન્તે ।
ભક્તેશ્વરા મુદ્ગલશમ્ભુમુખ્યાઃ શુકાદયસ્તં સ્મ પુરો ભજન્તે ॥ ૬૩॥

ગન્ધર્વમુખ્યા મધુરં જગુશ્ચ વિશ્વેશગીતં વિવિધસ્વરૂપમ્ ।
નૃત્યં કલાયુક્તમથો પુરસ્તાચ્ચક્રુસ્તથા હ્યપ્સરસો વિચિત્રમ્ ॥ ૬૪॥

ઇત્યાદિ નાનાવિધભાવયુક્તૈઃ સંસેવિતં વિઘ્નપતિં ભજામિ ।
ચિત્તેન ધ્યાત્વા તુ નીરાજનં વૈ કરોમિ નાનાવિધદીપયુક્તમ્ ॥ ૬૫॥

ચતુર્ભુજં પાશધરં ગણેશં તથાઽઙ્કુશં વૈ દધતં ચ દન્તમ્ ।
ત્રિનેત્રયુક્તં હ્યભયન્ધરં તં મહોદરં ચૈકરદં ગજાસ્યમ્ ॥ ૬૬॥

સર્પોપવીતં ગજકર્ણધારં વિભૂતિભિઃ સેવિતપાદપદ્મમ્ ।
ધ્યાયે ગણેશં વિવિધપ્રકારૈઃ સમ્પૂજિતં શક્તિયુતં પરેશમ્ ॥ ૬૭॥

તતો જપં વૈ મનસા કરોમિ સ્વમૂલમન્ત્રસ્ય વિધાનયુક્તમ્ ।
અસઙ્ખ્યભૂતં ગણરાજહસ્તે સમર્પયામ્યેવ ગૃહાણ ઢુણ્ઢે ॥ ૬૮॥

આરાર્તિકં ત્વેતદપારદીપં કર્પૂરભૂતં પ્રકરોમિ પૂર્ણમ્ ।
ચિત્તેન લમ્બોદર તત્ ગૃહાણ હ્યજ્ઞાનધ્વાન્તાઘહરં નિજાનામ્ ॥ ૬૯॥

ગણેશ વૈઘ્નેશ્વરકૈઃ સુમન્ત્રૈઃ સુમન્ત્રિતં પુષ્પદલપ્રભૂતમ્ ।
ગૃહાણ ચિત્તેન મયા પ્રદત્તમપારવૃત્ત્યા ત્વથ મન્ત્રપુષ્પમ્ ॥ ૭૦॥

અનન્તવૃત્ત્યા સ્તુતિમેકદન્ત વિઘ્નેશ ચિત્તેન કૃતાં ગૃહાણ ।
યુક્તાં શ્રુતિસ્માર્તભવૈઃ પુરાણૈઃ સર્વૈઃ પરેશાધિપતે મયા વૈ ॥ ૭૧॥

પ્રદક્ષિણા માનસકલ્પિતાસ્તા ગૃહાણ લમ્બોદર ભાવયુક્તાઃ ।
(Page ખં. ૫ અ. ૩૮ પાન ૯૨)
અસઙ્ખ્યભૂતા વિવિધસ્વરૂપા દાસાન્ સદા રક્ષ ભવાર્ણવાદ્વૈ ॥ ૭૨॥

નતિં તતો વિઘ્નપતે ગૃહાણ સાષ્ટાઙ્ગકાદ્યાં વિવિધસ્વરૂપામ્ ।
સઙ્ખ્યાવિહીનાં મનસા કૃતાં તે સિદ્ધ્યા ચ બુદ્ધ્યા પરિપાલયાશુ ॥ ૭૩॥

ન્યૂનાતિરિક્તં તુ મયા કૃતં ચેદં તે તદર્થં મનસા ગૃહાણ ।
દૂર્વાઙ્કુરાન્ વિઘ્નપતે પ્રદત્તાન્ સમ્પૂર્ણમેવં કુરુ પૂજનં મે ॥ ૭૪॥

ક્ષમસ્વ વિઘ્નાધિપતે મદીયાન્ સદાઽપરાધાન્ વિવિધસ્વરૂપાન્ ।

મદીયભક્તિં સફલાં કુરુષ્વ સમ્પ્રાર્થયેઽહં મનસા ગણેશ ॥ ૭૫॥

મહ્યં પ્રસન્નેન ગજાનનેન દત્તં પ્રસાદં ચ શિરોભિવન્દ્યમ્ ।
સ્વમસ્તકે તં પરિધારયામિ ચિત્તેન વિઘ્નેશ્વરમાનતોઽસ્મિ ॥ ૭૬॥

ગણેશ ઉત્થાય સભાં વિહાય ગતસ્તતસ્ત્વન્તરધામશક્તયા ।
શિવાદયસ્તં પ્રણિપત્ય સર્વે ગતાઃ સુચિત્તેન ચ ચિન્તયામિ ॥ ૭૭॥

સર્વાન્નમસ્કૃત્ય તતો ભજામિ ચિત્તેન ભક્ત્યા ચ ગણાધિપં તમ્ ।
સ્વસ્થાનમાગત્ય મહાનુભાવૈર્ભક્તૈર્ગણેશસ્ય ચ ખેલયામિ ॥ ૭૮॥

એવં ત્રિકાલેષુ ગણાધિપં તં ચિત્તેન નિત્યં પરિપૂજયામિ ।
તેનૈવ તુષ્ટઃ પ્રદદાતુ ભાવં વિઘ્નેશ્વરો ભક્તિમયં મહાન્તમ્ ॥ ૭૯॥

વિઘ્નેશપાદોદકપાનકં મે તત્ત્યક્તગન્ધસ્ય સુલેપનં તુ ।
નિર્માલ્યસન્ધારણકં સુભોજ્યં લમ્બોદરસ્યાસ્તુ હિ ભુક્તશેષમ્ ॥ ૮૦॥

કરોમિ યદ્યચ્ચ તદેવ દીક્ષા ગણેશ્વરસ્યાસ્તુ સદા પરેશ ।
પ્રસીદ નિત્યં તવ પાદભક્તં કુરુષ્વ માં બ્રહ્મપતે દયાલો ॥ ૮૧॥

શય્યામનર્ઘાં પરિકલ્પયામિ મન્દારકાર્પાસકવસ્ત્રયુક્તામ્ ।
નાનાસુપુષ્પાદિભિરર્ચિતાં તે વિઘ્નેશ નિદ્રાં કુરુ સઙ્ગૃહાણ ॥ ૮૨॥

સિદ્ધ્યા ચ બુદ્ધ્યા સહિતં ગણેશં સુનિદ્રિતં વીક્ષ્ય તથાઽહમેવ ।
ગત્વા સ્વવાસં ચ કરોમિ નિદ્રાં ધ્યાત્વા હૃદિ બ્રહ્મપતિં તદીયઃ ॥ ૮૩॥

એતાદૃશં સૌખ્યમમોઘશક્તે દેહીશ યન્ માનસજં ગણેશ ।
મહ્યં ચ તેનૈવ કૃતાર્થરૂપો ભવામિ ભક્તે રસલાલસોઽહમ્ ॥ ૮૪॥

ગાર્ગ્ય ઉવાચ ।
એવં નિત્યં મહારાજ ગૃત્સમદો મહાયશાઃ ।
ચકાર માનસીં પૂજાં યોગીન્દ્રાણાં ગુરુઃ સ્વયમ્ ॥ ૮૫॥

ય એતાં માનસીં પૂજાં કરિષ્યતિ નરોત્તમઃ ।
પઠિષ્યતિ સદા સોઽપિ ગાણપત્યો ભવિષ્યતિ ॥ ૮૬॥

શ્રાવયિષ્યતિ યો મર્ત્યઃ શ્રોષ્યતે ભાવસંયુતઃ ।
સ ક્રમેણ મહીપાલ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૮૭॥

યદ્યદિચ્છતિ તત્તદ્વૈ સફલં તસ્ય જાયતે ।
અન્તે સ્વાનન્દગઃ સોઽપિ યોગિવન્દ્યો ભવિષ્યતિ ॥ ૮૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગૃત્સમદપ્રોક્તમાનસપૂજાકથનં નામાષ્ટત્રિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૮
(Page ખં. ૫ અ. ૩૯ પાન ૯૩)

## ૫.૩૯ ગૃત્સમદપ્રોક્તબાહ્યપૂજાવર્ણનં નામૈકોનચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ઐલ ઉવાચ ।
બાહ્યાં પૂજાં ગૃત્સમદકીર્તિતાં વદ મે વિભો ।
તેન માર્ગેણ વિઘ્નેશં ભજિષ્યામિ નિરન્તરમ્ ॥ ૧॥

ગાર્ગ્ય ઉવાચ ।
આદૌ ચ માનસીં પૂજાં કૃત્વા ગૃત્સમદો મુનિઃ ।
ચકાર વિધિવદ્બાહ્યાં તાં શ◌ૃણુષ્વ સુખપ્રદામ્ ॥ ૨॥

હૃદિ ધ્યાત્વા ગણેશાનં પરિવારાદિસંયુતમ્ ।
નાસિકારન્ધ્રમાર્ગેણ બાહ્યગં તં ચકાર સઃ ॥ ૩॥

આદૌ વૈદિકમન્ત્રં સ ગણાનાં ત્વેતિ સમ્પઠન્ ।
પશ્ચાત્ શ્લોકં સમુચ્ચાર્ય પૂજયામાસ વિઘ્નપમ્ ॥ ૪॥

ગૃત્સમદ ઉવાચ ।
ચતુર્બાહું ત્રિનેત્રં ચ ગજાસ્યં રક્તવર્ણકમ્ ।
પાશાઙ્કુશાદિસંયુક્તં માયાયુક્તં પ્રચિન્તયે ॥ ૫॥

આગચ્છ બ્રહ્મણાં નાથ સુરાસુરવરાર્ચિત ।
સિદ્ધિબુદ્ધ્યાદિસંયુક્ત ભક્તિગ્રહણલાલસ ॥ ૬॥

કૃતાર્થોઽહં કૃતાર્થોઽહં તવાગમનતઃ પ્રભો ।
વિઘ્નેશાનુગૃહીતોઽહં સફલો મે ભવો ભવેત્ ॥ ૭॥

રત્નસિંહાસનં સ્વામિન્ ગૃહાણ ગણનાયક ।
તત્રોપવિશ્ય વિઘ્નેશ રક્ષ ભક્તાન્ વિશેષતઃ ॥ ૮॥

સુવાસિતાભિરદ્ભિશ્ચ પાદપ્રક્ષાલનં પ્રભો ।
શીતોષ્ણાભિસ્તે કરોમિ ગૃહાણ પાદ્યમુત્તમમ્ ॥ ૯॥

સર્વતીર્થાહૃતં તોયં સુવાસિતં સુવસ્તુભિઃ ।
આચમનં ચ તેનૈવ કુરુષ્વ ગણનાયક ॥ ૧૦॥

રત્નપ્રવાલમુક્તાદ્યૈરનર્ઘૈઃ સંસ્કૃતં પ્રભો ।
અર્ઘ્યં ગૃહાણ હેરમ્બ દ્વિરદાનન તોષકમ્ ॥ ૧૧॥

દધિમધુઘૃતૈર્યુક્તં મધુપર્કં ગજાનન ।
ગૃહાણ ભાવસંયુક્તં મયા દત્તં નમોઽસ્તુ તે ॥ ૧૨॥

પાદ્યે ચ મધુપર્કે ચ સ્નાને વસ્ત્રોપધારણે ।
ઉપવીતે ભોજનાન્તે પુનરાચમનં કુરુ ॥ ૧૩॥

ચમ્પકાદ્યૈર્ગણાધ્યક્ષ વાસિતં તૈલમુત્તમમ્ ।
અભ્યઙ્ગં કુરુ સર્વેશ લમ્બોદર નમોઽસ્તુ તે ॥ ૧૪॥

યક્ષકર્દમકાદ્યૈશ્ચ વિઘ્નેશ ભક્તવત્સલ ।
ઉદ્વર્તનં કુરુષ્વ તં મયા દત્તૈર્મહાપ્રભો ॥ ૧૫॥

નાનાતીર્થજલૈર્ઢુણ્ઢે સુખોષ્ણભાવરૂપકૈઃ ।
કમણ્ડલૂદ્ભવૈઃ સ્નાનં મયા કુરુ સમર્પિતૈઃ ॥ ૧૬॥

કામધેનુસમુદ્ભૂતં પયઃ પરમપાવનમ્ ।
તેન સ્નાનં કુરુષ્વ ત્વં હેરમ્બ પરમાર્થવિત્ ॥ ૧૭॥

પઞ્ચામૃતસ્ય મધ્યે તુ જલસ્નાનં પુનઃ પુનઃ ।
કુરુ ત્વં સર્વતીર્થેન બ્રહ્મકમણ્ડલૂદ્ભવૈઃ ॥ ૧૮॥

દધિધેનુપયોભૂતં મલાપહરણં પરમ્ ।
ગૃહાણ સ્નાનકાર્યાર્થં વિનાયક દયાનિધે ॥ ૧૯॥

સન્તોષકારકં ઢુણ્ઢે ઘૃતં ધેનુસમુદ્ભવમ્ ।
મહામલાપઘાતાર્થં તેન સ્નાનં કુરુષ્વ ભોઃ ॥ ૨૦॥

પૂર્ણં મધુરસોદ્ભૂતં સરઘાસંસ્કૃતં મધુ ।
ગૃહાણ સ્નાનકાર્યાર્થં વિનાયક નમોઽસ્તુ તે ॥ ૨૧॥

ઇક્ષો રસસમુદ્ભૂતાં શર્કરાં મલનાશિનીમ્ ।
ગૃહાણ ગણનાથ ત્વં તયા સ્નાનં સમાચર ॥ ૨૨॥

યક્ષકર્દમકાદ્યૈશ્ચ સ્નાનં કુરુ ગણેશ્વર ।
આન્ત્યં મલહરં શુદ્ધં સર્વસૌગન્ધ્યકારકમ્ ॥ ૨૩॥

તતો ગન્ધાક્ષતાદીન્ દૂર્વાં કુરાંશ્ચ ગજાનન ।
સમર્પયામિ સ્વલ્પાંસ્ત્વં ગૃહાણ પરમેશ્વર ॥ ૨૪॥

બ્રાહ્મણસ્પત્યસૂક્તૈશ્ચ હ્યેકવિંશતિવારકૈઃ ।
અભિષેકં તે કરોમિ ગૃહાણ દ્વિરદાનન ॥ ૨૫॥

તીર્થૈરાચમનં દેવ સુવસ્ત્વભિસુવાસિતૈઃ ।
કુરુષ્વ ગણનાથ ત્વં સર્વતીર્થભવેન વૈ ॥ ૨૬॥

(Page ખં. ૫ અ. ૩૯ પાન ૯૪)
વસ્ત્રયુગ્મે ગૃહાણ ત્વમનર્ઘે રક્તવર્ણકે ।
લોકલજ્જાહરાયૈવ વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૨૭॥

ઉત્તરીયં સુચિત્રં તે નભસ્તારાઙ્કિતં યથા ।
ગૃહાણ સર્વસિદ્ધીશ મયા દત્તં સુભક્તિતઃ ॥ ૨૮॥

ઉપવીતં ગણાધ્યક્ષ ગૃહાણ ત્વં તતઃ પરમ્ ।
ત્રૈગુણ્યમયરૂપં તુ પ્રણવગ્રન્થિબન્ધનમ્ ॥ ૨૯॥

તતઃ સિન્દૂરકં દેવ ગૃહાણ ગણનાયક ।
અઙ્ગલેપનભાવાર્થં સદાનન્દવિવર્ધન ॥ ૩૦॥

ભૂષણાનિ વિચિત્રાણિ સર્વાઙ્ગે ભૂષણાય તે ।
સુવર્ણરત્નકાદ્યૈશ્ચ નિર્મિતાનિ ગૃહાણ ભોઃ ॥ ૩૧॥

અષ્ટગન્ધં સમાયુક્તં ગન્ધં રક્તં ગજાનન ।
દ્વાદશાઙ્ગેષુ તે ઢુણ્ઢે લેપયામિ સુચિત્રવત્ ॥ ૩૨॥

રક્તચન્દનસંયુક્તાનથવા કુઙ્કુમૈર્યુતાન્ ।
ગણરાજ ગૃહાણ ત્વમક્ષતાન્ ભાલમણ્ડલે ॥ ૩૩॥

કહ્લારચમ્પકાદીનિ રક્તાનિ ચ ગજાનન ।
પુષ્પાણિ શમીમન્દારદૂર્વાદીનિ ગૃહાણ ચ ॥ ૩૪॥

દશાઙ્ગં ગુગ્ગુલું ધૂપં સર્વસૌરભકારકમ્ ।
ગૃહાણ ત્વં મયા દત્તં વિનાયક મહોદર ॥ ૩૫॥

નાનાજાતિભવં દીપં ગૃહાણ ગણનાયક ।
અજ્ઞાનં માનસં દોષં હરન્તં જ્યોતિરાત્મકમ્ ॥ ૩૬॥

ચતુર્વિધાન્નસમ્પન્નં મધુરં લડ્ડુકાદિકમ્ ।
નૈવેદ્યં તે મયા દત્તં ભોજનં કુરુ વિઘ્નપ ॥ ૩૭॥

સુવાસિતં ગૃહાણેદં જલં તીર્થસમાહૃતમ્ ।
ભુક્તિમધ્યે ચ પાનાર્થં દેવદેવેશ તે નમઃ ॥ ૩૮॥

ભોજનાન્તે કરોદ્વર્તં યક્ષકર્દમકેન ચ ।
કુરુષ્વ ત્વં ગણાધ્યક્ષ પિબ તોયં સુવાસિતમ્ ॥ ૩૯॥

ખર્જૂરં દાડિમં દ્રાક્ષાં રમ્ભાદીનિ ફલાનિ વૈ ।
ગૃહાણ દેવદેવેશ નાનામધુરકાણિ તુ ॥ ૪૦॥

અષ્ટાઙ્ગં દેવ તામ્બૂલં ગૃહાણ મુખવાસનમ્ ।
અસકૃદ્વિઘ્નરાજ ત્વં મયા દત્તં વિશેષતઃ ॥ ૪૧॥

દક્ષિણાં કાઞ્ચનાદ્યાં તુ નાનાધાતુસમુદ્ભવામ્ ।
રત્નાદ્યૈઃ સંયુતાં ઢુણ્ઢે ગૃહાણ સકલપ્રિય ॥ ૪૨॥

રાજોપચારકાદ્યાનિ ગૃહાણ ગણનાયક ।
દાનાનિ તુ વિચિત્રાણિ મયા દત્તાનિ વિઘ્નપ ॥ ૪૩॥

તત આવરણં તેઽથ પૂજયામિ વિધાનતઃ ।
ઉપચારૈશ્ચ વિવિધૈસ્તેન તુષ્ટો ભવ પ્રભો ॥ ૪૪॥

તતો દૂર્વાઙ્કુરાન્ ઢુણ્ઢે એકવિંશતિસઙ્ખ્યકાન્ ।
ગૃહાણ ન્યૂનસિદ્ધ્યર્થં ભક્તવાત્સલ્યકારણાત્ ॥ ૪૫॥

નાનાદીપસમાયુક્તં નીરાજનં ગજાનન ।
ગૃહાણ ભાવસંયુક્તં સર્વાજ્ઞાનવિનાશન ॥ ૪૬॥

ગણાનાં ત્વેતિ મન્ત્રસ્ય જપં સાહસ્રકં પરમ્ ।
ગૃહાણ ગણનાથ ત્વં સર્વસિદ્ધિપ્રદો ભવ ॥ ૪૭॥

કર્પૂરાદ્યાં મહાર્તિં ચ નાનાદીપમયીં પ્રભો ।
ગૃહાણ જ્યોતિષાં નાથ તયા નીરાજયામ્યહમ્ ॥ ૪૮॥

પાદયોસ્તે તુ ચત્વારિ નાભૌ દ્વે વદને પ્રભો ।
એકં તુ સપ્તવારં વૈ સર્વાઙ્ગેષુ નીરાજનમ્ ॥ ૪૯॥

ચતુર્વેદભવૈર્મન્ત્રૈર્ગાણપત્યૈર્ગજાનન ।
મન્ત્રિતાનિ ગૃહાણ ત્વં પુષ્પપત્રાણિ વિઘ્નપ ॥ ૫૦॥

ગાણપત્યૈઃ પઞ્ચવિધમયૈઃ સ્તોત્રૈર્ગણાધિપ ।
સ્તૌમિ ત્વાં તેન સન્તુષ્ટો ભવ ભક્તિપ્રદાયક ॥ ૫૧॥

એકવિંશતિસઙ્ખ્યાકાં ત્રિસઙ્ખ્યાં વા ગજાનન ।
પ્રદક્ષિણાં ગૃહાણ ત્વં બ્રહ્મબ્રહ્મેશભાવતઃ ॥ ૫૨॥

સાષ્ટાઙ્ગાં પ્રણતિં નાથ એકવિંશતિસમ્મિતામ્ ।
હેરમ્બ સર્વપૂજ્ય ત્વં ગૃહાણ તુ મયા કૃતામ્ ॥ ૫૩॥

(Page ખં. ૫ અ. ૩૯ પાન ૯૫)
ન્યૂનાતિરિક્તભાવાર્થં કાઞ્ચિત્ દૂર્વાઙ્કુરાન્ પ્રભો ।
સમર્પયામિ તેન ત્વં સાઙ્ગાં પૂજાં કુરુષ્વ મે ॥ ૫૪॥

ત્વયા દત્તં સ્વહસ્તેન નિર્માલ્યં ચિન્તયામ્યહમ્ ।
શિખાયાં ધારયામ્યેવ સદા સર્વપ્રદં ચ તત્ ॥ ૫૫॥

અપરાધાનસઙ્ખ્યાતાન્ ક્ષમસ્વ ગણનાયક ।
ભક્તં કુરુ ચ માં ઢુણ્ઢે તવ પાદપ્રિયં સદા ॥ ૫૬॥

ત્વં માતા ત્વં પિતા ત્વં વૈ સુહૃત્ સમ્બન્ધિકાદયઃ ।
ત્વમેવ કુલદેવશ્ચ સર્વં ત્વં મે ન સંશયઃ ॥ ૫૭॥

જાગ્રત્સ્વપ્નસુષુપ્તિભિર્દેહવાઙ્માનસૈઃ કૃતમ્ ।
સાંસર્ગિકં ચ યત્ કર્મ ગણેશાય સમર્પયે ॥ ૫૮॥

બાહ્યં નાનાવિધં પાપં મહોગ્રં તલ્લયં વ્રજેત્ ।
ગણેશપાદતીર્થસ્ય મસ્તકે વન્દનાત્ કિલ ॥ ૫૯॥

પાદોદકં ગણેશસ્ય પીતં નરેણ તત્ક્ષણાત્ ।
સર્વાન્તર્ગતજં પાપં નશ્યતિ ગણનાતિગમ્ ॥ ૬૦॥

ગણેશોચ્છિષ્ટગન્ધં વૈ દ્વાદશાઙ્ગેષુ યોઽર્ચયેત્ ।
ગણેશતુલ્યરૂપઃ સ દર્શનાત્ સર્વપાપહા ॥ ૬૧॥

યદિ ગણેશપૂજાદૌ ગન્ધં ભસ્માદિકં ચરેત્ ।
ગણેશોચ્છિષ્ટગન્ધં તુ નોચેત્તત્ર વિધિં ચરેત્ ॥ ૬૨॥

દ્વાદશાઙ્ગેષુ વિઘ્નેશ નામમન્ત્રેણ ચાર્ચયેત્ ।
તેન સોઽપિ ગણેશસ્ય સમો ભવતિ ભૂતલે ॥ ૬૩॥

ગણેશ્વરં મૂર્ધ્નિ ચાદૌ લલાટે વિઘ્નનાયકમ્ ।
દક્ષિણે કર્ણમૂલે તુ વક્રતુણ્ડં સમર્ચયેત્ ॥ ૬૪॥

વામે કર્ણસ્ય મૂલે વૈ ચૈકદન્તં સમર્ચયેત્ ।
કણ્ઠે લમ્બોદરં દેવં હૃદિ ચિન્તામણિં તથા ॥ ૬૫॥

બાહૌ દક્ષિણકે ચૈવ હેરમ્બં વામબાહુકે ।
વિકટં નાભિદેશે તુ વિનાયકં સમર્ચયેત્ ॥ ૬૬॥

કુક્ષૌ દક્ષિણભાગે તુ મયૂરેશં સમર્ચયેત્ ।
વામકુક્ષૌ ગજાસ્યં વૈ પૃષ્ઠે સ્વાનન્દવાસિનમ્ ॥ ૬૭॥

સર્વાઙ્ગલેપનં શસ્તં ચિત્રિતં ગન્ધમષ્ટકૈઃ ।
ગાણેશાનાં વિશેષેણ સર્વભદ્રસ્ય કારણાત્ ॥ ૬૮॥

ભુક્તશેષં તુ નૈવેદ્યં ગણેશસ્ય ભુનજ્મ્યહમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં નાનાપાપનિકૃન્તનમ્ ॥ ૬૯॥

ગણેશસ્મરણેનૈવ કરોમિ કાલખણ્ડનમ્ ।
ગાણપત્યૈશ્ચ સંવાસો ગજાનન સદાઽસ્તુ મે ॥ ૭૦॥

ગાર્ગ્ય ઉવાચ ।
એવં ગૃત્સમદો વિપ્રશ્ચકાર બાહ્યપૂજનમ્ ।
ત્રિકાલેષુ મહાયોગી સદા ભક્તિસમન્વિતઃ ॥ ૭૧॥

તથા કુરુ મહીપાલ ગાણપત્યો ભવિષ્યસિ ।
યથા ગૃત્સમદઃ સાક્ષાત્તથા ત્વમપિ નિશ્ચિતમ્ ॥ ૭૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ગૃત્સમદપ્રોક્તબાહ્યપૂજાવર્ણનં નામૈકોનચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૩૯
(Page ખં. ૫ અ. ૪૦ પાન ૯૬)

## ૫.૪૦ સ્વાનન્દલોકવર્ણનં નામ ચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ઐલ ઉવાચ ।
શ્રુત્વા ગૃત્સમદસ્યૈવ ચરિતં સર્વદાયકમ્ ।
ન તૃપ્તોઽહં મહાયોગિન્ ભવામ્યમૃતપાનવત્ ॥ ૧॥

ન ગૃત્સમદતુલ્યં તુ પશ્યામિ બ્રહ્મગોલકે ।
ધન્યોઽયં યોગિનાં મધ્યે ગાણપત્યેષુ માનદ ॥ ૨॥

અધુના વદ યોગીશ ગણેશલોકવર્ણનમ્ ।
કીદૃશોઽયં ગણેશસ્ય નિજલોકો વિશેષતઃ ॥ ૩॥

ગાર્ગ્ય ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
મુદ્ગલસ્ય મુનેઃ સંવાદયુક્તં કપિલસ્ય વૈ ॥ ૪॥

એકદા મુદ્ગલો યોગી ગાણપત્યાગ્રણીર્નૃપ ।
જગામ કપિલસ્યૈવાશ્રમં ગઙ્ગાતટે સ્થિતમ્ ॥ ૫॥

પ્રણમ્ય સ જગાદાપિ કપિલં હર્ષસંયુતઃ ।
કૃત્વા કરપુટં ચાઙ્ગિરસ આદૌ વરાગ્રણીઃ ॥ ૬॥

મુદ્ગલ ઉવાચ ।
સાક્ષાદ્વિષ્ણુસ્વરૂપસ્ત્વં શુક્લ સર્વાર્થદાયક ।
ગાણપત્યેષુ મુખ્યસ્ત્વં સાઙ્ખ્યાનાં પરમા ગતિઃ ॥ ૭॥

ત્વદ્દર્શનજપુણ્યેન કૃતકૃત્યોઽહમઞ્જસા ।
કુલં ધન્યં યશો વિદ્યા જ્ઞાનં મે તેઽદ્ય દર્શનાત્ ॥ ૮॥

એવં વદન્તમત્યન્તં કપિલસ્તં નનામ ચ ।
પૂજયામાસ હર્ષેણ મુદ્ગલં ભાવભાવિતમ્ ॥ ૯॥

તતસ્તં કપિલો યોગી જગાદ વચનં હિતમ્ ।
તાત તે દર્શનેનાદ્ય પવિત્રોઽહં ચ સામ્પ્રતમ્ ॥ ૧૦॥

પૂર્ણભક્તસ્ત્વમેવૈકો ગણેશસ્ય મહામુને ।
સાક્ષાન્ મુદ્ગલ શસ્ત્રેશો ગાણેશો નાત્ર સંશયઃ ॥ ૧૧॥

યથા મુદ્ગરશસ્ત્રેણ ચૂર્ણયિત્વા પદાર્થકાન્ ।
નામરૂપવિહીનાંશ્ચ કુરુતે માનવઃ પરાન્ ॥ ૧૨॥

તથા ત્વયા મહાયોગિંસ્તપસા યોગસેવયા ।
અભિમાનઃ સમાચૂર્ણ્ય કૃતો મૂલવિવર્જિતઃ ॥ ૧૩॥

નાનાયોગિન એવં તં યોગેન સ્વાભિમાનકમ્ ।
ચૂર્ણયન્તિ મહાભાગ તથાપિ હૃદિ તિષ્ઠતિ ॥ ૧૪॥

તેન ત્વં મુદ્ગલો યોગી જગત્યેકો વિનિશ્ચિતમ ।
વયં ન તાદૃશા વત્સ હ્યેકમાર્ગસમાશ્રયાત્ ॥ ૧૫॥

ત્વદીયકૃત્યાઙ્ગિરસં પુરાણં સમ્ભવિષ્યતિ ।
સર્વેષાં માન્યમેકં તદ્યોગપ્રદં ન સંશયઃ ॥ ૧૬॥

અભિમાનેન યુક્તાનિ પુરાણાનિ વિશેષતઃ ।
શાસ્ત્રાણિ નાત્ર સન્દેહઃ કારણં શ◌ૃણુ મુદ્ગલ ॥ ૧૭॥

જ્ઞાતં ગુહ્યં તત્તથાપિ સઙ્ગોપ્ય સ્વમતં પુનઃ ।
સ્થાપયિત્વા વિશેષેણાઞ્જસા તથ્યં વદન્તિ તે ॥ ૧૮॥

ગણેશભક્તઃ સંસ્ત્વં તુ તથાપિ ગણનાયકમ્ ।
રહસ્યેન વિશેષાર્થં ન કરોષિ કદાચન ॥ ૧૯॥

ત્વદીયં વચનં શ્રેષ્ઠં સર્વમાન્યં ન સંશયઃ ।
અભિમાનેન હીનત્વાદ્વેદગુહ્યપ્રકાશકમ્ ॥ ૨૦॥

ત્વયા કૃતં પુરાણં યત્તદાન્ત્યં પ્રભવિષ્યતિ ।
પુરાણાનાં મહત્ શ્રેષ્ઠં મુદ્ગલં મુદ્ગલાકૃતિ ॥ ૨૧॥

ત્વયોક્તં નિન્દયેદ્યો વૈ ભવેત્ સ નિરયપ્રદઃ ।
અન્યેભ્યસ્તુ સ્વયં મૂર્ખો નરકેષુ પતિષ્યતિ ॥ ૨૨॥

વેદશાસ્ત્રપુરાણાનાં મુદ્ગલસ્ત્વત્કૃતો મહાન્ ।
ગ્રન્થો ભવિષ્યન્ નૂનં નિરભિમાનત્વકારણાત્ ॥ ૨૩॥

ન મુદ્ગલસમો યોગી ન મુદ્ગલસમઃ કદા ।
ગાણપત્યો મહાયોગી ત્રિકાલેષુ વિનિશ્ચિતમ્ ॥ ૨૪॥

સ્વાગતં તે મહાભાગ સ્થીયતાં મે પ્રસન્નિધૌ ।
ત્વદ્દર્શનેન સંહૃષ્ટો ભવામિ ગણપપ્રિય ॥ ૨૫॥

(Page ખં. ૫ અ. ૪૦ પાન ૯૭)
કપિલેન મહાયોગી સત્કૃતસ્તત્ર ભૂમિપ ।
મુદ્ગલસ્તત્ર સાન્નિધ્યે ન્યવસદ્ભાવસંયુતઃ ॥ ૨૬॥

એકદા સુખમાસીનં કપિલં યોગિનાં વરમ્ ।
પપ્રચ્છ મુદ્ગલો હર્ષાત્ વિનયાવનતોઽભવત્ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।

સ્વામિંસ્ત્વદીયગેહે સ ચિન્તામણિઃ સમાગતઃ ।
પુત્રભાવેન સાક્ષાત્તુ બ્રહ્મણાં નાયકઃ પરઃ ॥ ૨૮॥

ત્વયા ભાવેન સર્વેશ આરાધિતો નિરન્તરમ્ ।
ગુહ્યં તસ્ય ત્વમેવેહ જાનાસ્યત્ર ન સંશયઃ ॥ ૨૯॥

ન ત્વત્સમો મહાસિદ્ધઃ સાક્ષાદ્વિષ્ણુસ્ત્વમઞ્જસા ।
ગાણપત્યઃ સ્વયં યોગી ગણેશજનકઃ પુનઃ ॥ ૩૦॥

પરિપૃચ્છામ્યતસ્ત્વાહં વદ સર્વં મહાપ્રભો ।
ભવાદૃશા જનાનાં તુ તારણાય ભવન્તિ હિ ॥ ૩૧॥

સ્વાનન્દવસતિઃ સ્વામિન્ કીદૃશી તત્ર કિં સુખમ્ ।
વિસ્તારઃ કીદૃશસ્તસ્યાઃ કેન યોગેન લભ્યતે ॥ ૩૨॥

ન કોઽપિ તસ્ય લોકસ્ય જાનાતિ ત્વદૃતે પરમ્ ।
રહસ્યં વદ સર્વેશ ગાણપત્યસ્ય વિસ્તરાત્ ॥ ૩૩॥

ગાર્ગ્ય ઉવાચ ।
એવં પૃષ્ટો મહાસિદ્ધસ્તં પ્રહસ્ય પ્રશંસયન્ ।
જગાદ કપિલો હર્ષાદ્ગાણપત્યાગ્રણીર્વચઃ ॥ ૩૪॥

કપિલ ઉવાચ ।
શ‍ૃણુ મુદ્ગલ માહાત્મ્યં સઙ્ક્ષેપેણ બ્રવીમ્યહમ્ ।
સ્વાનન્દલોકગં પૂર્ણં સારં સર્વત્ર સમ્મતમ્ ॥ ૩૫॥

ગણાસુરં ગણાધ્યક્ષો હત્વા પરમદુર્જયમ્ ।
ગન્તું સમુદ્યતસ્તત્ર નિજલોકે યદાઽભવત્ ॥ ૩૬॥

તતો મયાઽતિભક્ત્યા વૈ પ્રાર્થિતો ગણનાયકઃ ।
ઉવાચ માં વરં યોગિન્ વૃણુ દાસ્યામિ માનદ ॥ ૩૭॥

તતશ્ચિન્તામણિં વિપ્ર પ્રણમ્યોચેઽતિદુઃખિતઃ ।
વદ સ્વાનન્દલોકસ્ય માહાત્મ્યં ગણનાયક ॥ ૩૮॥

નાનાલોકાઃ શ્રુતાઃ સ્વામિન્ ન સ્વાનન્દં ગજાનન ।
જાનાતિ કોઽપિ યત્ર ત્વં પ્રભો વસસિ નિત્યદા ॥ ૩૯॥

ચિન્તામણિરુવાચ ।
સ્વાનન્દં યચ્ચ વેદેષુ બ્રહ્મ યોગીન્દ્રસત્તમ ।

તદેવ માયયા પૂર્વં બભૂવ નગરં મહત્ ॥ ૪૦॥

સ્વસંવેદ્યેન યોગેન લભ્યતે નાન્યથા ક્વચિત્ ।
અથવા મે વ્રતાદ્યૈશ્ચોપાસનેન મહામુને ॥ ૪૧॥

ન જપૈસ્તપસા દાનૈર્નાનાકર્મપરાયણૈઃ ।
લભ્યતે નિજલોકો વૈ જાનીહિ મુનિસત્તમ ॥ ૪૨॥

ન તત્ર વિષ્ણુશમ્ભ્વાદ્યાઃ શુકાદ્યા યોગિનોઽપરે ।
ગચ્છન્તિ માર્ગહીનત્વાદગમ્યઃ સમ્મતઃ સદા ॥ ૪૩॥

ચતુર્વિધમયૈર્ભાવૈર્લભ્યતે ન કદાચન ।
અગમ્યસ્તૈર્ન સન્દેહો મમ લોકો મહામતે ॥ ૪૪॥

દશસાહસ્રકં વિપ્ર યોજનાનાં પ્રવિસ્તરઃ ।
અત ઊર્ધ્વં ચ સર્વત્ર તાવન્માનઃ પ્રકીર્તિતઃ ॥ ૪૫॥

વર્તુલઃ સર્વતઃ સોઽપિ સ્વસ્થાધારેણ તિષ્ઠતિ ।
સદા જ્યોતિર્મયઃ સાક્ષાજ્જ્યોતિષાં જ્યોતિરુચ્યતે ॥ ૪૬॥

ન તત્ર સગુણં સર્વં નિર્ગુણં નૈવ વિદ્યતે ।
પુમાન્ નપુંસકં ન સ્ત્રી વર્તતે મુનિસત્તમ ॥ ૪૭॥

ચતુર્વિધેષુ સર્વેષુ નાનાભાવગતેષુ ચ ।
સ્વસંવેદ્યં નિજાત્મસ્થં સંસ્થિતં મેઽત્ર સન્નિધૌ ॥ ૪૮॥

ચતુર્વિધેષુ સર્વેષુ માયાયુક્તમિહ સ્થિતમ્ ।
સદા ભ્રાન્તં વિજાનીહિ સ્વસ્વરૂપં મહામતે ॥ ૪૯॥

તેષુ મોહવિહીનં યત્ સાક્ષિરૂપં સદા સ્થિતમ્ ।
(Page ખં. ૫ અ. ૪૦ પાન ૯૮)
નિર્ગુણેન સ્વભાવેન સદા ખણ્ડમયં પરમ્ ॥ ૫૦॥

તયોર્યોગે નિજાનન્દો ઢુણ્ઢિલોકગ એવ સઃ ।
બભૂવ તત્ર ભક્ત્યા મે ભક્તાસ્તિષ્ઠન્તિ સન્નિધૌ ॥ ૫૧॥

મમ લોકે મહાભાગ ન ક્ષુધા ન તૃષાદિકમ્ ।
સદા સ્વાનન્દભોગસ્થા વસન્તિ મમ સેવકાઃ ॥ ૫૨॥

ન કૃત્રિમં સુખં તત્ર વિદ્યતેઽકૃત્રિમં ન હિ ।
સ્વાનન્દેન નિમગ્નાસ્તે સર્વં ભુઞ્જન્તિ નિત્યદા ॥ ૫૩॥

સગુણં તુ સુખં સર્વે ભુઞ્જતે નિર્ગુણં તથા ।
સ્વાનન્દસમ્ભવં તત્સ્થા એકકાલે મહામતે ॥ ૫૪॥

અત્ર યત્ સંસ્થિતં સર્વં નાનાભેદમયં મુને ।
તદેવ જ્યોતીરૂપેણ મમ લોકે પ્રતિષ્ઠતિ ॥ ૫૫॥

અત્રૈવ ન સ્થિતં યચ્ચ નિર્ગુણં વિપ્ર તત્ર તત્ ।
જ્યોતીરૂપેણ મે લોકે કિલ તિષ્ઠતિ સર્વદા ॥ ૫૬॥

સ્વાનન્દસમ્ભવં સર્વં તત્ર તિષ્ઠતિ નિત્યદા ।
માયયા મેઽત્ર લોકેઽતઃ સદાઽઽશ્ચર્યમયો બભૌ ॥ ૫૭॥

સગુણો નૈવ વિપ્રેશ સગુણં તત્ર વર્તતે ।
નિર્ગુણો ન સ નૈર્ગુણ્યં વર્તતે મે ચ લોકગમ્ ॥ ૫૮॥

સગુણૈર્નિર્ગુણૈર્હીનં વર્તતે તત્ર સર્વદા ।
અત આશ્ચર્યસંયુક્તો મમ લોકો વિશેષતઃ ॥ ૫૯॥

ન તત્રાઽહં સ્વભાવશ્ચ નાઽહં ભાવવિવર્જિતઃ ।
મમ લોકે મહાયોગિન્ સદા તિષ્ઠન્તિ મત્પ્રિયાઃ ॥ ૬૦॥

સગુણાઽમૃતરૂપં યદ્ભોગદં મૃતતુલ્યકમ્ ।
નિર્ગુણામૃતરૂપં યદમૃતે ભોગકારકમ્ ॥ ૬૧॥

તયોર્યોગે મહાયોગિન્નમૃતં સ્વસ્વરૂપકમ્ ।
તન્મયઃ સાગરસ્તત્ર સ્વસ્થાધારેણ વર્તતે ॥ ૬૨॥

મિષ્ટં નાનાવિધં તસ્માન્નિઃસૃતં સગુણાત્મકમ્ ।
નિર્ગુણાત્મકમેતસ્માદિક્ષુસાગર ઉચ્યતે ॥ ૬૩॥

સ્વસ્વરૂપાત્મકં તત્ર જલં રક્તસ્વરૂપકમ્ ।
તસ્ય નશ્યતિ પાનેન નૈર્ગુણ્યં સગુણાત્મકમ્ ॥ ૬૪॥

તસ્માદ્ધારા સમુદ્ભૂતા મધુધારા પ્રકથ્યતે ।
તયા સગુણનૈર્ગુણ્યં વર્તતે તૃપ્તિસંયુતમ્ ॥ ૬૫॥

તત્રાઽહં સિદ્ધિબુદ્ધિભ્યાં સદા ક્રીડામિ માનદ ।
બ્રહ્મપ્રિયાદ્યકાસ્તત્ર ગણા મે નિવસન્તિ હિ ॥ ૬૬॥

શુણ્ડાદણ્ડાદિચિહ્નૈશ્ચ સંયુતોઽહં સદા મુને ।

ગણા મેઽન્યે તથા ભક્તાઃ સ્વેચ્છારૂપાઃ વસન્તિ તે ॥ ૬૭॥

એતત્તે કથિતં સર્વં મમ લોકસુખં મહત્ ।
માનયુક્તં માનહીનં હૃદયે પશ્ય માં મુને ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે સ્વાનન્દલોકવર્ણનં નામ ચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૦
(Page ખં. ૫ અ. ૪૧ પાન ૯૯)

## ૫.૪૧ સ્વાનન્દસ્થિતિવર્ણનં નામૈકચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કપિલ ઉવાચ ।
ત્વદીયભક્તિસંયુક્તા નરાઃ સ્વાનન્દગા બભુઃ ।
ગચ્છન્તિ કેન માર્ગેણ તદ્વદસ્વ ગજાનન ॥ ૧॥

ચિન્તામણિરુવાચ ।
મદીયોપાસનાયુક્તા મન્નિષ્ઠા મત્પરાયણાઃ ।
અન્તે મેઽત્ર સ્મૃતિં કૃત્વા ગચ્છન્તિ મમ લોકકમ્ ॥ ૨॥

વિમાનં સ્વસ્વરૂપાઢ્યં પ્રેષયામિ મહામુને ।
શિવવિષ્ણ્વાદિદેવાનામદૃશ્યં નિજલોકતઃ ॥ ૩॥

તમારુહ્ય ગણૈર્યુક્તં ભક્તો મે દેહધૃક્ સ્વયમ્ ।
સ્વર્ગાન્ પશ્યંશ્ચ સર્વાન્ સ વિસ્મિતો ભવતીત્યહો ॥ ૪॥

ન તં પશ્યતિ દેવાદ્યા યોગિનો યાનસંસ્થિતમ્ ।
સ્વાનન્દચક્ષુષા હીના મૃતદેહમયા મુને ॥ ૫॥

શક્તેર્લોકમતિક્રમ્ય તથા સૌરં ચ વૈષ્ણવમ્ ।
શૈવં તતઃ પરં સોઽપિ મમ લોકં પ્રવિન્દતિ ॥ ૬॥

તત્રાજ્ઞાનમયશ્ચાદાવન્ધકારઃ પ્રદૃશ્યતે ।
નરેણ ન ગણૈર્વિપ્ર દેહધારણકારણાત્ ॥ ૭॥

વિમાનપ્રભયા તત્ર મદીયસ્મરણેન વૈ ।
યોજનાન્યયુતં ગત્વા પ્રકાશસ્તેન દૃશ્યતે ॥ ૮॥

તત્ર ભ્રામરિકા દેવી પ્રચણ્ડદેહધારિણી ।

જ્યોતિર્મયસ્વરૂપેણાજ્ઞાનિભ્યો ભયદા બભૌ ॥ ૯॥

જન્મમૃત્યભયં સર્વં નાનાભેદકરં ભ્રમમ્ ।
તયા સંરચિતં પૂર્ણં મમ જાનીહિ માયયા ॥ ૧૦॥

ભ્રામયેત્ સર્વભૂતાનિ સા સ્થિતા ભ્રામરી સ્વયમ્ ।
સ્વસ્યાધારેણ તત્રૈવ સ્વાનન્દમયકાયભૃત્ ॥ ૧૧॥

તાં પશ્ય ભયભીતઃ સ માં સસ્માર વિશેષતઃ ।
તતો ગણૈઃ સમાશ્વાસ્યાઽગ્રે નિન્યે માનવોત્તમઃ ॥ ૧૨॥

તસ્યા મસ્તકગા શક્તિર્જ્યોતિરાધારરૂપિણી ।
અજ્ઞાનિભ્યો સદા વિપ્ર ભયદા સા બભૂવ હ ॥ ૧૩॥

જીવરૂપં સદા સર્વભેદમોહધરં પરમ્ ।
શિવરૂપં તથા સાક્ષિ તદાધારં પ્રવર્તતે ॥ ૧૪॥

દેહાદીનાં મહાયોગિન્નાધારો જીવસંજ્ઞિતઃ ।
સ્વયમાધારહીનત્વાત્ પરમાત્મા તદેવ ચ ॥ ૧૫॥

સર્વેષાં પૂર્ણ આધારસ્તયા ક્લૃપ્તો મહામુને ।
આધારશક્તિરેવં સા નામ્ના તસ્ય સ્થિતાઽભવત્ ॥ ૧૬॥

તયાઽહં દ્વિવિધશ્ચિત્તે ભવામ્યજ્ઞાનિનાં સદા ।
જીવાત્મપરમાત્મસ્થો માયા તત્ર બભૌ પરા ॥ ૧૭॥

મદીયધ્યાનજેનૈવ તામતિક્રમ્ય માનવઃ ।
ગણૈર્નિન્યે પુરોભાગે મમ દર્શનકારણાત્ ॥ ૧૮॥

તતોઽતિજ્યોતિષા રૂપા શક્તિર્વૈ કામદાયિની ।
તસ્યા મસ્તકગા વિપ્ર શોભતે હર્ષદાયિની ॥ ૧૯॥

જન્મમૃત્યુયુતં સર્વં ભેદરૂપં તથા પરમ્ ।
આત્માકારં તયોર્યોગે યોગરૂપા તુ સા સ્મૃતા ॥ ૨૦॥

તથા કામયુતં વિપ્ર દ્વિવિધં પ્રકૃતં સદા ।
તેન દેહાત્મનોર્યોગઃ પરસ્પરયુતોઽભવત્ ॥ ૨૧॥

ઉત્પત્તિસ્થિતિસંહારયુક્તં ભ્રાન્તિધરં સ્મૃતમ્ ।
નાનાભેદમયં પૂર્ણં ક્ષયવૃદ્ધ્યાદિસંયુતમ્ ॥ ૨૨॥

આત્મા સદાઽમૃતાધાર ઉત્પત્તિસ્થિતિનાશકૈઃ ।
હીના વૃદ્ધિક્ષયાદિભ્યો વદન્તિ વેદવાદિનઃ ॥ ૨૩॥

કિમર્થં ભેદયુક્તં ચ સર્વદાઽઽત્માનમિચ્છતિ ।
તથા પશ્યાત્મવૈચિત્ર્યં વિરુદ્ધે સતિમાનદ ॥ ૨૪॥

કામયુક્તં હ્યસિપદેન દ્વન્દ્વસ્થં કૃતં સદા ।
તેન મોહપ્રભાવેણ પરસ્પરહિતં જગત્ ॥ ૨૫॥

અતઃ સા શક્તિરાખ્યાતા કામદા સર્વમોહિની ।
અસિરૂપા વિશેષજ્ઞા મહામાયા મદીયિકા ॥ ૨૬॥

ભ્રામર્યા ભ્રામિકા કાઽપિ શક્તિર્નાત્ર પ્રદૃશ્યતે ।
ત્વં પદસ્થાં મહામાયાં તાં જાનીહિ પ્રભાવતઃ ॥ ૨૭॥

આધારાયા મહાયોગિન્નાધારાન્યા ન વિદ્યતે ।
શક્તિઃ કુત્ર તતઃ સાપિ તત્પદસ્થાઽત્ર કથ્યતે ॥ ૨૮॥

કામદાયાશ્ચ કા શક્તિઃ કામદાન્યા ન વિદ્યતે ।
સર્વદા સર્વરૂપાસિ પદમય્યાપિ સા બભૌ ॥ ૨૯॥

તસ્યા મસ્તકગં વિદ્ધિ લોકં મે સ્વસ્વરૂપકમ્ ।
માયયા રચિતં વિપ્ર મયા સ્વાનુભવાત્મકમ્ ॥ ૩૦॥

તત્રાગત્ય મહાભક્તઃ પિબેદિક્ષુ સમુદ્રજમ્ ।
જલં તેન સ વૈ સદ્યો જ્યોતીરૂપધરો ભવેત્ ॥ ૩૧॥

ભેદાભેદાદિહીનશ્ચ ભૂત્વા પશ્યતિ માં તતઃ ।
મદ્દર્શનજયોગેન બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૩૨॥

સ્વેચ્છયા નિજલોકસ્થો યત્ર તત્ર સ સઞ્ચરેત્ ।
સગુણો નિર્ગુણો ભૂત્વા સદા સ્વાનન્દગઃ પરઃ ॥ ૩૩॥

તતસ્તસ્ય પુનર્ભ્રાન્તિર્ન ભવેન્ મુનિસત્તમ ।
કલ્પકોટિશતૈર્વાઽપિ નિશ્ચિતં વેદવાદિભિઃ ॥ ૩૪॥

મહાલયે ચતુર્ભેદા મયિ ચૈકત્વમાગતાઃ ।
verse 35 missing in the original
અજ્ઞાનેન યુતાઃ સર્વે પુનસ્તાન્ સંસૃજામ્યહમ્ ॥ ૩૬॥

એતત્તે કથિતં સર્વં મમ લોકાગમે મુને ।

સઙ્ક્ષેપેણૈવ જાનીહિ માર્ગહીનં સુસિદ્ધિદમ્ ॥ ૩૭॥

કપિલ ઉવાચ ।
ત્વદીયોપાસનં કૃત્વા બહવસ્તે ગજાનન ।
લોકં ગચ્છન્તિ વિઘ્નેશ તથા યોગિન એવ ચ ॥ ૩૮॥

બ્રહ્મભૂતાશ્ચ તે ખ્યાતાઃ કદાચિન્ન પતન્તિ ચેત્ ।
તદા જગદિદં સ્વામિન્ ક્ષીણરૂપં ભવેત્ ક્રમાત્ ॥ ૩૯॥

પુનઃ પુનઃ સુસ્રષ્ટા ત્વં ક્ષીણે ક્ષીણે કથં પ્રભો ।
પૂર્ણં વિશ્વમિદં નિત્યમઞ્જસા ભાતિ ખેલસિ ॥ ૪૦॥

ચિન્તામણિરુવાચ ।
યથાઽહં માયયા વિપ્ર યુદ્ધકાલે વિશેષતઃ ।
ભૂત્વા હ્યનન્તરૂપેણ પ્રયુદ્ધ્યે વિશ્વપાલનાત્ ॥ ૪૧॥

હત્વા દૈત્યાદિકાન્ સર્વાન્ પુનરેકસ્વરૂપધૃક્ ।
ભવામિ સર્વભાવજ્ઞો લીલાર્થમવતારધૃક્ ॥ ૪૨॥

તથા માયાબલેનૈવ નૂતનં સંસૃજામ્યહમ્ ।
ન ન્યૂનાધિકમેવેદં વિશ્વં ભવતિ સર્વદા ॥ ૪૩॥

કપિલ ઉવાચ ।
બ્રહ્મભૂતા નરા નાર્યઃ સ્વાનન્દે સંસ્થિતા બભુઃ ।
અનન્તાસ્તે પ્રભક્ત્યા વૈ પુનઃ સ્વાનન્દગામિનઃ ॥ ૪૪॥

તેષાં વાસઃ સદા તત્ર નગરં નિયતં પ્રભો ।
સઙ્કીર્ણતા ભવેન્નૂનં કુત્ર તિષ્ઠન્તિ તદ્વદ ॥ ૪૫॥

ચિન્તામણિરુવાચ ।
સ્વાનન્દે કલ્પપર્યન્તમવસન્નિત્યમાદરાત્ ।
મહાલયે સમુત્પન્ને મદ્દેહે સઙ્ગતા બભુઃ ॥ ૪૬॥

મયા ભિન્નં કૃતં સર્વં યુગાદૌ મુનિસત્તમ ।
યુગાન્તે યોગભાવેન મદ્રૂપં ભવતીત્યહો ॥ ૪૭॥

મદ્દેહે યોગભાવેનાજ્ઞાનેનૈવ સમાગતાઃ ।
સા યોગનિદ્રા વિપ્રેન્દ્ર મદીયા કથ્યતે બુધૈઃ ॥ ૪૮॥

સ્વાનન્દસ્થા જનાઃ સર્વે જ્ઞાનયુક્તા મદીયકે ।

દેહે લીના વૈ ભવન્તિ યોગીન્દ્રા યોગભાવતઃ ॥ ૪૯॥

પુનઃ સૃષ્ટિયુગે વિપ્ર નિઃસૃતં વિશ્વમઞ્જસા ।
અજ્ઞાનેન યુતં લીનં માયયા મે ન સંશયઃ ॥ ૫૦॥

જ્ઞાનેન યે સમાયાતા મદ્દેહે તે પુનઃ કદા ।
ભવન્તિ ભિન્નરૂપા ન સૃષ્ટ્યાદૌ યોગભાવિતાઃ ॥ ૫૧॥

(Page ખં. ૫ અ. ૪૧ પાન ૧૦૧)
એવં વસન્તિ યે તત્ર સ્વાનન્દે મુનિસત્તમ ।
કલ્પે કલ્પે મદીયે તે દેહે સાયુજ્યમાગતાઃ ॥ ૫૨॥

કપિલ ઉવાચ ।
ભક્તિમિચ્છન્તિ વિઘ્નેશ ત્વદીયાં નિત્યમાદરાત્ ।
ન યોગે પ્રેમભાવેન તેષાં કુત્ર સ્થિતિં વદ ॥ ૫૩॥

કલ્પે કલ્પે મહાભાગા ભક્તાસ્તે પૂર્ણભાવતઃ ।
ભવન્તિ યે ક્રમેણૈવાપારાઃ કુત્ર વસન્તિ તે ॥ ૫૪॥

ચિન્તામણિરુવાચ ।
દશયોજનસાહસ્રં માનં તસ્ય પ્રકીર્તિતમ્ ।
યોગિનાં ચ મુમુક્ષૂણાં ન ભક્તાનાં કદાચન ॥ ૫૫॥

અપારયોજનાકારો મમ લોકો ન સંશયઃ ।
સ્વાનન્દસ્તત્ર મે ભક્તા વસન્તિ સેવનોત્સુકાઃ ॥ ૫૬॥

સઙ્ખ્યાહીનાશ્ચ મદ્ભક્તાઃ સદા પ્રેમરસાઽઽપ્લુતાઃ ।
નવધા માં ભજન્તે તે કલ્પે કલ્પે ગતવ્યથાઃ ॥ ૫૭॥

ભવન્તિ તુ ભવિષ્યન્તિ બભૂવુર્યે મહામુને ।
મદ્ભક્તા મે પ્રસાન્નિધ્યે વસન્તિ મોહદાઃ સદા ॥ ૫૮॥

મહાભાગા પ્રિયં ભક્તિસમં મે નૈવ વિદ્યતે ।
ભક્ત્યધીનો મહાનન્દાદ્ ભ્રમેયં ભક્તસન્નિધૌ ॥ ૫૯॥

યત્ર કુત્ર તુ તિષ્ઠન્તિ ભક્તા મે તત્ર સર્વદા ।
તિષ્ઠામિ સર્વભાવેન તાન્ રક્ષામિ સુવિહ્વલઃ ॥ ૬૦॥

નવધા ચિત્તભાવેન ભક્તસામીપ્યગો મુદા ।
ભજામિ ભક્તમાહાત્મ્યં મોહિતશ્ચેષ્ટિતઃ સદા ॥ ૬૧॥

ન સ્વાનન્દપ્રિયો મે વૈ સિદ્ધિર્બુદ્ધિઃ સુતૌ તથા ।
મમ દેહો ન વિપ્રેશ પ્રિયા ભક્તા યથા ચ મે ॥ ૬૨॥

કપિલ ઉવાચ ।
સ્વાનન્દસ્થા ગણાસ્તે યે ભક્તાન્નેતું સમાગતાઃ ।
જ્યોતીરૂપાશ્ચ ભક્તૈસ્તે દૃશ્યન્તે કથમપ્યહો ॥ ૬૩॥

ચિન્તામણિરુવાચ ।
માયયા મે મહાયોગિન્ દુર્લભં કિં ભવેદ્વદ ।
કૃપયા મેઽત્ર પશ્યન્તિ ભક્તાસ્તાન્ ચર્મચક્ષુષા ॥ ૬૪॥

સ્વાનન્દઃ સર્વરૂપશ્ચ તત્ર માર્ગં વદામિ તે ।
ભેદયુક્તૈર્ગણા મે વૈ દૃશ્યન્તે ભેદસંયુતાઃ ॥ ૬૫॥

ભેદહીનૈઃ સદાત્મસ્થૈર્નિર્ગુણા મે ગણા મુને ।
દૃશ્યન્તે સ્વાત્મસંસ્થૈશ્ચ સ્વસંવેદ્યાત્મકાસ્તથા ॥ ૬૬॥

જલાદિષુ યથા બિમ્બં ભવતે તાદૃશં કિલ ।
તથા મદીયલોકસ્થા દૃશ્યન્તે સર્વમણ્ડલે ॥ ૬૭॥

એતત્તે કથિતં સર્વં મમલોકવિચેષ્ટિતમ્ ।
અધુનાઽહં ગમિષ્યામિ નિજલોકં મહામુને ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે સ્વાનન્દસ્થિતિવર્ણનં નામૈકચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૧
(Page ખં. ૫ અ. ૪૨ પાન ૧૦૨)

## ૫.૪૨ ચિન્તામણ્યન્તર્ધાનવર્ણનં નામ દ્વિચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કપિલ ઉવાચ ।
એતાદૃશી મહાભક્તિસ્ત્વદીયા ગણનાયક ।
યદા સર્વે પ્રકુર્વન્તિ તદા વિશ્વં કથં ભવેત્ ॥ ૧॥

સર્વેભ્યઃ શ્રેષ્ઠભાવેન જાનન્તિ ત્વાં યદા નરાઃ ।
તદા ત્વાં સર્વભાવેન ભજન્તે તે ન સંશયઃ ॥ ૨॥

શ્રેષ્ઠાર્થિનો નરાઃ સર્વે ભજન્તે શીઘ્રસિદ્ધયે ।

દેવેન્દ્રાસ્ત્વાં પરિત્યજ્યાન્યાન્ બ્રહ્મપ કથં વદ ॥ ૩॥

ચિન્તામણિરુવાચ ।
મયા સૃષ્ટં જગત્ સર્વં નાનાભાવમયં મુને ।
નાનાભાવયુતાઃ સર્વે ન ભજન્તે તુ માં સદા ॥ ૪॥

ચતુર્ણાં દેવમુખ્યાનાં કૃત્વા ભજનમુત્તમમ્ ।
તેન શુદ્ધાન્તરાત્માનો માં ભજન્તે તતઃ પરમ્ ॥ ૫॥

અન્યચ્ચ શ ૃણુ મે વાક્યં મયા માયા પ્રકાશિતા ।
સર્વશ્રેષ્ઠતમં માં તે ન જાનન્તિ પ્રમોહિતાઃ ॥ ૬॥

યદાઽહં માયયા વિપ્ર છાદયામિ ન મે વપુઃ ।
તદા મોહવિહીનાશ્ચેચ્છ્રેષ્ઠં માં પ્રવન્દતિ ચ ॥ ૭॥

મયા નાનાવતારાશ્ચ કૃતાસ્ત્રૈલોક્યગેષુ વૈ ।
દેવાદીનાં પ્રગેહેષુ તાદૃશં માં વદન્તિ તે ॥ ૮॥

અગ્રપૂજ્યત્વમેવં યત્ સર્વપૂજ્યત્વમઞ્જસા ।
શિવેન દત્તમસ્મૈ તદ્ગણેશાય વદન્તિ તે ॥ ૯॥

માયયા મોહિતા મે માં પાર્વતીમલસમ્ભવમ્ ।
શિવપુત્રં શિવેનૈવ સ્થાપિતં પ્રવદન્તિ તે ॥ ૧૦॥

શિવગણસ્વરૂપોઽયં મુક્તિં દાતું ન ચ ક્ષમઃ ।
કાર્યસિદ્ધિસ્વભાવેન કામપૂરો ગણેશ્વરઃ ॥ ૧૧॥

ઇત્યાદિભાવા બહવો મયા વિપ્ર પ્રકાશિતાઃ ।
ક્રીડાર્થં તેન માં ત્યક્ત્વા શ્રેષ્ઠં જાનન્તિ ચાપરમ્ ॥ ૧૨॥

નો ચેત્ સ્વાનન્દગાઃ સર્વે ભવન્ત્યત્ર ન સંશયઃ ।
નિર્મોહાત્ કલ્પપર્યન્તં જગન્નૈવ પ્રવર્તતે ॥ ૧૩॥

અન્યચ્ચ કર્મણા સર્વં બ્રહ્માણ્ડં જનસંયુતમ્ ।
નાનાભાવાત્મમોહસ્થં ભવતેઽનેકનિશ્ચયાત્ ॥ ૧૪॥

અન્તે મદીયભાવસ્થા ભવન્તે શુદ્ધચેતસઃ ।
વેદશાસ્ત્રાર્થતત્ત્વજ્ઞાઃ સ્વયમેવ મહામુને ॥ ૧૫॥

અહં સાક્ષાદ્ બુદ્ધિપતિઃ કૃત્વા બુદ્ધેશ્ચ ચાલનમ્ ।
ગોપયામિ ગણેશસ્ય સ્વરૂપં દેહિનાં હૃદિ ॥ ૧૬॥

તેન માં નૈવ જાનન્તિ જના પરમગં કદા ।
વિવેકમાર્ગં તે તત્ર વદામિ શ્ૃણુ યત્નતઃ ॥ ૧૭॥

કૃતે માં પૂર્ણભાવેન ભજન્તે સર્વમાનવાઃ ।
અજ્ઞાનાવરણૈર્હીનાઃ શ્રેષ્ઠં તે પ્રવન્દતિ હિ ॥ ૧૮॥

ત્રેતાયાં પાદહીનેન માં ભજન્તે નરા મુને ।
પઞ્ચાયતનભાવેન પઞ્ચ શ્રેષ્ઠાન્ વદન્તિ તે ॥ ૧૯॥

તત્ર સર્વેષુ સામ્યેન માં ભજન્તે ન સંશયઃ ।
ચર્તુભ્યઃ શ્રેષ્ઠભાવાખ્યં જ્ઞાનં નષ્ટં મદીયકમ્ ॥ ૨૦॥

દ્વાપરે દ્વિપદા હીનં માં ભજન્તે સુરાદયઃ ।
વદન્તિ ન્યૂનરૂપં તુ ચતુર્ભ્યઃ શઙ્કરાત્મજમ્ ॥ ૨૧॥

વેદશાસ્ત્રે પુરાણેષુ શ્રેષ્ઠં જાનન્તિ માનવાઃ ।
મોહેન યુગમાનેન માં ન્યૂનં પ્રવદન્તિ તે ॥ ૨૨॥

સર્વં બ્રહ્મેતિ વેદેષુ કથિતં તત્ર કિં ભવેત્ ।
સત્તા સમાનરૂપા તુ તથાઽયં ગણનાયકઃ ॥ ૨૩॥

કલૌ ત્રિપાદહીનેન માં જ્ઞાનેન ભજન્તિ તે ।
વદન્તિ વૈ નરાસ્તત્ર મલજોઽયં ગજાનનઃ ॥ ૨૪॥

શિવસ્ય વરદાનેનાગ્રપૂજ્યોઽયં ગણેશ્વરઃ ।
સર્વપૂજ્યો યથા દૈત્યા જન્તવો વરસંયુતાઃ ॥ ૨૫॥

સર્વં બ્રહ્મેતિ વેદેષુ કથિતં તેન વિઘ્નપઃ ।
(Page ખં. ૫ અ. ૪૨ પાન ૧૦૩)
વર્ણિતોઽયં શિવવરબલેનૈવ મુનીન્દ્રકૈઃ ॥ ૨૬॥

સ્વસત્તાસંયુતો દેવો નાઽયં ચિન્તામણિઃ કદા ।
શિવભક્તિબલેનાદ્યો વરયુક્તો બભૂવ હ ॥ ૨૭॥

કલિપ્રાન્તે મુને લોકા ન ભજિષ્યન્તિ માં કદા ।
એકપાદમયી ભક્તિર્નાશં યાસ્યતિ નિશ્ચિતમ્ ॥ ૨૮॥

મતભેદેન મોહેનાદૌ માં ત્યક્ત્વા વિશેષતઃ ।
શિવવિષ્ણ્વાદિકાન્ સર્વે ભજન્તે ત્વગ્રપૂજ્યકાન્ ॥ ૨૯॥

સર્વપૂજ્યાગ્રપૂજ્યત્વં નષ્ટં ભવતિ મે તતઃ ।
અન્તે વિઘ્નયુતાઃ સર્વે નરકેષુ પચન્તિ વૈ ॥ ૩૦॥

યુગમાનપ્રસિદ્ધ્યર્થં કૃતં મેઽત્ર મહામુને ।
કર્માકર્મવિકર્માણિ સ્થાપિતાનિ વિભાગશઃ ॥ ૩૧॥

ન કરોમિ યદાઽહં ચેત્તદા મે વરદાનકમ્ ।
કર્મભ્યશ્ચ યુગેભ્યશ્ચ નિષ્ફલં ભવતીત્યહો ॥ ૩૨॥

નરકાદય આખ્યાતાઃ સ્વર્ગાશ્ચૈવ મહામુને ।
ભવન્તિ નિષ્ફલાઃ સર્વે તદર્થં ખેલયામ્યહમ્ ॥ ૩૩॥

શુભાશુભમયં સર્વં મયા સ્વવરદાનતઃ ।
સ્થાપિતં તેન મોહેન માં ન જાનન્તિ મૂલગમ્ ॥ ૩૪॥

એતત્તે સર્વમાખ્યાતં મદીયં ચેષ્ટિતં મહત્ ।
મા સંશયં મુને ત્વં તુ કુરુ માં ભજ ભાવતઃ ॥ ૩૫॥

કપિલ ઉવાચ ।
એવમુક્ત્વા ગણેશાનો મામન્તર્ધાનમાકરોત્ ।
અહં ખેદસમાયુક્તો હૃદયે તમલોકયમ્ ॥ ૩૬॥

મયાઽસૌ સ્થાપિતશ્ચિન્તામણિર્વિપ્ર પરેશ્વરઃ ।
પૂજયામિ ભજે નિત્યં ભક્તિભાવસમન્વિતઃ ॥ ૩૭॥

એતત્તે કથિતં સર્વં રહસ્યં તસ્ય ધીમતઃ ।
લોકસ્ય તેન યત્ પ્રોક્તં ભજ તં ભક્તિસંયુતઃ ॥ ૩૮॥

ત્વં સાક્ષાદ્ગાણપત્યશ્ચ દેહધારી ન સંશયઃ ।
તવદર્શનમાત્રેણ સર્વે પૂતા ભવન્તિ ચ ॥ ૩૯॥

ગાર્ગ્ય ઉવાચ ।
શ્રુત્વૈવં મુદ્ગલો યોગી મહત્ સ્વાનન્દલોકગમ્ ।
માહાત્મ્યં વિસ્મિતો ભૂત્વા પ્રણનામ મહામુનિમ્ ॥ ૪૦॥

ચિન્તામણિં સમભ્યર્ચ્ય પ્રણમ્ય કપિલં પુનઃ ।
મુદ્ગલઃ સ્વાશ્રમં રાજન્ પ્રયયૌ ગણપે રતઃ ॥ ૪૧॥

એવં તે સર્વમાખ્યાતં ભજ તં ભાવસંયુતઃ ।
અનેન જડદેહેન સ્વાનન્દં લભસે નૃપ ॥ ૪૨॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા મહીપાલમૈલં ગાર્ગ્યો મહામુનિઃ ।
અનુજ્ઞાતશ્ચ ભૂપેન યયૌ સ્વસ્યાશ્રમં વિધે ॥ ૪૩॥

ઐલોઽપિ ગણરાજં તં લક્ષસંજ્ઞં નિરન્તરમ્ ।
સેવ્યસ્વાનન્દગો ભૂત્વા ભજતે તં પ્રજાપતે ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ચિન્તામણ્યન્તર્ધાનવર્ણનં નામ દ્વિચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૨

## ૫.૪૩ ભક્તિમાર્ગવર્ણનં નામ ત્રિચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽહં કૃતકૃત્યોઽહં શ્રુત્વા સ્વાનન્દજાં કથામ્ ।
વિસ્મિતો યોગિરાજેન્દ્ર ન સમં તસ્ય વિદ્યતે ॥ ૧॥

અધુના બ્રૂહિ મે સર્વં યશ ઐલસ્ય ભક્તિજમ્ ।
ગાર્ગ્યેણ નૃપશાર્દૂલ ઉપદિષ્ટઃ કિમાચરત્ ॥ ૨॥

ગણેશલોકગઃ સોઽપિ બભૂવ વદ તત્કથમ્ ।
અત્ર તત્ર ગણેશાનં ભજતે કથમપ્યહો ॥ ૩॥

મુદ્ગલ ઉવાચ ।
ગાર્ગ્યેણ નૃપવર્યશ્ચ ગાણપત્યેન શિક્ષિતઃ ।
ગાણપત્યેન માર્ગેણાભજત્તં ગણનાયકમ્ ॥ ૪॥

સ્કન્દેન સ્થાપિતસ્તત્ર લક્ષો નામ ગજાનનઃ ।
તં નિત્યં સેવયામાસાનન્યભાવેન વિઘ્નપમ્ ॥ ૫॥

ન ગણેશાત્ પરં કિઞ્ચિજ્જાનાતિ નૃપસત્તમઃ ।
એકનિષ્ઠઃ સ્વભાવેનાભજત્તં લક્ષવિઘ્નપમ્ ॥ ૬॥

દક્ષ ઉવાચ ।
એકનિષ્ઠાત્મિકાં ભક્તિં વદ મેઽન્યાં ચ મુદ્ગલ ।
યયા વિઘ્નેશ્વરઃ સાક્ષાત્ સન્તુષ્ટો જાયતે નૃણામ્ ॥ ૭॥

મુદ્ગલ ઉવાચ ।

પઞ્ચાયતનપૂજાં વૈ તથાગ્નેઃ સેવનં પરમ્ ।
દ્વિજાનાં નિત્યમેતત્તે કથિતં સર્વસમ્મતમ્ ॥ ૮॥

વિઘ્નરૂપં મહાઘોરં પરત્રેહ ચ બન્ધકમ્ ।
બ્રહ્મમાર્ગસ્ય સંરોધકારકં વિદ્ધિ સર્વદા ॥ ૯॥

તં જયેદ્વિઘ્નરાજસ્ય પૂજનેન નરોત્તમઃ ।
વિદ્યાર્થં શઙ્કરં સોઽપિ પૂજયેન્નિત્યમાદરાત્ ॥ ૧૦॥

યશોર્થં કેશવં ચૈવારોગ્યાર્થં રવિમઞ્જસા ।
સૌભાગ્યાર્થં નરસ્તદ્વત્ પૂજયેજ્જગદમ્બિકામ્ ॥ ૧૧॥

અગ્નિં હોમાદિમાર્ગેણ પૂજયેત્ કર્મસિદ્ધયે ।
દેવાદીનાં વિભાગાર્થં સર્વેષાં તોષકારકમ્ ॥ ૧૨॥

એવં મત્વા તુ યો મર્ત્યઃ કરોતિ સેવનં સદા ।
સ્વધર્મસ્ય પ્રજાનાથ બ્રહ્માર્પણતયા કિલ ॥ ૧૩॥

અથવા કામનાયુક્તઃ સ ચેત્તદપિ તાદૃશમ્ ।
કુર્યાત્ કર્માઙ્ગદેવેભ્યઃ સમર્પ્ય સકલાં ક્રિયામ્ ॥ ૧૪॥

સર્વે સમાનરૂપાશ્ચ તસ્ય પ્રોક્તાઃ પ્રજાપતે ।
સ્વધર્માચરણં શ્રેષ્ઠં જાનીતે સર્વસૌખ્યદમ્ ॥ ૧૫॥

તત્ર વિઘ્નેશ્વરં સાક્ષાન્ મધ્યે સંસ્થાપ્ય સર્વદા ।
ઈશાન્યાં વિષ્ણુમેવ ત્વાગ્નેય્યાં શમ્ભું પ્રપૂજયેત્ ॥ ૧૬॥

નૈરૃત્યાં જગદમ્બાં ચ વાયવ્યાં રવિમાદરાત્ ।
પઞ્ચાયતનભાવેન પૂજયેત્ પઞ્ચ દેવતાઃ ॥ ૧૭॥

સર્વેષાં પૂજ્યભાવાદ્વૈ સર્વાગ્રે પૂજ્ય ભાવતઃ ।
જ્યેષ્ઠરાજસ્વરૂપાચ્ચ મધ્યે તિષ્ઠતિ વિઘ્નપઃ ॥ ૧૮॥

અથવા પઞ્ચદેવેષુ મન્ત્રં ગૃહ્ય સ્વભાવજમ્ ।
એકસ્ય તસ્ય મધ્યે સ સ્થાપનં કુરુતે સ્વયમ્ ॥ ૧૯॥

સર્વં કલાંશરૂપસ્થં પઞ્ચાયતનકસ્ય વૈ ।
પૂજિતેષુ પ્રજાનાથ પઞ્ચસુ પૂજિતં જગત્ ॥ ૨૦॥

દેવેન કાર્યસિદ્ધ્યર્થં નાના દેવાઃ કૃતાઃ પુરા ।
તે સર્વે તત્સ્વરૂપાશ્ચ પૂજનીયા નરેણ વૈ ॥ ૨૧॥

ઇયં સર્વાત્મિકા ભક્તિઃ કથિતા ચ પ્રજાપતે ।
સ્વેષ્ટભાવેન સર્વત્ર પરાત્તત્ ધ્યાનકારણાત્ ॥ ૨૨॥

અધુના શ ृણુ દક્ષ ત્વમેકનિષ્ઠાં મહાદ્ભુતામ્ ।
સ્વલ્પકાલેન ભક્તસ્ય સિદ્ધિદાં પરમપ્રિયામ્ ॥ ૨૩॥

સ્વસ્યેષ્ટદેવતાયાં તુ વિશ્વં સર્વં પ્રતિષ્ઠિતમ્ ।
તસ્ય પૂજનમાત્રેણ સર્વં સમ્પૂજિતં ભવેત્ ॥ ૨૪॥

અનન્તરૂપભાવેન સર્વત્ર કલયા સ્વયમ્ ।
તિષ્ઠતિ પૂજનં તેષાં ન ભવેદ્દેહધારિણામ્ ॥ ૨૫॥

ચરાચરમયો દેવઃ પૂજનીયં ચરાચરમ્ ।
(Page ખં. ૫ અ. ૪૩ પાન ૧૦૫)
કેનાઽપિ તત્ર વિપ્રેન્દ્ર ભવેચ્ચાસઙ્ખ્યભાવતઃ ॥ ૨૬॥

ચરાચરં પૂજિતં ચેત્તદપિ તસ્ય રોમગમ્ ।
બ્રહ્માણ્ડકૂટમેવેદં વદન્તિ મુનયોઽપરે ॥ ૨૭॥

યસ્ય રોમાગ્ચરન્ધ્રેષુ બ્રહ્માણ્ડાનાં હિ કોટયઃ ।
અતઃ સમ્પૂર્ણદેહસ્ય પૂજનં ન ભવેત્ કદા ॥ ૨૮॥

ભક્તવાત્સલ્યભાવાર્થં દેહધારી બભૂવ હ ।
દેવસ્તસ્ય ભવેત્ સર્વં પૂજનેન સુપૂજિતમ્ ॥ ૨૯॥

અનેન નિશ્ચયેનૈવ પૂજયેત્ સ્વેષ્ટદૈવતમ્ ।
અન્યેષાં ક્ષોભતોષૌ સ સદા નેચ્છતિ ચેતસા ॥ ૩૦॥

નાન્યાન્નિન્દેન્ન વૈ દક્ષ સ્તુયાદેકત્વમાશ્રિતઃ ।
સ્વેષ્ટદેવપરો ભૂત્વા ભક્તિં કુર્યાદ્વિશેષતઃ ॥ ૩૧॥

નરો વિઘ્નેશ્વરેણૈવ સદા યુક્તં પ્રજાપતે ।
સ્વેષ્ટદેવં સમાપૂજ્ય સિદ્ધિં સ લભતે પરામ્ ॥ ૩૨॥

એકનિષ્ઠા મહાભક્તિર્ન ભવેત્તત્ર ખણ્ડિતા ।
તત્ર માર્ગં પ્રવક્ષ્યામિ સર્વસંશયનાશનમ્ ॥ ૩૩॥

યથા સ્વશાખયા સંયુક્તં સન્ધ્યાદિકમાચરેત્ ।
તથાઽગ્રપૂજ્યભાવેન પૂજયેદ્ગણનાયકમ્ ॥ ૩૪॥

સર્વેષામાદિપૂજ્યોઽયં સર્વાદૌ વેદવાદતઃ ।
અન્યથા વેદવૈરુધ્યાત્ સકલા નશ્યતિ ક્રિયા ॥ ૩૫॥

શિવવિષ્ણુમુખાદીનામગ્રપૂજા ન વિદ્યતે ।
સર્વાદૌ તેન તે ત્યાજ્યા ન ત્યાજ્યોઽયં ગજાનનઃ ॥ ૩૬॥

અન્યચ્ચ શ‍ૃણુ મે વાક્યં સર્વેભ્યઃ ફલદાયકઃ ।
ગણેશો નાત્ર સન્દેહઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૩૭॥

ધર્માર્થકામમોક્ષાશ્ચ બ્રહ્મભૂતત્વમઞ્જસા ।
સિદ્ધ્યધીનં પ્રજાનાથ પઞ્ચકં વેદવાદતઃ ॥ ૩૮॥

કર્તા બુદ્ધ્યા સમાયુક્તઃ સ્વેષ્ટદેવસ્તયા યુતઃ ।
બુદ્ધ્યધીનં જગત્ સર્વં જ્ઞાનં દેહાદિકં પરમ્ ॥ ૩૯॥

તયોઃ સ્વામી ગણેશાનો બ્રહ્મણસ્પતિવાચકઃ ।
સર્વાદૌ તમસમ્પૂજ્ય નારકી સ ભવેન્નરઃ ॥ ૪૦॥

યદા ગણપતિર્દક્ષ સર્વાદૌ પૂજિતો ન ચેત્ ।
પતિવ્રતે સિદ્ધિબુદ્ધી તત્ર નૈવાગમિષ્યતઃ ॥ ૪૧॥

સર્વસિદ્ધિવિહીનશ્ચ ભવેત્ દુર્બુદ્ધિસંયુતઃ ।
દેહાન્તે નરકેષ્વેવ સ પચેન્નાત્ર સંશયઃ ॥ ૪૨॥

શિવવિષ્ણુમુખાનાં સ જ્યેષ્ઠશ્ચૈવ પ્રકીર્તિતઃ ।
તસ્યોલ્લઙ્ઘનમાત્રેણ ભ્રંશયિષ્યન્તિ દેવતાઃ ॥ ૪૩॥

યથા ગણપતિદ્વેષાદ્બલિં વૈષ્ણવમુત્તમમ્ ।
નરકેષુ નિબદ્ધ્યૈવોદ્યતો વિષ્ણુર્બભૂવ હ ॥ ૪૪॥

સન્ધ્યાદિ કર્મવચ્ચાયં સર્વાદૌ સમ્મતો બુધૈઃ ।
તસ્ય પૂજનમાત્રેણૈકનિષ્ઠા નૈવ ખણ્ડિતા ॥ ૪૫॥

ગણેશ એકનિષ્ઠશ્ચેત્તદા ગણપતિઃ સદા ।
એકઃ પૂજ્યો ન સન્દેહોઽન્યેષામાવશ્યખણ્ડનાત્ ॥ ૪૬॥

એકનિષ્ઠસમા ભક્તિર્વિદ્યતે નૈવ નિશ્ચિતમ્ ।
બ્રહ્મ નાનાવિધં તેન વિશ્વં ભક્ત્યા પ્રપૂજિતમ્ ॥ ૪૭॥

જગદ્બ્રહ્મયુતો દેવઃ સ્વેષ્ટઃ સમ્પૂર્ણભાવતઃ ।
પૂજિતસ્તેન ભવતિ સન્તુષ્ટે સકલં સદા ॥ ૪૮॥

એકનિષ્ઠો યથા ભક્તસ્તથા દેવોઽપિ માનદ ।
એકભક્તાશ્રિતો ભૂત્વાઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૪૯॥

એતત્તે કથિતં દક્ષ ભજનં ત્રિવિધં મયા ।
અનેન ભક્તિમાર્ગેણ વાઞ્છિતં લભતે નરઃ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ભક્તિમાર્ગવર્ણનં નામ ત્રિચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૩
(Page ખં. ૫ અ. ૪૪ પાન ૧૦૬)

## ૫.૪૪ ધ્યાનદૂર્વાદિપૂજાવિધિવર્ણનં નામ ચતુશ્ચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એવમૈલઃ સ રાજર્ષિરેકનિષ્ઠાપરાયણઃ ।
ગણેશમભજન્નિત્યં યથા ગૃત્સમદસ્તથા ॥ ૧॥

ધ્યાત્વા ગજાનનં દેવમેકાન્તે તદ્ગતાઽખિલઃ ।
માનસે રાજ્યભોગે સ નિઃસ્પૃહઃ સમ્બભૂવ હ ॥ ૨॥

પુત્રે રાજ્યં પરિત્યજ્ય પૂજયિત્વા ગજાનનમ્ ।
ધ્યાનયુક્તઃ સ્વભાવેનાતિષ્ઠત્તત્રૈવ નિત્યદા ॥ ૩॥

દક્ષ ઉવાચ ।
ગણેશસ્ય ધ્યાનમૈલકૃતં મે વદ સામ્પ્રતમ્ ।
તથાઽહં ધ્યાનસંયુક્તો ભજિષ્યામિ નિરન્તરમ્ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
યથૈલો નૃપવર્યઃ સ ગાર્ગ્યાજ્જ્ઞાત્વા ગણેશ્વરમ્ ।
અભજત્ ધ્યાનયુક્તશ્ચ તત્ ધ્યાનં શૃણુ માનદ ॥ ૫॥

ઐલ ઉવાચ ।
નમામિ વિઘ્નેશ્વરપાદપઙ્કજં સુચિહ્નિતં ચાખિલદં નિજાત્મનામ્ ।
ધ્વજાસિપદ્માભયવજ્રલાઞ્છનૈઃ પરશ્વધેનૈવ સુકોમલં પરમ્ ॥ ૬॥

સુરક્તપાદાઙ્ગુલકૈઃ સુકોમલૈર્નખપ્રભાતામ્રતયા સુરાજિતમ્ ।

સુગુલ્ફયુક્તં મૃદુમાંસલં મહન્ મોહં હરેત્ તત્તિમિરં હૃદિ સ્થિતમ્ ॥ ૭॥

જઙ્ઘે પરે રક્તસુભામયે તતો ધ્યાયામિ માંસેન યુતે સુકોમલે ।
તજ્જાનુની માંસલકે સુરોમભિરાકોમલૈર્વક્રશિખૈઃ સુસંવૃતે ॥ ૮॥

ઊરૂ સુમાંસેન સમાવૃતૌ પરૌ રમ્ભાસમાનૌ સુવિરાજિતૌ તથા ।
રક્તૌ હૃદા ચિન્તનમાત્રભાવતો ભક્તિપ્રદૌ વિઘ્નહરસ્ય ચિન્તયે ॥ ૯॥

કટિં સદા માંસલરક્તરઞ્જિતાં સુવર્તુલાં મધ્યમભાગસંશ્રિતામ્ ।
ગણેશ્વરસ્યૈવ તુ ચિન્તયામ્યહં સદા સુખાનન્દકરસ્ય નિત્યદા ॥ ૧૦॥

વસ્ત્રં સુરક્તં હૃદિ ચિન્તયામ્યહમનન્તમૌલ્યં કટિભાગસંસ્થિતમ્ ।
નાભિં સુવૃત્તાં પરમશ્રિયા યુતાં શેષસ્ય સંવાસકરીં તુ ચિન્તયે ॥ ૧૧॥

મહોદરં માંસલભાવસંયુતં સુરોમયુક્તં પ્રભયા વિરાજિતમ્ ।
વિચિન્તયેઽહં સકલપ્રકાશકં ત્રયીપ્રમૂલં પરમવ્યયં પરમ્ ॥ ૧૨॥

શ્રીવક્રતુણ્ડસ્ય વિશાલરૂપકં વક્ષસ્તથા રક્તમયં સુમાંસલમ્ ।
રક્તં સ્તનાભ્યાં હૃદયં તુ ચિન્તયે ચિન્તામણિં તત્ર સુખપ્રદં પરમ્ ॥ ૧૩॥

કણ્ઠં ત્રિરેખાયુતમેવ માંસલં રક્તં ગણેશસ્ય ચ તેજસા યુતમ્ ।
સ્કન્ધૌ વૃષસ્કન્ધસમૌ સુકોમલૌ ધ્યાયામિ ચિત્તે સતતં સુરક્તકૌ ॥ ૧૪॥

બાહૂ સદા માંસલકૌ પ્રભાસિતૌ સ્વાનન્દનાથસ્ય મનોઽતિસૌખ્યદૌ ।
હસ્તૌ તથા રક્તસુતેજસા યુતૌ વામૌ હૃદા દક્ષિણકૌ તુ ચિન્તયે ॥ ૧૫॥

કરાઙ્ગુલીર્વિંશતિકાઃ સુવર્તુલા નખૈઃ સુરક્તૈશ્ચ સુતેજસા યુતાઃ ।
ગણેશ્વરસ્યૈવ હૃદિ પ્રચિન્તયે સ્વભક્તરક્ષાકરિકાઃ સુભૂષિતાઃ ॥ ૧૬॥

મુખં તુ શુણ્ડાયુતમેવ ચિન્તયે ત્રિનેત્રયુક્તં પરમપ્રકાશકમ્ ।
સદૈકદન્તસ્ય ચ તીક્ષ્ણદન્તકં સ્વભક્તકાન્ પ્રેમરસેન સૌખ્યદમ્ ॥ ૧૭॥

કર્ણૌ વિશાલૌ હૃદિ ચિન્તયે પરૌ ભક્તાય નિષ્કામસુકામદૌ તથા ।
શૂર્પાકૃતી ચઞ્ચલભાવધારિણૌ વિઘ્નેશ્વરસ્યૈવ ચ વેદરૂપિણૌ ॥ ૧૮॥

કપોલકૌ ષટ્પદરૂપધારિભિર્મુનીશ્વરૈર્બ્રહ્મમદદ્રવાર્થિભિઃ ।
સુસંવૃતૌ નાદયુતૈર્નિરન્તરં ગણેશ્વરસ્યૈવ હૃદા વિચિન્તયે ॥ ૧૯॥

ભાલં સુતેજોયુતમેવ ચિન્તયે શ્રીઢુણ્ઢિરાજસ્ય નિશાકરસ્થલમ્ ।
(Page ખં. ૫ અ. ૪૪ પાન ૧૦૭)
રક્તાષ્ટગન્ધૈશ્ચ સુચિત્રિતં પ્રભોર્બિન્દુપ્રયુક્તં ત્વથ તણ્ડુલૈર્યુતમ્ ॥ ૨૦॥

કેશૈઃ સમાચ્છાદિતમસ્તકં તથા સઞ્ચિન્તયે વિઘ્નવિનાશકારિણઃ ।
બ્રહ્માણ્ડમૂલે પ્રભુમસ્તકાશ્રિતે કુમ્ભસ્થલે બ્રહ્મવરસ્ય સૌખ્યદે ॥ ૨૧॥

ગણેશદેહં પરિચિન્તયામ્યહં સુભૂષણૈર્ભૂષિતકં વિચિત્રકૈઃ ।
અનર્ઘમૂલ્યૈશ્ચ સુવસ્ત્રકૈસ્તથા સુશોભિતં બ્રહ્મવરસ્ય સર્વદા ॥ ૨૨॥

વિચિત્રગન્ધૈઃ પરિલેપિતં તથા સુચિત્રિતં ભક્તવરૈઃ સુયોગિભિઃ ।
ગણાધિપં સાધુ હૃદિ સ્થિતં સદા વિચિન્તયેઽહં નિજભક્તિલાલસમ્ ॥ ૨૩॥

પાશાઙ્કુશાદ્યૈશ્ચ સુસંસ્તુતં પરં ઢુણ્ઢિં પ્રમોદાદિભિરેવ નિત્યદા ।
ગણેશ્વરં દવેવરૈસ્તથોન્દુરુરાજેન પૂજ્યં ચ સુચિન્તયે હૃદિ ॥ ૨૪॥

વેદૈઃ પુરાણૈઃ સ્મૃતિભિશ્ચ શાસ્ત્રકૈઃ સ્તોત્રૈઃ સ્તુતં દેહધરૈર્વિચિન્તયે ।
બ્રહ્મપ્રિયાદ્યૈશ્ચ ગણૈરસઙ્ખ્યકૈર્ભક્ત્યા તથા મુદ્ગલમુખ્યકૈઃ પરમ્ ॥ ૨૫॥

સર્વાઙ્ગસંશોભનરૂપયુક્તયા સિદ્ધ્યા ગણેશં પરિચિન્તયે હૃદિ ।
સંસેવિતં વામગયા સુશક્તિભિઃ સિદ્ધ્યાદિભિઃ સંવૃતયા સ્વમાયયા ॥ ૨૬॥

બુદ્ધ્યા કલાભિશ્ચ સુસેવિતં તથા વિદ્યાભિરારાદ્ગણનાયકં હૃદિ ।
સર્વાઙ્ગસંશોભનયા સ્વમાયયા સઞ્ચિન્તયે દક્ષિણભાગભૂષયા ॥ ૨૭॥

લક્ષેણ લાભેન ચ વિઘ્નનાયકં સંસેવિતં શોભનશોભનેન તુ ।
સઞ્ચિન્તયે પુત્રવરેણ સર્વદા બ્રહ્મેશ્વરં ભક્તજનૈઃ સ્વધામગૈઃ ॥ ૨૮॥

અનન્તમન્ત્રૈઃ કથિતં સ્વરૂપકં વિચિન્તયે વક્તુમશક્યભાવતઃ ।
હૃદિ સ્થિતં ધ્યાનસુલોલુપં પરં ગણેશ્વરં બ્રહ્મમયાગધારિણમ્ ॥ ૨૯॥

મુદ્ગલ ઉવાચ ।
એવમૈલઃ સ રાજર્ષિર્ગણેશભજને રતઃ ।
ધ્યાનં કૃત્વા સદાઽતિષ્ઠદ્ગણેશસ્ય નિવૃત્તિતઃ ॥ ૩૦॥

પ્રાતઃ કાલે સમુત્થાય સસ્ત્રીકઃ સ મહીપતિઃ ।
ધર્મયુક્તં ચકારાઽપિ નિત્યં કર્મ નિરન્તરમ્ ॥ ૩૧॥

તતો ગણેશ્વરં ભક્ત્યાઽપૂજયદ્ભક્તિસંયુતઃ ।
યથા ગાર્ગ્યેણ ભો દક્ષ શિક્ષિતઃ સ તથાઽકરોત્ ॥ ૩૨॥

શમીમન્દારદૂર્વાશ્ચાપૂજયદ્ભક્તિસંયુતઃ ।
પ્રાર્થ્ય પત્રાઙ્કુરાદ્યં સ પુષ્પં ચૈવાઽઽચિનોન્નૃપઃ ॥ ૩૩॥

દક્ષ ઉવાચ ।
શમીમન્દારદૂર્વાણાં પૂજનં વદ મુદ્ગલ ।
સિદ્ધેર્બુદ્ધેશ્ચ વિપેન્દ્ર સુતયોર્લક્ષલાભયોઃ ॥ ૩૪॥

શમીમન્દારદૂર્વાણાં પ્રાર્થના કીદૃશી ભવેત્ ।
તાં કૃત્વા પુષ્પપત્રાદીંશ્ચિનોમ્યહં ત્વદાજ્ઞયા ॥ ૩૫॥

કેન મન્ત્રેણ યોગીન્દ્ર શમીમન્દારકાંસ્તદા ।
નરોત્તમો ગણેશાય પરેશાય સમર્પયેત્ ॥ ૩૬॥

મુદ્ગલ ઉવાચ ।
શ ृણુ દક્ષ મહાપ્રાજ્ઞ ગાણપત્યપરાયણ ।
સન્તુષ્ટોઽહં વિશેષેણ પ્રશ્નેન ચ વદામિ તે ॥ ૩૭॥

ગણેશસ્યૈવ મન્ત્રેણ પૂજનીયા ઇમે મતાઃ ।
વસ્તુભિર્ગાણપત્યૈશ્ચ અભવંસ્તોષસંયુતાઃ ॥ ૩૮॥

સ્ત્રીપુમ્ભાવાત્મકં દક્ષ નાસ્તિ તત્ર વિચારતઃ ।
ગકારઃ સિદ્ધિરૂપશ્ચ ણકારો બુદ્ધિરુચ્યતે ॥ ૩૯॥

તયોઃ સ્વામી ગણેશઃ સ ત્રેધારૂપધરો બભૌ ।
ગણાસ્તસ્ય તથા પૂજ્યા ગાણપત્યૈશ્ચ મન્ત્રકૈઃ ॥ ૪૦॥

ગકારાદ્બિમ્બભાવાખ્યો લક્ષઃ પુત્રઃ પ્રકથ્યતે ।
તથા ગકારરૂપાદ્વૈ લાભસ્તૌ તન્મયૌ મતૌ ॥ ૪૧॥

(Page ખં. ૫ અ. ૪૫ પાન ૧૦૮)
શમીમન્દારકૌ દક્ષ વરદાનાદ્વિશેષતઃ ।
ગણેશાકારરૂપૌ તૌ ભાવયેન્નાત્ર સંશયઃ ॥ ૪૨॥

દૂર્વાં દેવીં ગણેશસ્ય મન્ત્રેણાપૂજયેન્નરઃ ।
અથવા વૈદિકૈર્મન્ત્રૈઃ કાણ્ડાદિભિઃ પ્રપૂજયેત્ ॥ ૪૩॥

નામમન્ત્રેણ શૂદ્રસ્તાન્ પૂજયેત્ સર્વભાવતઃ ।
એતદેવ રહસ્યં તે કથિતં સર્વમઞ્જસા ॥ ૪૪॥

પ્રાર્થનાં તે પ્રવક્ષ્યામિ શ ृણુ દક્ષ મહામતે ।
સ્નાનયુક્તો વનં ગત્વાઽથવા પુરે સ્વમન્દિરે ॥ ૪૫॥

યત્ર દૂર્વા ચ મન્દારઃ શમી તિષ્ઠતિ તત્ર સઃ ।

ગત્વા પ્રણમ્ય તાનાદૌ પ્રાર્થયેદ્ભક્તિસંયુતઃ ॥ ૪૬॥

દૂર્વેઽનન્તબ્રહ્મરૂપે ચામૃતરૂપે શતાઙ્કુરે ।
ગણેશપ્રીણનાર્થાય ચિનોમિ ત્વાં ક્ષમસ્વ ભોઃ ॥ ૪૭॥

શમી સર્વપ્રદે દેવિ ગણેશરૂપધારિણિ ।
ચિનોમિ ત્વાં ગણેશસ્ય પ્રીણનાય નમામ્યહમ્ ॥ ૪૮॥

મન્દારવાઞ્છિતાર્થસ્ય દાતર્વિઘ્નેશરૂપક ।
ક્ષમસ્વ પ્રીણનાર્થાય ગણેશસ્ય ચિનોમ્યઽહમ્ ॥ ૪૯॥

એવં પ્રાર્થ્ય પ્રજાનાથ શમીમન્દારકૌ પુરા ।
દૂર્વાપત્રાણિ પુષ્પાણિ વિભું હ્યાનાય્ય પૂજયેત્ ॥ ૫૦॥

સહસ્રનામમન્ત્રૈશ્ચ અષ્ટોત્તરશતૈર્નરઃ ।
એકવિંશતિકૈશ્ચૈવ નામભિસ્તાઃ સમર્પયેત્ ॥ ૫૧॥

અથવા મૂલમન્ત્રેણ નામમન્ત્રેણ વા તથા ।
ગાણેશૈર્વિવિધૈર્મન્ત્રૈર્દૂર્વાદીનિ સમર્પયેત્ ॥ ૫૨॥

એતત્તે કથિતં સર્વં રહસ્યં પાવનાત્મકમ્ ।
ગાણપત્યપ્રદં પૂર્ણં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે ધ્યાનદૂર્વાદિપૂજાવિધિવર્ણનં નામ ચતુશ્ચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૪

## ૫.૪૫ શ્રવણમાહાત્મ્યવર્ણનં નામ પઞ્ચચત્વારિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ગણેશકીલકં બ્રહ્મન્ વદ સર્વાર્થદાયકમ્ ।
મન્ત્રાદીનાં વિશેષેણ સિદ્ધિદં પૂર્ણભાવતઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
કીલકેન વિહીનાશ્ચ મન્ત્રા નૈવ સુખપ્રદાઃ ।
આદૌ કીલકમેવં વૈ પઠિત્વા જપમાચરેત્ ॥ ૨॥

તદા વીર્યયુતા મન્ત્રા નાનાસિદ્ધિપ્રદાયકાઃ ।
ભવન્તિ નાત્ર સન્દેહઃ કથયામિ યથાશ્રુતમ્ ॥ ૩॥

સમાદિષ્ટં ચાઙ્ગિરસા મહ્યં ગુહ્યતમં પરમ્ ।
સિદ્ધિદં વૈ ગણેશસ્ય કીલકં શ‍ૃણુ માનદ ॥ ૪॥

અસ્ય શ્રીગણેશકીલકસ્ય ।
શિવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ ।
શ્રીગણપતિર્દેવતા ।
ૐ ગં યોગાય સ્વાહા ।
ૐ ગં બીજમ્ ।
વિદ્યાઽવિદ્યાશક્તિગણપતિપ્રીત્યર્થે જપે વિનિયોગઃ ।
છન્દઋષ્યાદિન્યાસાંશ્ચ કુર્યાદાદૌ તથા પરાન્ ।
એકાક્ષરસ્યૈવ દક્ષ ષડઙ્ગાનાચરેત્ સુધીઃ ॥ ૫॥

તતો ધ્યાયેદ્ ગણેશાનં જ્યોતીરૂપધરં પરમ્ ।
મનોવાણીવિહીનં ચ ચતુર્ભુજવિરાજિતમ્ ॥ ૬॥

શુણ્ડાદણ્ડમુખં પૂર્ણં દ્રષ્ટું નૈવ પ્રશક્યતે ।
વિદ્યાઽવિદ્યાસમાયુક્તં વિભૂતિભિરુપાસિતમ્ ॥ ૭॥

(Page ખં. ૫ અ. ૪૫ પાન ૧૦૯)
એવં ધ્યાત્વા ગણેશાનં માનસૈઃ પૂજયેત્ પૃથક્ ।
પઞ્ચોપચારકૈર્દક્ષ તતો જપં સમાચરેત્ ॥ ૮॥

એકવિંશતિવારં તુ જપં કુર્યાત્ પ્રજાપતે ।
તતઃ સ્તોત્રં સમુચ્ચાર્ય પશ્ચાત્ સર્વં સમાચરેત્ ॥ ૯॥

રૂપં બલં શ્રિયં દેહિ યશો વીર્યં ગજાનન ।
મેધાં પ્રજ્ઞાં તથા કીર્તિં વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૧૦॥

યદા દેવાદયઃ સર્વે કુણ્ઠિતા દૈત્યપૈઃ કૃતાઃ ।
તદા ત્વં તાન્ નિહત્ય સ્મ કુરુષે વીર્યસંયુતાન્ ॥ ૧૧॥

તથા મન્ત્રા ગણેશાન કુણ્ઠિતાશ્ચ દુરાત્મભિઃ ।
શાપૈશ્ચ તાન્ સવીર્યાંસ્તે કુરુષ્વ ત્વં નમો નમઃ ॥ ૧૨॥

શક્તયઃ કુણ્ઠિતાઃ સર્વાઃ સ્મરણેન ત્વયા પ્રભો ।
જ્ઞાનયુક્તાઃ સવીર્યાશ્ચ કૃતા વિઘ્નેશ તે નમઃ ॥ ૧૩॥

ચરાચરં જગત્ સર્વં સત્તાહીનં યદા ભવેત્ ।

ત્વયા સત્તાયુતં ઢુણ્ઢે સ્મરણેન કૃતં ચ તે ॥ ૧૪॥

તત્ત્વાનિ વીર્યહીનાનિ યદા જાતાનિ વિઘ્નપ ।
સ્મૃત્યા તે વીર્યયુક્તાનિ પુનર્જાતાનિ તે નમઃ ॥ ૧૫॥

બ્રહ્માણિ યોગહીનાનિ જાતાનિ સ્મરણેન તે ।
યદા પુનર્ગણેશાન યોગયુક્તાનિ તે નમઃ ॥ ૧૬॥

ઇત્યાદિ વિવિધં સર્વં સ્મરણેન ચ તે પ્રભો ।
સત્તાયુક્તં બભૂવૈવ વિઘ્નેશાય નમો નમઃ ॥ ૧૭॥

તથા મન્ત્રા ગણેશાન વીર્યહીના બભૂવિરે ।
સ્મરણેન પુનર્ઢુણ્ઢે વીર્યયુક્તાન્ કુરુષ્વ તે ॥ ૧૮॥

સર્વં સત્તાસમાયુક્તં મન્ત્રપૂજાદિકં પ્રભો ।
મમ નામ્ના ભવતુ તે વક્રતુણ્ડાય તે નમઃ ॥ ૧૯॥

ઉત્કીલય મહામન્ત્રાન્ જપેન સ્તોત્રપાઠતઃ ।
સર્વસિદ્ધિપ્રદા મન્ત્રા ભવન્તુ ત્વત્પ્રસાદતઃ ॥ ૨૦॥

ગણેશાય નમસ્તુભ્યં હેરમ્બાયૈકદન્તિને ।
સ્વાનન્દવાસિને તુભ્યં બ્રહ્મણસ્પતયે નમઃ ॥ ૨૧॥

ગણેશકીલકમિદં કથિતં તે પ્રજાપતે ।
શિવપ્રોક્તં તુ મન્ત્રાણામુત્કીલનકરં પરમ્ ॥ ૨૨॥

યઃ પઠિષ્યતિ ભાવેન જપ્ત્વા તે મન્ત્રમુત્તમમ્ ।
સ સર્વસિદ્ધિમાપ્નોતિ નાનામન્ત્રસમુદ્ભવામ્ ॥ ૨૩॥

એનં ત્યક્ત્વા ગણેશસ્ય મન્ત્રં જપતિ નિત્યદા ।
સ સર્વફલહીનશ્ચ જાયતે નાઽત્ર સંશયઃ ॥ ૨૪॥

સર્વસિદ્ધિપ્રદં પ્રોક્તં કીલકં પરમાદ્ભુતમ્ ।
પુરાઽનેન સ્વયં શમ્ભુર્મન્ત્રજાં સિદ્ધિમાલભત્ ॥ ૨૫॥

વિષ્ણુબ્રહ્માદયો દેવા મુનયો યોગિનઃ પરે ।
અનેન મન્ત્રસિદ્ધિં તે લેભિરે ચ પ્રજાપતે ॥ ૨૬॥

ઐલઃ કીલકમાદ્યં વૈ કૃત્વા મન્ત્રપરાયણઃ ।
ગતઃ સ્વાનન્દપૂર્યાં સ ભક્તરાજો બભૂવ હ ॥ ૨૭॥

સસ્ત્રીકો જડદેહેન બ્રહ્માણ્ડમવલોક્ય તુ ।
ગણેશદર્શનેનૈવ જ્યોતીરૂપો બભૂવ હ ॥ ૨૮॥

દક્ષ ઉવાચ ।
ઐલો જડશરીરસ્થઃ કથં દેવાદિકૈર્યુતમ્ ।
બ્રહ્માણ્ડં સ દદર્શૈવ તન્ મે વદ કુતૂહલમ્ ॥ ૨૯॥

પુણ્યરાશિઃ સ્વયં સાક્ષાન્નરકાદીન્ મહામતે ।
અપશ્યચ્ચ કથં સોઽપિ પાપિદર્શનયોગ્યકાન્ ॥ ૩૦॥

મુદ્ગલ ઉવાચ ।
વિમાનસ્થઃ સ્વયં રાજા કૃપયા તાન્ દદર્શ હ ।
ગાણેશાનાં જડસ્થશ્ચ શિવવિષ્ણુમુખાન્ પ્રભો ॥ ૩૧॥

સ્વાનન્દગે વિમાને યે સંસ્થિતાસ્તે શુભાશુભે ।
યોગરૂપતયા સર્વે દક્ષ પશ્યન્તિ ચાઞ્જસા ॥ ૩૨॥

એતત્તે કથિતં સર્વમૈલસ્ય ચરિતં શુભમ્ ।
યઃ શ‍ૃણોતિ સ વૈ મર્ત્યો ભુક્તિં મુક્તિં લભેત્ ધ્રુવમ્ ॥ ૩૩॥

ખણ્ડં લમ્બોદરસ્યૈતદ્યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠતિ બ્રહ્મભૂતઃ શ્રાવયતે જાયતે સ્વયમ્ ॥ ૩૪॥

નાનેન સદૃશં કિઞ્ચિદ્ભુક્તિમુક્તિપ્રદં મતમ્ ।
યોગરૂપો મહાભાગ યત્ર લમ્બોદરઃ સ્તુતઃ ॥ ૩૫॥

નાનાશ્રુતિસ્મૃતીનાં યચ્છ્રવણેન ફલં લભેત્ ।
તદસ્યૈકસ્ય ખણ્ડસ્ય શ્રવણેન ભવેદિહ ॥ ૩૬॥

નાનાદાનાનિ યે દદ્યુસ્તીર્થેષુ સ્નાનકારકાઃ ।
તેભ્યઃ શતાધિકં પુણ્યં લભેદસ્ય તુ સંશ્રયાત્ ॥ ૩૭॥

વ્રતાનિ યજ્ઞકાન્ સર્વાન્ કુરુતે માનવઃ પ્રભો ।
અસ્ય શ્રવણમાત્રેણ લભેત્ તસ્માચ્છતાધિકમ્ ॥ ૩૮॥

નાનાતપાંસિ સર્વાણિ યઃ કરોતિ નરોઽસકૃત્ ।
અસ્ય શ્રવણમાત્રેણ લભેત્ પુણ્યમપારકમ્ ॥ ૩૯॥

પુત્રપૌત્રાદિસંયુક્તો ધનધાન્યાદિભાગ્યવાન્ ।
શ્રવણેન નરઃ સદ્યો ભવત્યત્ર ન સંશયઃ ॥ ૪૦॥

યદ્યદિચ્છતિ તત્તત્તુ સફલં જાયતે ક્ષણાત્ ।
શ્રવણેન પ્રજાનાથ ખણ્ડસ્યાસ્ય ન સંશયઃ ॥ ૪૧॥

બહુનાત્ર કિમુક્તેન સાક્ષાદ્યોગપ્રદઃ પરઃ ।
સર્વસિદ્ધિપ્રદઃ ખણ્ડઃ કથિતસ્તે પ્રજાપતે ॥ ૪૨॥

ઇદં લમ્બોદરસ્યૈવ ચરિતં સર્વસિદ્ધિદમ્ ।
કથિતં તે સમાસેન કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૩॥

સૂત ઉવાચ ।
યથા દક્ષાય વિપ્રેશ મુદ્ગલેન પ્રકાશિતમ્ ।
મયા તવ તથાગ્રેઽપિ કથિતં ભાર્ગવાગ્રણીઃ ॥ ૪૪॥

ચરિતં શૌનકાદ્યાશ્ચ શ્રુતં લમ્બોદરસ્ય યત્ ।
ધન્યોઽહં ભવતાં યોગાદ્ગણેશચરિતે રતઃ ॥ ૪૫॥

વિસ્તરેણ શિવાદ્યાશ્ચ વેદાદ્યાઃ શેષમુખ્યકાઃ ।
નૈવ વર્ણયિતું શક્તા બભૂવુસ્તત્ર કોપ્યહમ્ ॥ ૪૬॥

વ્યાસેન કથિતં સર્વં ચરિતં યાદૃશં પુરા ।
તાદૃશં કથિતં વિપ્ર શ્રોતુમિચ્છસિ કિં પુનઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શ્રવણમાહાત્મ્યવર્ણનં નામ પઞ્ચચત્વારિંશત્તમોઽધ્યાયઃ ॥ ૫.૪૫
॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે પઞ્ચમઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 5 Lambodaracharitam*

pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*